१ अथ सार्धान्तिकविधिवाक्यानि। (६६)

1 atha sārdhāntikavidhivākyāni | (66)

ॐ सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत॥ १॥

छान्दोग्य ३।१४।१

om sarvaṁ khalvidaṁ brahma tajjalāniti śānta upāsīta || 1||

chāndogya 3|14|1

आत्मानमेवावेदहं ब्रह्मास्मीति॥ २॥

बृहदारण्यक १।१४।१०

ātmānamevāvedahaṁ brahmāsmīti || 2||

bṛhadāraṇyaka 1|14|10

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः॥ ३॥

बृहदारण्यक २।४।५

ātmā vā are draṣṭavyaḥ śrotavyo mantavyo nididhyāsitavyaḥ || 3||

bṛhadāraṇyaka 2|4|5

महत्पदं ज्ञात्वा वृक्षमूले वसेत्॥ ४॥

सुबाल १३

mahatpadaṁ jñātvā vṛkṣamūle vaset || 4||

subāla 13

सच्चिदानन्दात्मानमद्वितीयं ब्रह्म भावयेत्॥ ५॥

वज्रसूचिका ९

saccidānandātmānamadvitīyaṁ brahma bhāvayet || 5||

vajrasūcikā 9

अहं ब्रह्मास्मीत्यनुसन्धानं कुर्यात्॥ ६॥

पैङ्गल ३।२

ahaṁ brahmāsmītyanusandhānaṁ kuryāt || 6||

paiṅgala 3|2

स तज्ज्ञो बालोन्मत्तपिशाचवज्जडवृत्त्या लोकमाचरेत्॥ ७॥

मण्डलब्राह्मण ५।४

sa tajjño bālonmattapiśācavajjaḍavṛttyā lokamācaret || 7||

maṇḍalabrāhmaṇa 5|4

ब्राह्मणः समाहितो भूत्वा तत्त्वंपदैक्यमेव सदाभ्यसेत्॥ ८॥

पैङ्गल ३।४

brāhmaṇaḥ samāhito bhūtvā tattvaṁpadaikyameva sadābhyaset || 8||

paiṅgala 3|4

???? सर्वत्राद्वैतब्रह्मबुद्धिं कुर्यात्॥ ९॥????

???? sarvatrādvaitabrahmabuddhiṁ kuryāt || 9||????
????

आशाम्बरो न नमस्कारो न स्वाहाकारो न स्वधाकारो
न निन्दास्तुतिर्यादृच्छिको भवेत्॥ १०॥

परमहंस ११

āśāmbaro na namaskāro na svāhākāro na svadhākāro
na nindāstutiryādṛcchiko bhavet || 10||

paramahaṁsa 11

सर्वतः स्वरूपमेव पश्यन् जीवन्मुक्तिमवाप्य प्रारब्धप्रतिभासनाशपर्यन्तं स्वरूपानुसन्धानेन वसेत्॥ ११॥

नारदपरिव्राजक ७।३

sarvataḥ svarūpameva paśyan jīvanmuktimavāpya prārabdhapratibhāsanāśaparyantaṁ svarūpānusandhānena vaset || 11||

nāradaparivrājaka 7|3

स्वरूपानुसन्धानं विनाऽन्यथाचारपरो न भवेत्॥ १२॥

नारदपरिव्राजक ५।१

svarūpānusandhānaṁ vinā'nyathācāraparo na bhavet || 12||

nāradaparivrājaka 5|1

वेदान्तश्रवणं कुर्वन् योगं समारभेत॥ १३॥

शाण्डिल्य १।५।५

vedāntaśravaṇaṁ kurvan yogaṁ samārabheta || 13||

śāṇḍilya 1|5|5

आकुञ्चनेन कुण्डलिन्याः कपाटमुद्घाट्य मोक्षद्वारं विभेदयेत्॥ १४॥

शाण्डिल्य १।१०।३७

ākuñcanena kuṇḍalinyāḥ kapāṭamudghāṭya mokṣadvāraṁ vibhedayet || 14||

śāṇḍilya 1|10|37

यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि॥ १५॥

कठ १।३।१३

yacchedvāṅmanasī prājñastadyacchejjñāna ātmani || 15||

kaṭha 1|3|13

ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि॥ १६॥

कठ १।३।१३

jñānamātmani mahati niyacchettadyacchecchānta ātmani || 16||

kaṭha 1|3|13

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः॥ १७॥

शाट्यायनी २२

ātmānaṁ cedvijānīyādayamasmīti pūruṣaḥ || 17||

śāṭyāyanī 22

किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्॥ १८॥

शाट्यायनी २२

kimicchankasya kāmāya śarīramanusaṁjvaret || 18||

śāṭyāyanī 22

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः॥ १९॥

शाट्यायनी २३

tameva dhīro vijñāya prajñāṁ kurvīta brāhmaṇaḥ || 19||

śāṭyāyanī 23

नानुध्यायाद्बहूञ्शब्दान्वाचोविग्लापनं हि तत्॥ २०॥

वराह ४।३३

nānudhyāyādbahūñśabdānvācoviglāpanaṁ hi tat || 20||

varāha 4|33

यतो निर्विषयस्यास्य मनसो मुक्तिरिष्यते॥ २१॥

अमृतबिन्दु ३

yato nirviṣayasyāsya manaso muktiriṣyate || 21||

amṛtabindu 3

अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा॥ २२॥

अमृतबिब्दु ३

ato nirviṣayaṁ nityaṁ manaḥ kāryaṁ mumukṣuṇā || 22||

amṛtabibdu 3

चित्तमेव हि संसारस्तत्प्रयत्नेन शोधयेत्॥ २३॥

मैत्रायणी ४।३

cittameva hi saṁsārastatprayatnena śodhayet || 23||

maitrāyaṇī 4|3

दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिन्तयेत्॥ २४॥

तेजोबिन्दु १।५०

dṛśyaṁ hyadṛśyatāṁ nītvā brahmākāreṇa cintayet || 24||

tejobindu 1|50

मायाकार्यमिदं भेदमस्तिचेद्ब्रह्मभावनम्॥ २५॥

तेजोबिन्दु ६।१००

māyākāryamidaṁ bhedamasticedbrahmabhāvanam || 25||

tejobindu 6|100

देहोऽहमिति दुःखं चेद्ब्रह्माहमिति निश्चयः॥ २६॥

तेजोबिन्दु ६।१००

deho'hamiti duḥkhaṁ cedbrahmāhamiti niścayaḥ || 26||

tejobindu 6|100

हृदयग्रन्थिरस्तित्वे छेदने ब्रह्मचक्रकम्॥ २७॥

तेजोबिन्दु ६।१०१

hṛdayagranthirastitve chedane brahmacakrakam || 27||

tejobindu 6|101

संशये समनुप्राप्ते ब्रह्मनिश्चयमाप्नुयात्॥ २८॥

तेजोबिन्दु ६।१०१

saṁśaye samanuprāpte brahmaniścayamāpnuyāt || 28||

tejobindu 6|101

विज्ञेयोऽक्षरतन्मात्रो जीवितं चापि चञ्चलम्॥ २९॥

पैङ्गल ४।१७

vijñeyo'kṣaratanmātro jīvitaṁ cāpi cañcalam || 29||

paiṅgala 4|17

विहाय शास्त्रजालानि यत्सत्यं तदुपास्यताम्॥ ३०॥

पैङ्गल ४।१७

vihāya śāstrajālāni yatsatyaṁ tadupāsyatām || 30||

paiṅgala 4|17

यस्य स्त्री तस्य भोगेच्छा निस्त्रीकस्य क्व भोगभूः॥ ३१॥

महा ३।४८

yasya strī tasya bhogecchā nistrīkasya kva bhogabhūḥ || 31||

mahā 3|48

स्त्रियं त्यक्त्वा जगत्त्यक्तं जगत्त्यक्त्वा सुखी भवेत्॥ ३२॥

महा ३।४८

striyaṁ tyaktvā jagattyaktaṁ jagattyaktvā sukhī bhavet || 32||

mahā 3|48

चित्तं कारणमर्थानां तस्मिन्सति जगत्त्रयम्॥ ३३॥

योगशिखा ६।५९

cittaṁ kāraṇamarthānāṁ tasminsati jagattrayam || 33||

yogaśikhā 6|59

तस्मिन्क्षीणे जगत्क्षीणं तच्चिकित्स्यं प्रयत्नतः॥ ३४॥

योगशिखा ६।५९

tasminkṣīṇe jagatkṣīṇaṁ taccikitsyaṁ prayatnataḥ || 34||

yogaśikhā 6|59

सुप्तेरुत्थाय सुप्त्यन्तं ब्रह्मैकं प्रविचिन्त्यताम्॥ ३५॥

२।६४

supterutthāya suptyantaṁ brahmaikaṁ pravicintyatām || 35||

2|64

गच्छँस्तिष्ठन्नुपविशंश्छयानो वान्यथापि वा॥ ३६॥

कुण्डिका २८

gaccha□ stiṣṭhannupaviśaṁśchayāno ānyathāpi vā || 36||

kuṇḍikā 28

यथेच्छया वसेद्विद्वानात्मारामः सदा मुनिः॥ ३७॥

कुण्डिका २८

yathecchayā vasedvidvānātmārāmaḥ sadā muniḥ || 37||

kuṇḍikā 28

ज्योतिर्लिङ्गं भ्रुवोर्मध्ये नित्यं ध्यायेत्सदा यतिः॥ ३८॥

ब्रह्मविद्या ८०

jyotirliṅgaṁ bhruvormadhye nityaṁ dhyāyetsadā yatiḥ || 38||

brahmavidyā 80

आत्मानमात्मनः साक्षाद्ब्रह्मबुद्ध्या सुनिश्चलम्॥ ३९॥

ब्रह्मविद्या २९

ātmānamātmanaḥ sākṣādbrahmabuddhyā suniścalam || 39||

brahmavidyā 29

देहजात्यादिसम्बन्धान्वर्णाश्रमसमन्वितान्॥ ४०॥

ब्रह्मविद्या २९

dehajātyādisambandhānvarṇāśramasamanvitān || 40||

brahmavidyā 29

वेदशास्त्रपुराणादि पदपांसुमिव त्यजेत्॥ ४१॥

ब्रह्मविद्या ३०

vedaśāstrapurāṇādi padapāṁsumiva tyajet || 41||

brahmavidyā 30

एकाकी निःस्पृहस्तिष्ठेन्न हि केन सहालपेत्॥ ४२॥

नारदपरिव्राजक ३।५९

ekākī niḥspṛhastiṣṭhenna hi kena sahālapet || 42||

nāradaparivrājaka 3|59

दद्यान्नारायणेत्येवं प्रतिवाक्यं सदा यतिः॥ ४३॥

नारदपरिव्राजक ३।५९

dadyānnārāyaṇetyevaṁ prativākyaṁ sadā yatiḥ || 43||

nāradaparivrājaka 3|59

मुनिः कौपीनवासाः स्यान्नग्नो वा ध्यानतत्परः॥ ४४॥

नारदपरिव्राजक ४।३२

muniḥ kaupīnavāsāḥ syānnagno vā dhyānatatparaḥ || 44||

nāradaparivrājaka 4|32

अध्यात्मरतिरासीनो निरपेक्षो निराशिषः॥ ४५॥

नारदपरिव्राजक ३।४४

adhyātmaratirāsīno nirapekṣo nirāśiṣaḥ || 45||

nāradaparivrājaka 3|44

आत्मनैव सहायेन सुखार्थी विचरेदिह॥ ४६॥

नारदपरिव्राजक ३।४४

ātmanaiva sahāyena sukhārthī vicarediha || 46||

nāradaparivrājaka 3|44

सन्दिग्धः सर्वभूतानां वर्णाश्रमविवर्जितः॥ ४७॥

नारदपरिव्राजक ४।३६

sandigdhaḥ sarvabhūtānāṁ varṇāśramavivarjitaḥ || 47||

nāradaparivrājaka 4|36

अन्धवज्जडवच्चापि मूकवच्च महीं चरेत्॥ ४८॥

नारदपरिव्राजक ४।३६

andhavajjaḍavaccāpi mūkavacca mahīṁ caret || 48||

nāradaparivrājaka 4|36

यद्यत्पश्यति चक्षुर्भ्यां तत्तदात्मेति भावयेत्॥ ४९॥

योगतत्त्व ६९

yadyatpaśyati cakṣurbhyāṁ tattadātmeti bhāvayet || 49||

yogatattva 69

यद्यच्छृणोति कर्णाभ्यां तत्तदात्मेति भावयेत्॥ ५०॥

योगतत्त्व ७०

yadyacchṛṇoti karṇābhyāṁ tattadātmeti bhāvayet || 50||

yogatattva 70

लभते नासया यद्यत्तत्तदात्मेति भावयेत्॥ ५१॥

योगतत्त्व ७०

labhate nāsayā yadyattattadātmeti bhāvayet || 51||

yogatattva 70

जिह्वया यद्रसं ह्यत्ति तत्तदात्मेति भावयेत्॥ ५२॥

योगतत्त्व ७१

jihvayā yadrasaṁ hyatti tattadātmeti bhāvayet || 52||

yogatattva 71

त्वचा यद्यत्स्पृशेद्योगी तत्तदात्मेति भावयेत्॥ ५३॥

योगतत्त्व ७१

tvacā yadyatspṛśedyogī tattadātmeti bhāvayet || 53||

yogatattva 71

दृष्टिं ज्ञानमयीं कृत्वा पश्येद्ब्रह्ममयं जगत्॥ ५४॥

तारसार १|२९

dṛṣṭiṁ jñānamayīṁ kṛtvā paśyedbrahmamayaṁ jagat || 54||

tārasāra 1|29

द्रष्टृदर्शनदृश्यानां विरामो यत्र वा भवेत्॥ ५५॥

तारसार १|३०

draṣṭṛdarśanadṛśyānāṁ virāmo yatra vā bhavet || 55||

tārasāra 1|30

दृष्टिस्तत्रैव कर्तव्या न नासाग्रावलोकनी॥ ५६॥

तारसार १|३०

dṛṣṭistatraiva kartavyā na nāsāgrāvalokanī || 56||

tārasāra 1|30

देवाग्न्यगारे तरुमूले गुहायां वसेदसङ्गोऽलक्षितशीलवृत्तः॥ ५७॥

शाट्यायनी २१

devāgnyagāre tarumūle guhāyāṁ vasedasaṅgo'lakṣitaśīlavṛttaḥ || 57||

śāṭyāyanī 21

निरिन्धनज्योतिरिवोपशान्तो न चोद्विजेदुद्विजेद्यत्रकुत्र॥ ५८॥

शाट्यायनी २१

nirindhanajyotirivopaśānto na codvijedudvijedyatrakutra || 58||

śāṭyāyanī 21

शान्तो दान्त उपरतस्तितिक्षुर्योऽनूचानो ह्यभिजज्ञौ समानः॥ ५९॥

शाट्यायनी ५

śānto dānta uparatastitikṣuryo'nūcāno hyabhijajñau samānaḥ || 59||

śāṭyāyanī 5

त्यक्तेषणो ह्यनृणस्तं विदित्वा मौनी वसेदाश्रमे यत्र कुत्र॥ ६०॥

शाट्यायनी ५

tyakteṣaṇo hyanṛṇastaṁ viditvā maunī vasedāśrame yatra kutra || 60||

śāṭyāyanī 5

यमैश्च नियमैश्चैव ह्यासनैश्च सुसंयतः॥ ६१॥

त्रिशिखिब्राह्मण ५३

yamaiśca niyamaiścaiva hyāsanaiśca susaṁyataḥ || 61||

triśikhibrāhmaṇa 53

नाडीशुद्धिं च कृत्वादौ प्राणायामं समाचरेत्॥ ६२॥

त्रिशिखिब्राह्मण ५३

nāḍīśuddhiṁ ca kṛtvādau prāṇāyāmaṁ samācaret || 62||

triśikhibrāhmaṇa 53

सर्वचिन्तां परित्यज्य सावधानेन चेतसा॥ ६३॥

वराह २।८३

sarvacintāṁ parityajya sāvadhānena cetasā || 63||

varāha 2|83

निर्विकल्पः प्रसन्नात्मा प्राणायामं समाचरेत्॥ ६४॥

वराह ५।५५

nirvikalpaḥ prasannātmā prāṇāyāmaṁ samācaret || 64||

varāha 5|55

मरुदभ्यसनं सर्वं मनोयुक्तं समभ्यसेत्॥ ६५॥

शाण्डिल्य १।१०।३७

marudabhyasanaṁ sarvaṁ manoyuktaṁ samabhyaset || 65||

śāṇḍilya 1|10|37

इतरत्र न कर्तव्या मनोवृत्तिर्मनीषिणा॥ ६६॥

शाण्डिल्य १|१०|३७

itaratra na kartavyā manovṛttirmanīṣiṇā || 66||

śāṇḍilya 1|10|37

२ अथ सार्धान्तिकबन्धमोक्षवाक्यानि। (३१)

2 atha sārdhāntikabandhamokṣavākyāni | (31)

देहादीनात्मत्वेनाभिमन्यते सोऽभिमान आत्मनो बन्धः॥ १॥

सर्वसार १

dehādīnātmatvenābhimanyate so'bhimāna ātmano bandhaḥ || 1||

sarvasāra 1

तन्निवृत्तिर्मोक्षः॥ २॥

सर्वसार १

tannivṛttirmokṣaḥ || 2||

sarvasāra 1

देवमनुष्याद्युपासनाकामसङ्कल्पो बन्धः॥ ३॥

निरलम्ब

devamanuṣyādyupāsanākāmasaṅkalpo bandhaḥ || 3||

niralamba

कर्तृत्वाद्यहङ्कारसङ्कल्पो बन्धः॥ ४॥

निरलम्ब

kartṛtvādyahaṅkārasaṅkalpo bandhaḥ || 4||

niralamba

अणिमाद्यष्टैश्वर्याशासिद्धसङ्कल्पो बन्धः॥ ५॥

निरलम्ब

aṇimādyaṣṭaiśvaryāśāsiddhasaṅkalpo bandhaḥ || 5||

niralamba

यमाद्यष्टाङ्गयोगसङ्कल्पो बन्धः॥ ६॥

निरलम्ब

yamādyaṣṭāṅgayogasaṅkalpo bandhaḥ || 6||

niralamba

केवलं मोक्षापेक्षासङ्कल्पो बन्धः॥ ७॥

निरलम्ब

kevalaṁ mokṣāpekṣāsaṅkalpo bandhaḥ || 7||

niralamba

सङ्कल्पमात्रसम्भवो बन्धः॥ ८॥

निरलम्ब

saṅkalpamātrasambhavo bandhaḥ || 8||

niralamba

नित्यानित्यवस्तुविचारादनित्यसंसारसुखदुःखविषयसमस्तक्षेत्रममता
बन्धक्षयो मोक्षः॥ ९॥

निरलम्ब

nityānityavastuvicārādanityasaṁsārasukhaduḥkhaviṣayasamastakṣetra
mamatā

bandhakṣayo mokṣaḥ || 9||

niralamba

मन एव मनुष्याणां कारणं बन्धमोक्षयोः॥ १०॥

शाट्यायनी १

mana eva manuṣyāṇāṁ kāraṇaṁ bandhamokṣayoḥ || 10||

śāṭyāyanī 1

बन्धनं विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्॥ ११॥

त्रिपुरतापिनी ५।३

bandhanaṁ viṣayāsaktaṁ muktyai nirviṣayaṁ smṛtam || 11||

tripuratāpinī 5|3

ममेति बध्यते जन्तुर्नममेति विमुच्यते॥ १२॥

वराह २।४४

mameti badhyate janturnamameti vimucyate || 12||

varāha 2|44

ममत्वेन भवेज्जीवो निर्ममत्वेन केवलः॥ १३॥

योगचूडामणि ८४

mamatvena bhavejjīvo nirmamatvena kevalaḥ || 13||

yogacūḍāmaṇi 84

स्वसङ्कल्पवशाद्बद्धो निःसङ्कल्पाद्विमुच्यते॥ १४॥

महा २।७०

svasaṅkalpavaśādbaddho niḥsaṅkalpādvimucyate || 14||

mahā 2|70

द्रष्टा दृश्यवशाद्बद्धो दृश्याभावे विमुच्यते॥ १५॥

महा ४।४८

draṣṭā dṛśyavaśādbaddho dṛśyābhāve vimucyate || 15||

mahā 4|48

इच्छामात्रमविद्येयं तन्नाशो मोक्ष उच्यते॥ १६॥

महा ४।११६

icchāmātramavidyeyaṁ tannāśo mokṣa ucyate || 16||

mahā 4|116

भोगेच्छामात्रकं बन्धस्तत्त्यागो मोक्ष उच्यते॥ १७॥

महा ५।९७

bhogecchāmātrakaṁ bandhastattyāgo mokṣa ucyate || 17||

mahā 5|97

चिच्चैत्यकलना बन्धस्तन्मुक्तिर्मुक्तिरुच्यते॥ १८॥

महा ६।७७

ciccaityakalanā bandhastanmuktirmuktirucyate || 18||

mahā 6|77

अनास्थैव हि निर्वाणं दुःखमास्थापरिग्रहः॥ १९॥

महा ४।१११

anāsthaiva hi nirvāṇaṁ duḥkhamāsthāparigrahaḥ || 19||

mahā 4|111

कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते॥ २०॥

सन्न्यास २।९८

karmaṇā badhyate janturvidyayā ca vimucyate || 20||

sannyāsa 2|98

स्वरूपावस्थितिर्मुक्तिस्तद्भ्रंशोऽहन्त्ववेदनम्॥ २१॥

महा ५।२

svarūpāvasthitirmuktistadbhraṁśo'hantvavedanam || 21||

mahā 5|2

चित्ते चलति संसारो निश्चले मोक्ष उच्यते॥ २२॥

योगशिखा ६।५८

citte calati saṁsāro niścale mokṣa ucyate || 22||

yogaśikhā 6|58

बन्धो हि वासनाबद्धो मोक्षः स्याद्वासनाक्षयः॥ २३॥

मुक्तिका २।६८

bandho hi vāsanābaddho mokṣaḥ syādvāsanākṣayaḥ || 23||

muktikā 2|68

पदार्थभावनादाढ्र्यं बन्ध इत्यभिधीयते॥ २४॥

महा २।४१

padārthabhāvanādārḍhyaṁ bandha ityabhidhīyate || 24||

mahā 2|41

वासनातानवं ब्रह्मन् मोक्ष इत्यभिधीयते॥ २५॥

महा २।४१

vāsanātānavaṁ brahman mokṣa ityabhidhīyate || 25||

mahā 2|41

न मोक्षो नभसः पृष्ठे न पाताले न भूतले॥ २६॥

अन्नपूर्णा २।२३

na mokṣo nabhasaḥ pṛṣṭhe na pātāle na bhūtale || 26||

annapūrṇā 2|23

सर्वाशासंक्षये चेतःक्षयो मोक्ष इतीष्यते॥ २७॥

अन्नपूर्णा २।२३

sarvāśāsaṁkṣaye cetaḥkṣayo mokṣa itīṣyate || 27||

annapūrṇā 2|23

मोक्षो मेऽस्त्विति चिन्तान्तर्जाता चेदुत्थितं मनः॥ २८॥

अन्नपूर्णा २।२४

mokṣo me'stviti cintāntarjātā cedutthitaṁ manaḥ || 28||

annapūrṇā 2|24

मननोत्थे मनस्येष बन्धः सांसारिको मतः॥ २९॥

अन्नपूर्णा २।२४

mananotthe manasyeṣa bandhaḥ sāṁsāriko mataḥ || 29||

annapūrṇā 2|24

तदप्रमार्जनमात्रं हि महासंसारतां गतम्॥ ३०॥

अन्नपूर्णा ४।५६

tadapramārjanamātraṁ hi mahāsaṁsāratāṁ gatam || 30||

annapūrṇā 4|56

तत्प्रमार्जनमात्रन्तु मोक्ष इत्यभिधीयते॥ ३१॥

अन्नपूर्णा १।५६

tatpramārjanamātrantu mokṣa ityabhidhīyate || 31||

annapūrṇā 1|56

इति सार्धान्तिकबन्धमोक्षवाक्यान्येकत्रिंशत्॥ ३१॥

द्वितीयं प्रकरणं समाप्तम्।

iti sārdhāntikabandhamokṣavākyānyekatriṁśat || 31||

dvitīyaṁ prakaraṇaṁ samāptam |

३ अथ सार्धान्तिकाविद्वन्निन्दावाक्यानि। (२१)

3 atha sārdhāntikāvidvannindāvākyāni | (21)

अथ योऽन्यां देवतामुपास्तेऽन्योसावन्योऽहमस्मीति न स वेद

यथा पशुः॥ १॥

बृहदारण्यक १।४।१०

atha yo'nyāṁ devatāmupāste'nyosāvanyo'hamasmīti na sa veda

yathā paśuḥ || 1||

bṛhadāraṇyaka 1|4|10

अत्र भिदामित्र मन्यमानः शतधा सहस्रधा भिन्नो मृत्योः

स मृत्युमाप्नोति॥ २॥

नृसिंहतापिनी २।८।१

atra bhidāmitra manyamānaḥ śatadhā sahasradhā bhinno mṛtyoḥ

sa mṛtyumāpnoti || 2||

nṛsiṁhatāpinī 2|8|1

कर्तृत्वाद्यहङ्कारभावनारूढो मूढः॥ ३॥

निरलम्ब

kartṛtvādyahaṅkārabhāvanārūḍho mūḍhaḥ || 3||

niralamba

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥ ४॥

कठ २।१।१०

mṛtyoḥ sa mṛtyumāpnoti ya iha nāneva paśyati || 4||

kaṭha 2|1|10

अनुभूतिं विना मूढो वृथा ब्रह्मणि मोदते॥ ५॥

मैत्रेयी २।२२

anubhūtiṁ vinā mūḍho vṛthā brahmaṇi modate || 5||

maitreyī 2|22

प्रतिबिम्बितशाखाग्रफलास्वादनमोदवत्॥ ६॥

मैत्रेयी १।२२

pratibimbitaśākhāgraphalāsvādanamodavat || 6||

maitreyī 1|22

अष्टाङ्गं च चतुष्पादं त्रिस्थानं पञ्चदैवतम्॥ ७॥

ध्यानबिन्दु १३

aṣṭāṅgaṁ ca catuṣpādaṁ tristhānaṁ pañcadaivatam || 7||

dhyānabindu 13

ॐकारं यो न जानाति ब्राह्मणो न भवेत्तु सः॥ ८॥

ध्यानबिन्दु १४

omkāraṁ yo na jānāti brāhmaṇo na bhavettu saḥ || 8||

dhyānabindu 14

अतिवर्णाश्रमं रूपं सच्चिदानन्दलक्षणम्॥ ९॥

वराह २।६

ativarṇāśramaṁ rūpaṁ saccidānandalakṣaṇam || 9||

varāha 2|6

योो न जानाति सोऽविद्वान्कदा मुक्तो भविष्यति॥ १०॥

वराह २।६

yo na jānāti so'vidvānkadā mukto bhaviṣyati || 10||

varāha 2|6

कुशला ब्रह्मवार्तायां वृत्तिहीनाः सुरागिणः॥ ११॥

तारसार १।४६

kuśalā brahmavārtāyāṁ vṛttihīnāḥ surāgiṇaḥ || 11||

tārasāra 1|46

तेऽप्यज्ञानतया नूनं पुनरायान्ति यान्ति च॥ १२॥

तारसार १।४६

te'pyajñānatayā nūnaṁ punarāyānti yānti ca || 12||

tārasāra 1|46

काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः॥ १३॥

नारदपरिव्राजक ५।२

kāṣṭhadaṇḍo dhṛto yena sarvāśī jñānavarjitaḥ || 13||

nāradaparivrājaka 5|2

स्वायत्तमेकान्तहितं स्वेप्सिततत्यागवेदनम्॥ १४॥

महा ४।८९

svāyattamekāntahitaṁ svepsitatyāgavedanam || 14||

mahā 4|89

यस्य दुष्करतां यातं धिक्तं पुरुषकीटकम्॥ १५॥

महा ४।८९

yasya duṣkaratāṁ yātaṁ dhiktaṁ puruṣakīṭakam || 15||

mahā 4|89

अद्वितीयब्रह्मतत्त्वं न जानन्ति यथा तथा॥ १६॥

वराह २।५७

advitīyabrahmatattvaṁ na jānanti yathā tathā || 16||

varāha 2|57

भ्रान्ता एवाखिलास्तेषां क्व मुक्तिः क्वेह वा सुखम्॥ १७॥

वराह २।५७

bhrāntā evākhilāsteṣāṁ kva muktiḥ kveha vā sukham || 17||

varāha 2|57

अज्ञानोपहतो बाल्ये यौवने वनिताहतः॥ १८॥

महा ६।२३

ajñānopahato bālye yauvane vanitāhataḥ || 18||

mahā 6|23

शेषे कलत्रचिन्तार्तः किं करोति नराधमः॥ १९॥

महा ६।२३

śeṣe kalatracintārtaḥ kiṁ karoti narādhamaḥ || 19||

mahā 6|23

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन जन्तवः॥ २०॥

सन्न्यास २।३०

icchādveṣasamutthena dvandvamohena jantavaḥ || 20||

sannyāsa 2|30

धराविवरमग्नानां कीटानां समतां गताः॥ २१॥

सन्न्यास २।३०

dharāvivaramagnānāṁ kīṭānāṁ samatāṁ gatāḥ || 21||

sannyāsa 2|30

इति सार्धान्तिकाविद्वन्निन्दावाक्यानि एकविंशत्॥ २१॥

iti sārdhāntikāvidvannindāvākyāni ekaviṁśat || 21 ||

तृतीयं प्रकरणं समाप्तम्।

tṛtīyaṁ prakaraṇaṁ samāptam |

४ अथ सार्धान्तिकजगन्मिथ्यावाक्यानि। (३३)

4 atha sārdhāntikajaganmithyāvākyāni | (33)

नान्यत्किञ्चन मिषत्॥ १॥

ऐतरेय १

nānyatkiñcana miṣat || 1||

aitareya 1

वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्॥ २॥

छान्दोग्य ६।१।४

vācārambhaṇaṁ vikāro nāmadheyaṁ mṛttiketyeva satyam || 2||

chāndogya 6|1|4

अतोऽन्यदार्तम् न तु तद्द्वितीयमस्ति॥ ३॥

बृहदारण्यक ४।२।२३

ato'nyadārtam na tu taddvitīyamasti || 3||

bṛhadāraṇyaka 4|2|23

नात्र काचन भिदाऽस्ति॥ ४॥

नृसिंहतापिनी २।८।१

nātra kācana bhidā'sti || 4||

nṛsiṁhatāpinī 2|8|1

नैव तत्र काचन भिदाऽस्ति॥ ५॥

नृसिंहतापिनी २।१।१

naiva tatra kācana bhidā'sti || 5||

nṛsiṁhatāpinī 2|1|1

????सर्वं विकारजातं मायामात्रम्॥ ६॥ ????

????sarvaṁ vikārajātaṁ māyāmātram || 6|| ????

????

सर्वत्र न ह्यस्ति द्वैतसिद्धिः॥ ७॥

नृसिंहतापिनी २।९।१

sarvatra na hyasti dvaitasiddhiḥ || 7||

nṛsiṁhatāpinī 2|9|1

नास्ति द्वैतं कुतो मर्त्यम्॥ ८॥

सुबाल ५

nāsti dvaitaṁ kuto martyam || 8||

subāla 5

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः॥ ९॥

माण्डुक्यकारिका १।१७

prapañco yadi vidyeta nivarteta na saṁśayaḥ || 9||

māṇḍukyakārikā 1|17

मायामात्रमिदं द्वैतमद्वैतं परमार्थतः॥ १०॥

माण्डुक्यकारिका १।१७

māyāmātramidaṁ dvaitamadvaitaṁ paramārthataḥ || 10||

māṇḍukyakārikā 1|17

विकल्पो विनिवर्तेत कल्पितो यदि केनचित्॥ ११॥

माण्डुक्यकारिका १।१८

vikalpo vinivarteta kalpito yadi kenacit || 11||

māṇḍukyakārikā 1|18

उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते॥ १२॥

माण्डुक्यकारिका १।१८

upadeśādayaṁ vādo jñāte dvaitaṁ na vidyate || 12||

māṇḍukyakārikā 1|18

द्वितीयकारणाभावादनुत्पन्नमिदं जगत्॥ १३॥

महा ५।५८

dvitīyakāraṇābhāvādanutpannamidaṁ jagat || 13||

mahā 5|58

यथैवेदं नभः शून्यं जगच्छून्यं तथैव हि॥ १४॥

महा ५।१८४

yathaivedaṁ nabhaḥ śūnyaṁ jagacchūnyaṁ tathaiva hi || 14||

mahā 5|184

इदं प्रपञ्चं यत्किञ्चिद्यद्यज्जगति वीक्ष्यते॥ १५॥

तेजोबिन्दु ५।७५

idaṁ prapañcaṁ yatkiñcidyadyajjagati vīkṣyate || 15||

tejobindu 5|75

दृश्यरूपं च दृग्रूपं सर्वं शशविषाणवत्॥ १६॥

तेजोबिन्दु ५।७५

dṛśyarūpaṁ ca dṛgrūpaṁ sarvaṁ śaśaviṣāṇavat || 16||

tejobindu 5|75

इदं प्रपञ्चं नास्त्येव नोत्पन्नं नो स्थितं जगत्॥ १७॥

तेजोबिन्दु ५।३१

idaṁ prapañcaṁ nāstyeva notpannaṁ no sthitaṁ jagat || 17||

tejobindu 5|31

चित्तं प्रपञ्चमित्याहुर्नास्ति नास्त्येव सर्वदा॥ १८॥

तेजोबिन्दु ५।३२

cittaṁ prapañcamityāhurnāsti nāstyeva sarvadā || 18||

tejobindu 5|32

मायाकार्यादिकं नास्ति माया नास्ति भयं न हि॥ १९॥

तेजोबिन्दु ५।३३

māyākāryādikaṁ nāsti māyā nāsti bhayaṁ na hi || 19||

tejobindu 5|33

परं ब्रह्माहमस्मीति स्मरणस्य मनो न हि॥ २०॥

तेजोबिन्दु ५।३०

paraṁ brahmāhamasmīti smaraṇasya mano na hi || 20||

tejobindu 5|30

वन्ध्याकुमारवचने भीतिश्चेदस्त्विदं जगत्॥ २१॥

तेजोबिन्दु ६।७३

vandhyākumāravacane bhītiścedastvidaṁ jagat || 21||

tejobindu 6|73

शशशृङ्गेण नागेन्द्रो मृतश्चेज्जगदस्ति सत्॥ २२॥

तेजोबिन्दु ६।७४

śaśaśṛṅgeṇa nāgendro mṛtaścejjagadasti sat || 22||

tejobindu 6|74

मृगतृष्णाजलं पीत्वा तृप्तश्चेदस्त्विदं जगत्॥ २३॥

तेजोबिन्दु ६।७४

mṛgatṛṣṇājalaṁ pītvā tṛptaścedastvidaṁ jagat || 23||

tejobindu 6|74

गन्धर्वनगरे सत्ये जगद्भवति सर्वदा॥ २४॥

तेजोबिन्दु ६।७५

gandharvanagare satye jagadbhavati sarvadā || 24||

tejobindu 6|75

गगने नीलिमासत्ये जगत्सत्यं भविष्यति॥ २५॥

तेजोबिन्दु ६।७६

gagane nīlimāsatye jagatsatyaṁ bhaviṣyati || 25||

tejobindu 6|76

मासात्पूर्वं मृतो मर्त्यो ह्यागतश्चेज्जगद्भवेत्॥ २६॥

तेजोबिन्दु ६।८०

māsātpūrvaṁ mṛto martyo hyāgataścejjagadbhavet || 26||

tejobindu 6|80

गोस्तनादुद्भवं क्षीरं पुनरारोपणे जगत्॥ २७॥

तेजोबिन्दु ६।८१

gostanādudbhavaṁ kṣīraṁ punarāropaṇe jagat || 27||

tejobindu 6|81

ज्वालाग्निमण्डले पद्मवृद्धिश्चेदस्त्विदं जगत्॥ २८॥

तेजोबिन्दु ६।८४

jvālāgnimaṇḍale padmavṛddhiścedastvidaṁ jagat || 28||

tejobindu 6|84

ज्ञानिनो हृदयं मूढैर्ज्ञातं चेदस्त्विदं जगत्॥ २९॥

तेजोबिन्दु ६।९६

jñānino hṛdayaṁ mūḍhairjñātaṁ cedastvidaṁ jagat || 29||

tejobindu 6|96

अजकुक्षौ जगन्नास्ति ह्यात्मकुक्षौ जगन्न हि॥ ३०॥

तेजोबिन्दु ६।९९

ajakukṣau jagannāsti hyātmakukṣau jaganna hi || 30||

tejobindu 6|99

सर्वदाऽभेदकलने द्वैताद्वैतं न विद्यते॥ ३१॥

तेजोबिन्दु ६।९९

sarvadā'bhedakalane dvaitādvaitaṁ na vidyate || 31||

tejobindu 6|99

नास्ति नास्ति जगत्सर्वं गुरुशिष्यादिकं न हि॥ ३२॥

तेजोबिन्दु ५।१०५

nāsti nāsti jagatsarvaṁ guruśiṣyādikaṁ na hi || 32||

tejobindu 5|105

सच्चिदानन्दमात्रोऽहमनुत्पन्नमिदं जगत्॥ ३३॥

तेजोबिन्दु ६।५८

saccidānandamātro'hamanutpannamidaṁ jagat || 33||

tejobindu 6|58

इति जगन्मिथ्यावाक्यानि त्रयस्त्रिंशत्॥ ३३॥

चतुर्थं प्रकरणं समाप्तम्।

iti jaganmithyāvākyāni trayastriṁśat || 33||

caturthaṁ prakaraṇaṁ samāptam |

५ अथ सार्धान्तिकोपदेशवाक्यानि। (५४)

5 atha sārdhāntikopadeśavākyāni | (54)

स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो॥ १॥

छान्दोग्य ६।८।१

sa ya eṣo'ṇimaitadātmyamidaṁ sarvaṁ tatsatyaṁ sa ātmā tattvamasi śvetaketo || 1||

chāndogya 6|8|1

अभयं वै जनक प्राप्तोऽसि॥ २॥

बृहदारण्यक ४।१।४

abhayaṁ vai janaka prāpto'si || 2||

bṛhadāraṇyaka 4|1|4

ब्रह्मचर्यमहिंसां चापरिग्रहं सत्यं च यत्नेन हे रक्षतो हे रक्षतो हे रक्षत इति॥ ३॥

आरुणिक ३

brahmacaryamahiṁsāṁ cāparigrahaṁ satyaṁ ca yatnena he rakṣato he rakṣato he rakṣata iti || 3||

āruṇika 3

तत्त्वमसि त्वं तदसि॥ ४॥

पैङ्गल ३

tattvamasi tvaṁ tadasi || 4||

paiṅgala 3

यन्मनसा न मनुते येनाहुर्मनो मतम्॥ ५॥

केन १।६

yanmanasā na manute yenāhurmano matam || 5||

kena 1|6

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥ ६॥

केन १।५

tadeva brahma tvaṁ viddhi nedaṁ yadidamupāsate || 6||

kena 1|5

यत्परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत्॥ ७॥

कैवल्य १।१६

yatparaṁ brahma sarvātmā viśvasyāyatanaṁ mahat || 7||

kaivalya 1|16

सूक्ष्मात्सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत्॥ ८॥

कैवल्य १।१६

sūkṣmātsūkṣmataraṁ nityaṁ tattvameva tvameva tat || 8||

kaivalya 1|16

अन्तःपूर्णो बहिःपूर्णः पूर्णकुम्भ इवार्णवे॥ ९॥

मैत्रेयी २।२७

antaḥpūrṇo bahiḥpūrṇaḥ pūrṇakumbha ivārṇave || 9||

maitreyī 2|27

अन्तःशून्यो बहिःशून्यः शून्यकुम्भ इवाम्बरे॥ १०॥

मैत्रेयी २।२७

antaḥśūnyo bahiḥśūnyaḥ śūnyakumbha ivāmbare || 10||

maitreyī 2|27

मा भवग्राह्यभावात्मा ग्राहकात्मा च मा भव॥ ११॥

मैत्रेयी २।२८

mā bhavagrāhyabhāvātmā grāhakātmā ca mā bhava || 11||

maitreyī 2|28

भावनामखिलां त्यक्त्वा यच्छिष्टं तन्मयो भव॥ १२॥

वराह ४।१९

bhāvanāmakhilāṁ tyaktvā yacchiṣṭaṁ tanmayo bhava || 12||

varāha 4|19

द्रष्टृदर्शनदृश्यादि त्यक्त्वा वासनया सह॥ १३॥

महा ६।१८

draṣṭṛdarśanadṛśyādi tyaktvā vāsanayā saha || 13||

mahā 6|18

दर्शनप्रथमाभासमात्मानं केवलं भज॥ १४॥

मैत्रेयी २।२९

darśanaprathamābhāsamātmānaṁ kevalaṁ bhaja || 14||

maitreyī 2|29

चित्ताकाशं चिदाकाशमाकाशश्च तृतीयकम्॥ १५॥

महा ४।५८

cittākāśaṁ cidākāśamākāśaśca tṛtīyakam || 15||

mahā 4|58

द्वाभ्यां शून्यतरं विद्धि चिदाकाशं महामुने॥ १६॥

महा ४।५८

dvābhyāṁ śūnyataraṁ viddhi cidākāśaṁ mahāmune || 16||

mahā 4|58

ध्यानतो हृदयाकाशे चिति चिच्चक्रधारया॥ १७॥

महा ४।९३

dhyānato hṛdayākāśe citi ciccakradhārayā || 17||

mahā 4|93

मनो मारय निःशङ्कं त्वां प्रबध्नन्ति नारयः॥ १८॥

महा ४।९४

mano māraya niḥśaṅkaṁ tvāṁ prabadhnanti nārayaḥ || 18||

mahā 4|94

भोगैकवासनां त्यक्त्वा त्यज त्वं भेदवासनाम्॥ १९॥

महा ४।१०९

bhogaikavāsanāṁ tyaktvā tyaja tvaṁ bhedavāsanām || 19||

mahā 4|109

भावाभावौ ततस्त्यक्त्वा निर्विकल्पः स्थिरो भव॥ २०॥

महा ४।१०९

bhāvābhāvau tatastyaktvā nirvikalpaḥ sthiro bhava || 20||

mahā 4|109

त्यज धर्ममधर्मं च उभे सत्यानृते त्यज॥ २१॥

सन्न्यास २।१२

tyaja dharmamadharmaṁ ca ubhe satyānṛte tyaja || 21||

sannyāsa 2|12

उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज॥ २२॥

सन्न्यास २।१२

ubhe satyānṛte tyaktvā yena tyajasi tattyaja || 22||

sannyāsa 2|12

आत्मन्यतीते सर्वस्मात्सर्वरूपेऽथवा तते॥ २३॥

अन्नपूर्णा २।२५

ātmanyatīte sarvasmātsarvarūpe'thavā tate || 23||

annapūrṇā 2|25

को बन्धः कस्य वा मोक्षो निर्मूलं मननं कुरु॥ २४॥

अन्नपूर्णा २।२५

ko bandhaḥ kasya vā mokṣo nirmūlaṁ mananaṁ kuru || 24||

annapūrṇā 2|25

आशा यातु निराशात्वमभावं यातु भावना॥ २५॥

अन्नपूर्णा ५।३८

āśā yātu nirāśātvamabhāvaṁ yātu bhāvanā || 25||

annapūrṇā 5|38

अमनस्त्वं मनो यातु तवासङ्गेन जीवतः॥ २६॥

अन्नपूर्णा ५।३८

amanastvaṁ mano yātu tavāsaṅgena jīvataḥ || 26||

annapūrṇā 5|38

एकमाद्यन्तरहितं चिन्मात्रममलं ततम्॥ २७॥

अन्नपूर्णा ५।६५

ekamādyantarahitaṁ cinmātramamalaṁ tatam || 27||

annapūrṇā 5|65

खादप्यतितरां सूक्ष्मं तद्ब्रह्मासि न संशयः॥ २८॥

अन्नपूर्णा ५।६५

khādapyatitarāṁ sūkṣmaṁ tadbrahmāsi na saṁśayaḥ || 28||

annapūrṇā 5|65

रक्षको विष्णुरित्यादि ब्रह्मा सृष्टेस्तु कारणम्॥ २९॥

तेजोबिन्दु ५।५१

rakṣako viṣṇurityādi brahmā sṛṣṭestu kāraṇam || 29||

tejobindu 5|51

संहारे रुद्र इत्येवं सर्वं मिथ्येति निश्चिनु॥ ३०॥

तेजोबिन्दु ५।५२

saṁhāre rudra ityevaṁ sarvaṁ mithyeti niścinu || 30||

tejobindu 5|52

मत्त्यक्तं नास्ति किञ्चिद्वा मत्त्यक्ता पृथिवी तु वा॥ ३१॥

तेजोबिन्दु ३।१९

mattyaktaṁ nāsti kiñcidvā mattyaktā pṛthivī tu vā || 31||

tejobindu 3|19

मयातिरिक्तं यद्यद्वा तत्तन्नास्तीति निश्चिनु॥ ३२॥

तेजोबिन्दु ३।२०

mayātiriktaṁ yadyadvā tattannāstīti niścinu || 32||

tejobindu 3|20

अनात्मेति प्रसङ्गो वा अनात्मेति मनोऽपि वा॥ ३३॥

तेजोबिन्दु ५।१५

anātmeti prasaṅgo vā anātmeti mano'pi vā || 33||

tejobindu 5|15

अनात्मेति जगद्वापि नास्त्यनात्मेति निश्चिनु॥ ३४॥

तेजोबिन्दु ५।१६

anātmeti jagadvāpi nāstyanātmeti niścinu || 34||

tejobindu 5|16

आदिमध्यायसानेषु दुःखं सर्वमिदं यतः॥ ३५॥

अक्षि ४७

ādimadhyāyasāneṣu duḥkhaṁ sarvamidaṁ yataḥ || 35||

akṣi 47

तस्मात्सर्वं परित्यज्य तत्त्वनिष्ठो भवानघ॥ ३६॥

अक्षि ४७

tasmātsarvaṁ parityajya tattvaniṣṭho bhavānagha || 36||

akṣi 47

निद्राया लोकवार्तायाः शब्दादेरात्मविस्मृतेः॥ ३७॥

अध्यात्म ५

nidrāyā lokavārtāyāḥ śabdāderātmavismṛteḥ || 37||

adhyātma 5

क्वचिन्नावसरं दत्त्वा चिन्तयात्मानमात्मनि॥ ३८॥

अध्यात्म ५

kvacinnāvasaraṁ dattvā cintayātmānamātmani || 38||

adhyātma 5

सर्वव्यापारमुत्सृज्य अहं ब्रह्मेति भावय॥ ३९॥

तेजोबिन्दु ६।१०६

sarvavyāpāramutsṛjya ahaṁ brahmeti bhāvaya || 39||

tejobindu 6|106

अहं ब्रह्मेति निश्चित्य त्वहंभावं परित्यज॥ ४०॥

तेजोबिन्दु ६।१०४

ahaṁ brahmeti niścitya tvahaṁbhāvaṁ parityaja || 40||

tejobindu 6|104

घटाकाशं महाकाश इवात्मानं परात्मनि॥ ४१॥

अध्यात्म ७

ghaṭākāśaṁ mahākāśa ivātmānaṁ parātmani || 41||

adhyātma 7

विलाप्याखण्डभावेन तूष्णीं भव सदा मुने॥ ४२॥

अध्यात्म ७

vilāpyākhaṇḍabhāvena tūṣṇīṁ bhava sadā mune || 42||

adhyātma 7

चिदिहास्तीति चिन्मात्रमिदं चिन्मयमेव च॥ ४३॥

याज्ञवल्क्य २३

cidihāstīti cinmātramidaṁ cinmayameva ca || 43||

yājñavalkya 23

चित्त्वं चिदहमेते च लोकाश्चिदिति भावय॥ ४४॥

याज्ञवल्क्य २३

cittvaṁ cidahamete ca lokāściditi bhāvaya || 44||

yājñavalkya 23

सत्यचिद्घनमखण्डमद्वयं सर्वदृश्यरहितं निरामयम्॥ ४५॥

वराह ३।६

satyacidghanamakhaṇḍamadvayaṁ sarvadṛśyarahitaṁ nirāmayam || 45||

varāha 3|6

यत्पदं विमलमद्वयं शिवं तत्सदाहमिति मौनमाश्रय॥ ४६॥

वराह ३।६

yatpadaṁ vimalamadvayaṁ śivaṁ tatsadāhamiti maunamāśraya || 46||

varāha 3|6

जन्ममृत्युसुखदुःखवर्जितं जातिनीतिकुलगोत्रदूरगम्॥ ४७॥

वराह ३।७

janmamṛtyusukhaduḥkhavarjitaṁ jātinītikulagotradūragam || 47||

varāha 3|7

चिद्विवर्तजगतोऽस्य कारणं तत्सदाहमिति मौनमाश्रय॥ ४८॥

वराह ३।७

cidvivartajagato'sya kāraṇaṁ tatsadāhamiti maunamāśraya || 48||

varāha 3|7

पूर्णमद्वयमखण्डचेतनं विश्वभेदकलनादिवर्जितम्॥ ४९॥

वराह ३।८

pūrṇamadvayamakhaṇḍacetanaṁ viśvabhedakalanādivarjitam || 49||

varāha 3|8

अद्वितीयपरसंविदात्मकं तत्सदाहमिति मौनमाश्रय॥ ५०॥

वराह ३।८

advitīyaparasaṁvidātmakaṁ tatsadāhamiti maunamāśraya || 50||

varāha 3|8

स्वात्मनोऽन्यदिवाभातं चराचरमिदं जगत्॥ ५१॥

वराह २।२५

svātmano'nyadivābhātaṁ carācaramidaṁ jagat || 51||

varāha 2|25

स्वात्ममात्रतया बुद्ध्वा तदस्मीति विभावय॥ ५२॥

वराह २।२५

svātmamātratayā buddhvā tadasmīti vibhāvaya || 52||

varāha 2|25

विलाप्य विकृतिं कृत्स्नां सम्भवव्यत्ययक्रमात्॥ ५३॥

मुक्तिका २।५०

vilāpya vikṛtiṁ kṛtsnāṁ sambhavavyatyayakramāt || 53||

muktikā 2|50

यशोऽरिष्टं च चिन्मात्रं चिदानन्दं विचिन्तय॥ ५४॥

मुक्तिका २।५०

yaśo'riṣṭaṁ ca cinmātraṁ cidānandaṁ vicintaya || 54||

muktikā 2|50

इति सार्धान्तिकोपदेशवाक्यानि चतुःपञ्चाशत्॥ ५४॥

पञ्चमं प्रकरणं समाप्तम्।

iti sārdhāntikopadeśavākyāni catuḥpañcāśat || 54||

pañcamaṁ prakaraṇaṁ samāptam |

६ अथ सार्धान्तिकजीवब्रह्मैक्यवाक्यानि। (३८)

6 atha sārdhāntikajīvabrahmaikyavākyāni | (38)

स यश्चायं पुरुषे॥ १॥

तैत्तिरीय २।८।३

sa yaścāyaṁ puruṣe || 1||

taittirīya 2|8|3

यश्चासावादित्ये॥ २॥

तैत्तिरीय २।८।३

yaścāsāvāditye || 2||

taittirīya 2|8|3

स एकः॥ ३॥

तैत्तिरीय २।८।३

sa ekaḥ || 3||

taittirīya 2|8|3

सत्यमात्मा ब्रह्मैव ब्रह्मात्मैवात्र ह्येव न विचिकित्स्यम्॥ ४॥

नृसिंहतापिनी २।९।१

satyamātmā brahmaiva brahmātmaivātra hyeva na vicikitsyam || 4||

nṛsiṁhatāpinī 2|9|1

त्वं ब्रह्मासि॥ ५॥

तेजोबिन्दु ५।५९

tvaṁ brahmāsi || 5||

tejobindu 5|59

अहं ब्रह्मास्मि॥ ६॥

बृहदारण्यक १।४।१०

ahaṁ brahmāsmi || 6||

bṛhadāraṇyaka 1|4|10

आवयोरन्तरं न विद्यते त्वमेवाहमहमेव त्वम्॥७॥

त्रिपाद्विभूतिमहानारायण ६

āvayorantaraṁ na vidyate tvamevāhamahameva tvam ||7||

tripādvibhūtimahānārāyaṇa 6

गताः कलाः पञ्चदशप्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु॥ ८॥

मुण्डक ३।२।७

gatāḥ kalāḥ pañcadaśapratiṣṭhā devāśca sarve pratidevatāsu || 8||

muṇḍaka 3|2|7

कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति॥ ९॥

मुण्डक ३।२।७

karmāṇi vijñānamayaśca ātmā pare'vyaye sarva ekībhavanti || 9||

muṇḍaka 3|2|7

येनेयते शृणोतीदं जिघ्रति व्याकरोति च॥ १०॥

शुकरहस्य ३।१

yeneyate śṛṇotīdaṁ jighrati vyākaroti ca || 10||

śukarahasya 3|1

स्वाद्वस्वादु विजानाति तत्प्रज्ञानमुदीरितम्॥ ११॥

शुकरहस्य ३।१

svādvasvādu vijānāti tatprajñānamudīritam || 11||

śukarahasya 3|1

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु॥ १२॥

शुकरहस्य ३।२

caturmukhendradeveṣu manuṣyāśvagavādiṣu || 12||

śukarahasya 3|2

चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि॥ १३॥

शुकरहस्य ३।२

caitanyamekaṁ brahmātaḥ prajñānaṁ brahma mayyapi || 13||

śukarahasya 3|2

परिपूर्णः परात्मास्मिन्देहे विद्याधिकारिणि॥ १४॥

शुकरहस्य ३।३

paripūrṇaḥ parātmāsmindehe vidyādhikāriṇi || 14||

śukarahasya 3|3

बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते॥ १५॥

शुकरहस्य ३।३

buddheḥ sākṣitayā sthitvā sphurannahamitīryate || 15||

śukarahasya 3|3

स्वतः पूर्णः परात्मात्र ब्रह्मशब्देन वर्णितः॥ १६॥

शुकरहस्य ३।४

svataḥ pūrṇaḥ parātmātra brahmaśabdena varṇitaḥ || 16||

śukarahasya 3|4

अस्मीत्यैक्यपरामर्शात्तेन ब्रह्म भवाम्यहम्॥ १७॥

शुकरहस्य ३।४

asmītyaikyaparāmarśāttena brahma bhavāmyaham || 17||

śukarahasya 3|4

एकमेवाद्वितीयं सन्नामरूपविवर्जितम्॥ १८॥

शुकरहस्य ३।५

ekamevādvitīyaṁ sannāmarūpavivarjitam || 18||

śukarahasya 3|5

सृष्टेः पुराधुनाप्यस्य तादृक् त्वं तदितीर्यते॥ १९॥

शुकरहस्य ३।५

sṛṣṭeḥ purādhunāpyasya tādṛk tvaṁ taditīryate || 19||

śukarahasya 3|5

श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम्॥ २०॥

शुकरहस्य ३।६

śroturdehendriyātītaṁ vastvatra tvaṁpaderitam || 20||

śukarahasya 3|6

एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम्॥ २१॥

शुकरहस्य ३।६

ekatā grāhyate'sīti tadaikyamanubhūyatām || 21||

śukarahasya 3|6

स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतम्॥ २२॥

शुकरहस्य ३।७

svaprakāśāparokṣatvamayamityuktito matam || 22||

śukarahasya 3|7

अहङ्कारादिदेहान्तात्प्रत्यगात्मेति गीयते॥ २३॥

शुकरहस्य ३।७

ahaṅkārādidehāntātpratyagātmeti gīyate || 23||

śukarahasya 3|7

दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते॥ २४॥

शुकरहस्य ३।८

dṛśyamānasya sarvasya jagatastattvamīryate || 24||

śukarahasya 3|8

ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम्॥ २५॥

शुकरहस्य ३।८

brahmaśabdena tadbrahma svaprakāśātmarūpakam || 25||

śukarahasya 3|8

मायाविद्ये विहायैव उपाधी परजीवयोः॥ २६॥

अध्यात्म ३२

māyāvidye vihāyaiva upādhī parajīvayoḥ || 26||

adhyātma 32

अखण्डं सच्चिदानन्दं परं ब्रह्म विलक्ष्यते॥ २७॥

अध्यात्म ३२

akhaṇḍaṁ saccidānandaṁ paraṁ brahma vilakṣyate || 27||

adhyātma 32

सकारः खेचरीप्रोक्तस्त्वंपदं चेति निश्चितम्॥ २८॥

योगचूडामणि ८२

sakāraḥ khecarīproktastvaṁpadaṁ ceti niścitam || 28||

yogacūḍāmaṇi 82

हकारः परमेशः स्यात्तत्पदं चेति निश्चितम्॥ २९॥

योगचूडामणि ८३

hakāraḥ parameśaḥ syāttatpadaṁ ceti niścitam || 29||

yogacūḍāmaṇi 83

सकारो ध्यायते जन्तुर्हकारो हि भवेद्ध्रुवम्॥ ३०॥

योगचूडामणि ८३

sakāro dhyāyate janturhakāro hi bhaveddhruvam || 30||

yogacūḍāmaṇi 83

आद्यो रा तत्पदार्थः स्यान्मकारस्त्वंपदार्थवान्॥ ३१॥

रामरहस्य ५।१२

ādyo rā tatpadārthaḥ syānmakārastvaṁpadārthavān || 31||

rāmarahasya 5|12

तयोः संयोजनमसीत्यर्थे तत्त्वविदो विदुः॥ ३२॥

रामरहस्य ५।१३

tayoḥ saṁyojanamasītyarthe tattvavido viduḥ || 32||

rāmarahasya 5|13

नमस्त्वमर्थी विज्ञेयो रामस्तत्पदमुच्यते॥ ३३॥

रामरहस्य ५।१३

namastvamarthī vijñeyo rāmastatpadamucyate || 33||

rāmarahasya 5|13

असीत्यर्थे चतुर्थी स्यादेवं मन्त्रेषु योजयेत्॥ ३४॥

रामरहस्य ५।१४

asītyarthe caturthī syādevaṁ mantreṣu yojayet || 34||

rāmarahasya 5|14

क्षीरं क्षीरे यथा क्षिप्तं तैलं तैले जलं जले॥ ३५॥

आत्म २३

kṣīraṁ kṣīre yathā kṣiptaṁ tailaṁ taile jalaṁ jale || 35||

ātma 23

संयुक्तमेकतां याति तथात्मन्यात्मविन्मुनिः॥ ३६॥

आत्म २४

saṁyuktamekatāṁ yāti tathātmanyātmavinmuniḥ || 36||

ātma 24

घटे नष्टे यथा व्योम व्योमैव भवति स्वयम्॥ ३७॥

आत्म २२

ghaṭe naṣṭe yathā vyoma vyomaiva bhavati svayam || 37||

ātma 22

तथैवोपाधिविलये ब्रह्मैव ब्रह्मवित्स्वयम्॥ ३८॥

आत्म २३

tathaivopādhivilaye brahmaiva brahmavitsvayam || 38||

ātma 23

इति सार्धान्तिकजीवब्रह्मैक्यवाक्यान्यष्टत्रिंशत्॥ ३८॥

षष्ठं प्रकरणं समाप्तम्।

iti sārdhāntikajīvabrahmaikyavākyānyaṣṭatriṁśat || 38||

ṣaṣṭhaṁ prakaraṇaṁ samāptam |

७ अथ सार्धान्तिकमननवाक्यानि। (३९)

7 atha sārdhāntikamananavākyāni | (39)

अहमन्नमहमन्नमहमन्नम्॥ १॥

तैत्तिरीय ३।१०।६

ahamannamahamannamahamannam || 1||

taittirīya 3|10|6

अहमन्नादो३ऽहमन्नादो३ऽहमन्नादः॥ २॥

तैत्तिरीय ३।१०।६

ahamannādo3'hamannādo3'hamannādaḥ || 2||

taittirīya 3|10|6

अहं मनुरभवं सूर्यश्च॥ ३॥

बृहदारण्यक १।४।१०

ahaṁ manurabhavaṁ sūryaśca || 3||

bṛhadāraṇyaka 1|4|10

अहमेवेदं सर्वमसानि॥ ४॥

छान्दोग्य ५।२।६

ahamevedaṁ sarvamasāni || 4||

chāndogya 5|2|6

यथा फेनतरङ्गादि समुद्रादुत्थितं पुनः॥

जाबालदर्शन ५।१०।६

yathā phenataraṅgādi samudrādutthitaṁ punaḥ ||

jābāladarśana 5|10|6

समुद्रे लीयते तद्वज्जगन्मय्यनुलीयते॥ ६॥

जाबालदर्शन ५।१०।७

samudre līyate tadvajjaganmayyanulīyate || 6||

jābāladarśana 5|10|7

अनात्मदृष्टेरविवेकनिद्रामहंममस्वप्नगतिं गतोऽहम्॥ ७॥

शुकरहस्य ३।९

anātmadṛṣṭeravivekanidrāmahaṁmamasvapnagatiṁ gato'ham || 7||

śukarahasya 3|9

स्वरूपसूर्येऽभ्युदिते स्फुटोक्तैर्गुरोर्महावाक्यपदैः प्रबुद्धः॥ ८॥

शुकरहस्य ३।९

svarūpasūrye'bhyudite sphuṭoktairgurormahāvākyapadaiḥ prabuddhaḥ || 8||

śukarahasya 3|9

प्राणाश्चलन्तु तद्धर्मैः कामैर्वा हन्यतां मनः॥ ९॥

आत्मबोध २०

prāṇāścalantu taddharmaiḥ kāmairvā hanyatāṁ manaḥ || 9||

ātmabodha 20

आनन्दबुद्धिपूर्णस्य मम दुःखं कथं भवेत्॥ १०॥

आत्मबोध २०

ānandabuddhipūrṇasya mama duḥkhaṁ kathaṁ bhavet || 10||

ātmabodha 20

न मे बन्धो न मे मुक्तिर्न मे शास्त्रं न मे गुरुः॥ ११॥

आत्मबोध १९

na me bandho na me muktirna me śāstraṁ na me guruḥ || 11||

ātmabodha 19

मायामात्रविकासत्वान्मायातीतोऽहमद्वयः॥ १२॥

आत्मबोध १९

māyāmātravikāsatvānmāyātīto'hamadvayaḥ || 12||

ātmabodha 19

आत्मानमञ्जसा वेद्मि क्वाप्यज्ञानं पलायितम्॥ १३॥

आत्मबोध २१

ātmānamañjasā vedmi kvāpyajñānaṁ palāyitam || 13||

ātmabodha 21

कर्तृत्वमपि मे नष्टं कर्तव्यं वापि न क्वचित्॥ १४॥

आत्मबोध २१

kartṛtvamapi me naṣṭaṁ kartavyaṁ vāpi na kvacit || 14||

ātmabodha 21

ब्राह्मण्यं कुलगोत्रे च नामसौन्दर्यजातयः॥ १५॥

आत्मबोध २२

brāhmaṇyaṁ kulagotre ca nāmasaundaryajātayaḥ || 15||

ātmabodha 22

स्थूलदेहगता ह्येते स्थूलाद्भिन्नस्य मे न हि॥ १६॥

आत्मबोध २२

sthūladehagatā hyete sthūlādbhinnasya me na hi || 16||

ātmabodha 22

क्षुत्पिपासान्ध्यबाधिर्यकामक्रोधादयोऽखिलाः॥ १७॥

आत्मबोध २३

kṣutpipāsāndhyabādhiryakāmakrodhādayo'khilāḥ || 17||

ātmabodha 23

लिङ्गदेहगता ह्येते ह्यलिङ्गस्य न विद्यते॥ १८॥

आत्मबोध २३

liṅgadehagatā hyete hyaliṅgasya na vidyate || 18||

ātmabodha 23

जडत्वप्रियमोदत्वधर्माः कारणदेहगाः॥ १९॥

आत्मबोध २४

jaḍatvapriyamodatvadharmāḥ kāraṇadehagāḥ || 19||

ātmabodha 24

न सन्ति मम नित्यस्य निर्विकारस्वरूपिणः॥ २०॥

आत्मबोध २४

na santi mama nityasya nirvikārasvarūpiṇaḥ || 20||

ātmabodha 24

चिद्रूपत्वान्न मे जाड्यं सत्यत्वान्नानृतं मम॥ २१॥

आत्मबोध ३०

cidrūpatvānna me jāḍyaṁ satyatvānnānṛtaṁ mama || 21||

ātmabodha 30

आनन्दत्वान्न मे दुःखमज्ञानाद्भाति सत्यवत्॥ २२॥

आत्मबोध ३०

ānandatvānna me duḥkhamajñānādbhāti satyavat || 22||

ātmabodha 30

नाहं देहो जन्ममृत्यू कुतो मे नाहं प्राणः क्षुत्पिपासे कुतो मे॥ २३॥

सर्वसार ६

nāhaṁ deho janmamṛtyū kuto me nāhaṁ prāṇaḥ kṣutpipāse kuto me || 23||

sarvasāra 6

नाहं चेतः शोकमोहौ कुतो मे नाहं कर्ता बन्धमोक्षौ कुतो मे॥ २४॥

सर्वसार ६

nāhaṁ cetaḥ śokamohau kuto me nāhaṁ kartā bandhamokṣau kuto me || 24||

sarvasāra 6

आनन्दमन्तर्निजमाश्रयन्तमाशापिशाचीमवमानयन्तम्॥ २५॥

मैत्रेयी १।१२

ānandamantarnijamāśrayantamāśāpiśācīmavamānayantam || 25||

maitreyī 1|12

आलोकयन्तं जगदिन्द्रजालमापत्कथं मां प्रविशेदसङ्गम्॥ २६॥

मैत्रेयी १।१२

ālokayantaṁ jagadindrajālamāpatkathaṁ māṁ praviśedasaṅgam || 26||

maitreyī 1|12

देवार्चनस्नानशौचभिक्षादौ वर्ततां वपुः॥ २७॥

आरुणिक २४

devārcanasnānaśaucabhikṣādau vartatāṁ vapuḥ || 27||

āruṇika 24

तारं जपतु वाक् तद्वत्पठत्वाम्नायमस्तकम्॥ २८॥

आरुणिक २४

tāraṁ japatu vāk tadvatpaṭhatvāmnāyamastakam || 28||

āruṇika 24

विष्णुं ध्यायेत धीर्यद्वा ब्रह्मानन्दे विलीयताम्॥ २९॥

आरुणिक २५

viṣṇuṁ dhyāyeta dhīryadvā brahmānande vilīyatām || 29||

āruṇika 25

साक्ष्यहं किञ्चिदप्यत्र न कुर्वे नापि कारये॥ ३०॥

आरुणिक २५

sākṣyahaṁ kiñcidapyatra na kurve nāpi kāraye || 30||

āruṇika 25

ज्ञातं ज्ञातव्यमधुना दृष्टं द्रष्टव्यमद्भुतम्॥ ३१॥

महा ५।५८

jñātaṁ jñātavyamadhunā dṛṣṭaṁ draṣṭavyamadbhutam || 31||

mahā 5|58

विश्रान्तोऽस्मि चिरं श्रान्तश्चिन्मात्रान्नास्ति किञ्चन॥ ३२॥

महा ५।५९

viśrānto'smi ciraṁ śrāntaścinmātrānnāsti kiñcana || 32||

mahā 5|59

न भूतं न भविष्यं च चिन्तयामि कदाचन॥ ३३॥

अन्नपूर्णा ५।५७

na bhūtaṁ na bhaviṣyaṁ ca cintayāmi kadācana || 33||

annapūrṇā 5|57

न स्तौमि न च निन्दामि ह्यात्मनोऽन्यन्नहि क्वचित्॥ ३४॥

अन्नपूर्णा ५।५९

na staumi na ca nindāmi hyātmano'nyannahi kvacit || 34||

annapūrṇā 5|59

अलेपकोऽहमजरो नीरागः शान्तवासनः॥ ३५॥

अन्नपूर्णा ५।९२

alepako'hamajaro nīrāgaḥ śāntavāsanaḥ || 35||

annapūrṇā 5|92

स्वपूर्णात्मातिरेकेण जगज्जीवेश्वरादयः॥ ३६॥

वराह २।११

svapūrṇātmātirekeṇa jagajjīveśvarādayaḥ || 36||

varāha 2|11

न सन्ति नास्ति माया च तेभ्यश्चाहं विलक्षणः॥ ३७॥

वराह २।११

na santi nāsti māyā ca tebhyaścāhaṁ vilakṣaṇaḥ || 37||

varāha 2|11

किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम्॥ ३८॥

२।३५

kiṁ karomi kva gacchāmi kiṁ gṛhṇāmi tyajāmi kim || 38||

2|35

यन्मया पूरितं विश्वं महाकल्पाम्बुना यथा॥ ३९॥

वराह २।३५

yanmayā pūritaṁ viśvaṁ mahākalpāmbunā yathā || 39||

varāha 2|35

इति सार्धान्तिकमननवाक्यान्येकोनचत्वारिंशत्॥ ३९॥
सप्तमं प्रकरणं समाप्तम्।

iti sārdhāntikamananavākyānyekonacatvāriṁśat || 39||
saptamaṁ prakaraṇaṁ samāptam |

८ अथ सार्धान्तिकजीवन्मुक्तिवाक्यानि। (११९)

8 atha sārdhāntikajīvanmuktivākyāni | (119)

स तत्र पर्येति जक्षत्क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा
ज्ञातिभिर्वा वयस्यैर्वा नोपजनं स्मरन्निदं शरीरम्॥
छान्दोग्य ८।१२।३

sa tatra paryeti jakṣatkrīḍan ramamāṇaḥ strībhirvā yānairvā
jñātibhirvā vayasyairvā nopajanaṁ smarannidaṁ śarīram ||
chāndogya 8|12|3

स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरति-
रात्मक्रीडः आत्ममिथुन आत्मानन्दः स्वराड् भवति॥ २॥
छान्दोग्य ७।१५।४

sa vā eṣa evaṁ paśyannevaṁ manvāna evaṁ vijānannātmarati-
rātmakrīḍaḥ ātmamithuna ātmānandaḥ svarāḍ bhavati || 2||
chāndogya 7|15|4

ते देवाः पुत्रेषणायाश्च वित्तेषणायाश्च लोकेषणायाश्च
ससाधनेभ्यो व्युत्थाय निरागारा निष्परिग्रहा अशिखा अयज्ञोपवीता
अन्धा बधिरा मुग्धाः क्लीबा मूका उन्मत्ता इव परिवर्तमानाः शान्ता
दान्ता उपरतास्तितिक्षवः। समाहिता आत्मरतय आत्मक्रीडा आत्ममिथुना

आत्मानन्दाः प्रणवमेव परं ब्रह्मात्मप्रकाशं शून्यं
जानन्तस्तत्रैव परिसमाप्ताः॥ ३॥

नृसिंहतापिनी २।६

te devāḥ putreṣaṇāyāśca vitteṣaṇāyāśca lokeṣaṇāyāśca
sasādhanebhyo vyutthāya nirāgārā niṣparigrahā aśikhā
ayajñopavītā
andhā badhirā mugdhāḥ klībā mūkā unmattā iva parivartamānāḥ
śāntā
dāntā uparatāstitikṣavaḥ | samāhitā ātmaratayа ātmakrīḍā
ātmamithunā
ātmānandāḥ praṇavameva paraṁ brahmātmaprakāśaṁ śūnyaṁ
jānantastatraiva parisamāptāḥ || 3||

nṛsiṁhatāpinī 2|6

कुचेलोऽसहाय एकाकी समाधिस्थ आत्मकाम आप्तकामो निष्कामो
जीर्णकामो हस्तिनि सिंहे दंशे मशके नकुले सपराक्षसगन्धर्वेषु
मृत्यो रूपाणि विदित्वा न बिभेति कुतश्चनेति॥ ४॥

सुबाल १३

kucelo'sahāya ekākī samādhistha ātmakāma āptakāmo niṣkāmo
jīrṇakāmo hastini siṁhe daṁśe maśake nakule
saparākṣasagandharveṣu
mṛtyo rūpāṇi viditvā na bibheti kutaścaneti || 4||

subāla 13

सर्वधर्मान् परित्यज्य निर्ममो निरहङ्कारो भूत्वा ब्रह्मिष्ठं
शरणमुपगम्यतत्त्वमसि सर्वं खल्विदं ब्रह्म नेह नानास्ति
किञ्चनेत्यादि महावाक्यार्थानुभवज्ञानाद्ब्रह्मैवाहमस्मीति निश्चित्य
निर्विकल्पसमाधिना स्वतन्त्रो यतिश्चरति स संन्यासी स मुक्तः स पूज्यः
स योगी स परमहंसः सोऽवधूतः स ब्राह्मण इति॥ ५॥

निरलम्ब

sarvadharmān parityajya nirmamo nirahaṅkāro bhūtvā
brahmiṣṭhaṁ
śaraṇamupagamyatattvamasi sarvaṁ khalvidaṁ brahma neha
nānāsti
kiñcanetyādi mahāvākyārthānubhavajñānādbrahmaivāhamasmīti
niścitya
nirvikalpasamādhinā svatantro yatiścarati sa saṁnyāsī sa muktaḥ
sa pūjyaḥ
sa yogī sa paramahaṁsaḥ so'vadhūtaḥ sa brāhmaṇa iti || 5||

niralamba

जीवः पञ्चविंशकः स्वकल्पितचतुर्विंशतितत्त्वं परित्यज्य
षड्विंशकपरमात्माहमिति निश्चयाज्जीवन्मुक्तो भवति॥ ६॥

मण्डलब्राह्मण १।४

jīvaḥ pañcaviṁśakaḥ svakalpitacaturviṁśatitattvaṁ parityajya
ṣaḍviṁśakaparamātmāhamiti niścayājjīvanmukto bhavati ||
6||

maṇḍalabrāhmaṇa 1|4

तुरीयमक्षरमिति ज्ञात्वा जागरिते सुषुप्त्यवस्थापन्न इव यद्यच्छ्रुतं
यद्यद्दृष्टं तत्सर्वमविज्ञातमिव यो वसेत्तस्य स्वप्नावस्थायामपि
तादृगवस्था भवति स जीवन्मुक्तो भवति॥ ७॥

नारदपरिव्राजक ५।

turīyamakṣaramiti jñātvā jāgarite suṣuptyavasthāpanna iva
yadyacchrutaṁ
yadyaddṛṣṭaṁ tatsarvamavijñātamiva yo vasettasya
svapnāvasthāyāmapi

tādṛgavasthā bhavati sa jīvanmukto bhavati || 7||

nāradaparivrājaka 5|

सकृद्विभातसदानन्दानुभवैकगोचरो ब्रह्मविद्विद्वांश्चक्षुरादि
बाह्यप्रपञ्चोपरतः सर्वं जगदात्मत्वेन पश्यन्नात्मेति भावयन्
कृतकृत्यो भवति॥ ८॥

मण्डलब्राह्मण २।३

sakṛdvibhātasadānandānubhavaikagocaro
brahmavidvidvāṁścakṣurādi
bāhyaprapañcoparataḥ sarvaṁ jagadātmatvena paśyannātmeti bhāvayan
kṛtakṛtyo bhavati || 8||

maṇḍalabrāhmaṇa 2|3

निर्द्वन्द्वः सदाऽचञ्चलगात्रः परमशान्तिं स्वीकृत्य नित्यशुद्धः
परमात्माहमेवेत्यखण्डानन्दः पूर्णः कृतार्थः परिपूर्णपरमाकाशमग्नमनाः
प्राप्तोन्मन्यवस्थः सन्न्यस्तसर्वेन्द्रियवर्गोऽनेकजन्मार्जितपुण्यपुञ्जपरिपक्व-
कैवल्यफलोऽखण्डानन्दनिरस्तसर्वक्लेशकश्मलो ब्रह्माहमस्मीति कृतकृत्यो भवति॥ ९॥

मण्डलब्राह्मण ३।१

nirdvandvaḥ sadā'cañcalagātraḥ paramaśāntiṁ svīkṛtya nityaśuddhaḥ
paramātmāhamevetyakhaṇḍānandaḥ pūrṇaḥ kṛtārthaḥ
paripūrṇaparamākāśamagnamanāḥ
prāptonmanyavasthaḥ
sannyastasarvendriyavargo'nekajanmārjitapuṇyapuñjaparipakva-
kaivalyaphalo'khaṇḍānandanirastasarvakleśakaśmalo
brahmāhamasmīti kṛtakṛtyo bhavati || 9||

maṇḍalabrāhmaṇa 3|1

ब्रह्मैवाहमस्मीत्यनवरतं ब्रह्मप्रणवानुसन्धानेन यः कृतकृत्यो
भवति स परमहंसपरिव्राट्॥ १०॥

परमहंसपरिव्राजक

brahmaivāhamasmītyanavaratam̐ brahmapraṇavānusandhānena yaḥ kṛtakṛtyo
bhavati sa paramaham̐saparivrāṭ || 10||

paramaham̐saparivrājaka

????भावाभावकलाविनिर्मुक्तः सर्वसंशयध्वस्तः
पूर्णाहंभावः कृतकृत्यो भवति॥ ११॥ ????
????bhāvābhāvakalāvinirmuktaḥ sarvasam̐śayadhvastaḥ
pūrṇāham̐bhāvaḥ kṛtakṛtyo bhavati || 11|| ????
????

प्राणो ह्येष सर्वभूतैर्विभाति विजानन्विद्वान्भवते नातिवादी॥ १२॥

मुण्डक ३।१।

prāṇo hyeṣa sarvabhūtairvibhāti vijānanvidvānbhavate nātivādī || 12||

muṇḍaka 3|1|

आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः॥ १३॥

मुण्डक ३।१।४

ātmakrīḍa ātmaratiḥ kriyāvāneṣa brahmavidām̐ variṣṭhaḥ || 13||

muṇḍaka 3|1|4

निमिषार्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना॥

तारसार १।४७

nimiṣārdhaṁ na tiṣṭhanti vṛttiṁ brahmamayīṁ vinā ||

tārasāra 1|47

यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः॥ १५॥

तारसार १।४७

yathā tiṣṭhanti brahmādyāḥ sanakādyāḥ śukādayaḥ || 15||

tārasāra 1|47

अध्यात्मरतिरासीनो निरपेक्षो निराशिषः॥ १६॥

नारदपरिव्राजक ३।४४

adhyātmaratirāsīno nirapekṣo nirāśiṣaḥ || 16||

nāradaparivrājaka 3|44

सर्वद्वन्द्वैर्विनिर्मुक्तो ब्रह्मण्येवावतिष्ठते॥ १७॥

नारदपरिव्राजक ३।५२

sarvadvandvairvinirmukto brahmaṇyevāvatiṣṭhate || 17||

nāradaparivrājaka 3|52

कपालं वृक्षमूलानि कुचेलान्यसहायता॥ १८॥

नारदपरिव्राजक ३।५४

kapālaṁ vṛkṣamūlāni kucelānyasahāyatā || 18||

nāradaparivrājaka 3|54

समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम्॥ १९॥

नारदपरिव्राजक ३।५४

samatā caiva sarvasminnetanmuktasya lakṣaṇam || 19||

nāradaparivrājaka 3|54

स्वप्नेऽपि योऽभियुक्तः स्याज्जाग्रतीव विशेषतः॥ २०॥

नारदपरिव्राजक ५।५

svapne'pi yo'bhiyuktaḥ syājjāgratīva viśeṣataḥ || 20||

nāradaparivrājaka 5|5

ईदृक्चेष्टः स्मृतः श्रेष्ठो वरिष्ठो ब्रह्मवादिनाम्॥ २१॥

नारदपरिव्राजक ५।५

īdṛkceṣṭaḥ smṛtaḥ śreṣṭho variṣṭho brahmavādinām || 21||

nāradaparivrājaka 5|5

निर्मानश्चानहङ्कारो निर्द्वन्द्वश्छिन्नसंशयः॥ २२॥

नारदपरिव्राजक ५।१७

nirmānaścānahaṅkāro nirdvandvaścchinnasaṁśayaḥ || 22||

nāradaparivrājaka 5|17

आत्मक्रीड आत्मरतिरात्मवान् समदर्शनः॥ २३॥

नारदपरिव्राजक ५।२५

ātmakrīḍa ātmaratirātmavān samadarśanaḥ || 23||

nāradaparivrājaka 5|25

स्मृत्वा स्पृष्ट्वा च भुक्त्वा च दृष्ट्वा ज्ञात्वा
शुभाशुभम्॥ २४॥

महा ४।३२

smṛtvā spṛṣṭvā ca bhuktvā ca dṛṣṭvā jñātvā
śubhāśubham || 24||

mahā 4|32

न हृष्यति ग्लायति यः स विज्ञेयो जितेन्द्रियः॥ २५॥

नारदपरिव्राजक ३।३८

na hṛṣyati glāyati yaḥ sa vijñeyo jitendriyaḥ || 25||

nāradaparivrājaka 3|38

अप्राप्तं हि परित्यज्य सम्प्राप्ते समतां गतः॥ २६॥

महा ४।३६

aprāptaṁ hi parityajya samprāpte samatāṁ gataḥ || 26||

mahā 4|36

अदृष्टखेदाखेदो यः सन्तुष्ट इति कथ्यते॥ २७॥

महा ४।३६

adṛṣṭakhedākhedo yaḥ santuṣṭa iti kathyate || 27||

mahā 4|36

नाकृतेन कृतेनार्थो न श्रुतिस्मृतिविभ्रमैः॥ २८॥

महा ४।४१

nākṛtena kṛtenārtho na śrutismṛtivibhramaiḥ || 28||

mahā 4|41

निर्मन्दर इवाम्भोधिः स तिष्ठति यथा स्थितः॥ २९॥

महा ४।४१

nirmandara ivāmbhodhiḥ sa tiṣṭhati yathā sthitaḥ || 29||

mahā 4|41

सम्यग्ज्ञानावबोधेन नित्यमेकसमाधिना॥ ३०॥

अन्नपूर्णा ५।४९

samyagjñānāvabodhena nityamekasamādhinā || 30||

annapūrṇā 5|49

साङ्ख्य एवावबुद्धा ये ते साङ्ख्या योगिनः स्मृताः॥ ३१॥

अन्नपूर्णा ५।४९

sāṅkhya evāvabuddhā ye te sāṅkhyā yoginaḥ smṛtāḥ || 31||

annapūrṇā 5|49

प्राणाद्यनिलसंशान्तौ युक्त्या ये पदमागताः॥ ३२॥

अन्नपूर्णा ५।५०

prāṇādyanilasaṁśāntau yuktyā ye padamāgatāḥ || 32||

annapūrṇā 5|50

अनामयमनाद्यन्तं ते स्मृता योगयोगिनः॥ ३३॥

अन्नपूर्णा ५।५०

anāmayamanādyantaṁ te smṛtā yogayoginaḥ || 33||

annapūrṇā 5|50

सुखदुःखदशाधीरं साम्यान्न प्रोद्धरन्ति यम्॥ ३४॥

अन्नपूर्णा ४।१२

sukhaduḥkhadaśādhīraṁ sāmyānna proddharanti yam || 34||

annapūrṇā 4|12

निःश्वासा इव शैलेन्द्रं चित्तं तस्य मृतं विदुः॥ ३५॥

अन्नपूर्णा ४।१२

niḥśvāsā iva śailendraṁ cittaṁ tasya mṛtaṁ viduḥ || 35||

annapūrṇā 4|12

वाचामतीतविषयो विषयाशादशोज्झितः॥ ३६॥

अन्नपूर्णा ५।९६

vācāmatītaviṣayo viṣayāśādaśojjhitaḥ || 36||

annapūrṇā 5|96

परानन्दरसाक्षुब्धो रमते स्वात्मनात्मनि॥ ३७॥

अन्नपूर्णा ५।९६

parānandarasākṣubdho ramate svātmanātmani || 37||

annapūrṇā 5|96

निर्ग्रन्थिः शान्तसन्देहो जीवन्मुक्तो विभावनः॥ ३८॥

अक्षि ३९

nirgranthiḥ śāntasandeho jīvanmukto vibhāvanaḥ || 38||

akṣi 39

अनिर्वाणोऽपि निर्वाणश्चित्प्रदीप इव स्थितः॥ ३९॥

अक्षि ३९

anirvāṇo'pi nirvāṇaścitpradīpa iva sthitaḥ || 39||

akṣi 39

निर्धनोऽपि सदा तुष्टोऽप्यसहायो महाबलः॥ ४०॥

आत्म १२

nirdhano'pi sadā tuṣṭo'pyasahāyo mahābalaḥ || 40||

ātma 12

नित्यतृप्तोऽप्यभुञ्जानोऽप्यसमः समदर्शनः॥ ४१॥

आत्म १३

nityatṛpto'pyabhuñjāno'pyasamaḥ samadarśanaḥ || 41||

ātma 13

कुर्वन्नपि न कुर्वाणश्चाभोक्ता फलभोग्यपि॥ ४२॥

आत्म १३

kurvannapi na kurvāṇaścābhoktā phalabhogyapi || 42||

ātma 13

शरीरप्यशरीरोऽसौ परिच्छिन्नोऽपि सर्वगः॥ ४३॥

आत्म १४

śarīrapyaśarīro'sau paricchinno'pi sarvagaḥ || 43||

ātma 14

अध्यात्मरतिराशान्तः पूर्णः पावनमानसः॥ ४४॥

अन्नपूर्णा २।२६

adhyātmaratirāśāntaḥ pūrṇaḥ pāvanamānasaḥ || 44||

annapūrṇā 2|26

नैष्कर्मण्येन न तस्यार्थस्तस्यार्थोऽस्ति न कर्मभिः॥ ४५॥

मुक्तिका २।२०

naiṣkarmaṇyena na tasyārthastasyārtho'sti na karmabhiḥ || 45||

muktikā 2|20

न समाधानजाप्याभ्यां यस्य निर्वासनं मनः॥ ४६॥

मुक्तिका २।२०

na samādhānajāpyābhyāṁ yasya nirvāsanaṁ manaḥ || 46||

muktikā 2|20

जगज्जीवादिरूपेण पश्यन्नपि परात्मवित्॥ ४७॥

पाशुपतब्रह्म २४

jagajjīvādirūpeṇa paśyannapi parātmavit || 47||

pāśupatabrahma 24

न तत्पश्यति चिद्रूपं ब्रह्म वस्त्वेव पश्यति॥ ४८॥

पाशुपतब्रह्म २५

na tatpaśyati cidrūpaṁ brahma vastveva paśyati || 48||

pāśupatabrahma 25

अहमन्नं सदान्नाद इति हि ब्रह्मवेदनम्॥ ४९॥

पाशुपतब्रह्म ३८

ahamannaṁ sadānnāda iti hi brahmavedanam || 49||

pāśupatabrahma 38

ब्रह्मविद्ग्रसति ज्ञानात् सर्वं ब्रह्मात्मनैव तु॥ ५०॥

पाशुपतब्रह्म ३९

brahmavidgrasati jñānāt sarvaṁ brahmātmanaiva tu || 50||

pāśupatabrahma 39

समाधिमथकर्माणि मा करोतु करोतु वा॥ ५१॥

मुक्तिका २।१९

samādhimathakarmāṇi mā karotu karotu vā || 51||

muktikā 2|19

हृदयेनात्तसर्वेहो मुक्त एवोत्तमाशयः॥ ५२॥

मुक्तिका २।१९

hṛdayenāttasarveho mukta evottamāśayaḥ || 52||

muktikā 2|19

अक्षरत्वाद्वरेण्यत्वाद्व्यस्तसंसारबन्धनात्॥ ५३॥

आरुणिक १

akṣaratvādvareṇyatvādvyastasaṁsārabandhanāt || 53||

āruṇika 1

तत्त्वमस्यादिलक्ष्यत्वादवधूत इतीर्यते॥ ५४॥

आरुणिक १

tattvamasyādilakṣyatvādavadhūta itīryate || 54||

āruṇika 1

यो विलङ्घ्याश्रमान्वर्णानात्मन्येव स्थितः पुमान्॥ ५५॥

आरुणिक २

yo vilaṅghyāśramānvarṇānātmanyeva sthitaḥ pumān || 55||

āruṇika 2

अतिवर्णाश्रमी योगी अवधूतः स कथ्यते॥ ५६॥

आरुणिक २

ativarṇāśramī yogī avadhūtaḥ sa kathyate || 56||

āruṇika 2

यथा रविः सर्वरसान्प्रभुङ्क्ते हुताश्चनश्चापि हि सर्वभक्षः॥ ५७॥

आरुणिक ६

yathā raviḥ sarvarasānprabhuṅkte hutāścanaścāpi hi sarvabhakṣaḥ || 57||

āruṇika 6

तथैव योगी विषायन्प्रभुङ्क्ते न लिप्यते पुण्यपापैश्च शुद्धः॥ ५८॥

आरुणिक ६

tathaiva yogī viṣāyanprabhuṅkte na lipyate puṇyapāpaiśca

śuddhaḥ || 58||

āruṇika 6

केवलं सुसमः स्वच्छो मौनी मुदितमानसः॥ ५९॥

महा २।२७

kevalaṁ susamaḥ svaccho maunī muditamānasaḥ || 59||

mahā 2|27

सन्तोषामृतपानेन ये शान्तास्तृप्तिमागताः॥ ६०॥

महा ४।३५

santoṣāmṛtapānena ye śāntāstṛptimāgatāḥ || 60||

mahā 4|35

आत्मारामा महात्मानस्ते महापदमागताः॥ ६१॥

महा ४।३५

ātmārāmā mahātmānaste mahāpadamāgatāḥ || 61||

mahā 4|35

हर्षामर्षभयक्रोधकामकार्पण्यदृष्टिभिः॥ ६२॥

महा २।४४

harṣāmarṣabhayakrodhakāmakārpaṇyadṛṣṭibhiḥ || 62||

mahā 2|44

न हृष्यति ग्लायति यः स जीवन्मुक्त उच्यते॥ ६३॥

महा २।४३
na hṛṣyati glāyati yaḥ sa jīvanmukta ucyate || 63||

mahā 2|43

अहङ्कारमयीं त्यक्त्वा वासनां लीलयैव यः॥ ६४॥

महा २।४५
ahaṅkāramayīṁ tyaktvā vāsanāṁ līlayaiva yaḥ || 64||

mahā 2|45

तिष्ठति ध्येयसन्त्यागी स जीवन्मुक्त उच्यते॥ ६५॥

महा २।४५
tiṣṭhati dhyeyasantyāgī sa jīvanmukta ucyate || 65||

mahā 2|45

मौनवान्निरहंभावो निर्मानो मुक्तमत्सरः॥ ६६॥

महा २।५०
maunavānnirahaṁbhāvo nirmāno muktamatsaraḥ || 66||

mahā 2|50

यः करोति गतोद्वेगः स जीवन्मुक्त उच्यते॥ ६७॥

महा २।५०

yaḥ karoti gatodvegaḥ sa jīvanmukta ucyate || 67||

mahā 2|50

यावती दृश्यकलना सकलेयं विलोक्यते॥ ६८॥

महा २।५३

yāvatī dṛśyakalanā sakaleyaṁ vilokyate || 68||

mahā 2|53

सा येन सुष्ठु सन्त्यक्ता स जीवन्मुक्त उच्यते॥ ६९॥

महा २।५३

sā yena suṣṭhu santyaktā sa jīvanmukta ucyate || 69||

mahā 2|53

उद्वेगानन्दरहितः समया स्वच्छया धिया॥ ७०॥

महा २।५७

udvegānandarahitaḥ samayā svacchayā dhiyā || 70||

mahā 2|57

न शोचते न चोदेति स जीवन्मुक्त उच्यते॥ ७१॥

महा २।५७

na śocate na codeti sa jīvanmukta ucyate || 71||

mahā 2|57

सर्वेच्छाः सकलाः शङ्काः सर्वेहाः सर्वनिश्चयाः॥ ७२॥

महा २।५८

sarvecchāḥ sakalāḥ śaṅkāḥ sarvehāḥ sarvaniścayāḥ || 72||

mahā 2|58

धिया येन परित्यक्ताः स जीवन्मुक्त उच्यते॥ ७३॥

महा २।५८

dhiyā yena parityaktāḥ sa jīvanmukta ucyate || 73||

mahā 2|58

जन्मस्थितिविनाशेषु सोदयास्तमयेषु च॥ ७४॥

महा २।५९

janmasthitivināśeṣu sodayāstamayeṣu ca || 74||

mahā 2|59

सममेव मनो यस्य स जीवन्मुक्त उच्यते॥ ७५॥

महा २।५९

samameva mano yasya sa jīvanmukta ucyate || 75||

mahā 2|59

सर्वाधिष्ठानचिन्मात्रे निर्विकल्पे चिदात्मनि॥ ७६॥

अन्नपूर्णा २।२७

sarvādhiṣṭhānacinmātre nirvikalpe cidātmani || 76||

annapūrṇā 2|27

यो जीवति गतस्नेहः स जीवन्मुक्त उच्यते॥ ७७॥

अन्नपूर्णा २।२७

yo jīvati gatasnehaḥ sa jīvanmukta ucyate || 77||

annapūrṇā 2|27

क्रियानाशाद्भवेच्चिन्तानाशोऽस्माद्वासनाक्षयः॥ ७८॥

अध्यात्म १२

kriyānāśādbhaveccintānāśo'smādvāsanākṣayaḥ || 78||

adhyātma 12

वासनाप्रक्षयो मोक्षः स जीवन्मुक्त उच्यते॥ ७९॥

अध्यात्म १२

vāsanāprakṣayo mokṣaḥ sa jīvanmukta ucyate || 79||

adhyātma 12

निर्विकल्पा च चिन्मात्रा वृत्तिः प्रज्ञेति कथ्यते॥ ८०॥

अध्यात्म ४४

nirvikalpā ca cinmātrā vṛttiḥ prajñeti kathyate || 80||

adhyātma 44

सा सर्वदा भवेद्यस्य स जीवन्मुक्त उच्यते॥ ८१॥

अध्यात्म ४४

sā sarvadā bhavedyasya sa jīvanmukta ucyate || 81||

adhyātma 44

देहेन्द्रियेष्वहंभाव इदंभावस्तदन्यके॥ ८२॥

अध्यात्म ४५

dehendriyeṣvahaṁbhāva idaṁbhāvastadanyake || 82||

adhyātma 45

यस्य नो भवतः क्वापि स जीवन्मुक्त उच्यते॥ ८३॥

अध्यात्म ४५

yasya no bhavataḥ kvāpi sa jīvanmukta ucyate || 83||

adhyātma 45

न प्रत्यग्ब्रह्मणोर्भेदं कदापि ब्रह्मसर्गयोः॥ ८४॥

अध्यात्म ४६

na pratyagbrahmaṇorbhedaṁ kadāpi brahmasargayoḥ || 84||

adhyātma 46

प्रज्ञया यो विजानाति स जीवन्मुक्त उच्यते॥ ८५॥

अध्यात्म ४६

prajñayā yo vijānāti sa jīvanmukta ucyate || 85||

adhyātma 46

साधुभिः पूज्यमानोऽपि पीड्यमानोऽपि दुर्जनैः॥ ८६॥

अध्यात्म ४७

sādhubhiḥ pūjyamāno'pi pīḍyamāno'pi durjanaiḥ || 86||

adhyātma 47

समभावो भवेद्यस्य स जीवन्मुक्त उच्यते॥ ८७॥

अध्यात्म ४७

samabhāvo bhavedyasya sa jīvanmukta ucyate || 87||

adhyātma 47

यथास्थितमिदं यस्य व्यवहारवतोऽपि च॥ ८८॥

वराह ४।२१

yathāsthitamidaṁ yasya vyavahāravato'pi ca || 88||

varāha 4|21

अस्तं गतं स्थितं व्योम स जीवन्मुक्त उच्यते॥ ८९॥

वराह ४।२१

astaṁ gataṁ sthitaṁ vyoma sa jīvanmukta ucyate || 89||

varāha 4|21

नोदेति नास्तमायाति सुखे दुःखे मनःप्रभा॥ ९०॥

वराह ४।२२

nodeti nāstamāyāti sukhe duḥkhe manaḥprabhā || 90||

varāha 4|22

यथा प्राप्तस्थितिर्यस्य स जीवन्मुक्त उच्यते॥ ९१॥

वराह ४।२२

yathā prāptasthitiryasya sa jīvanmukta ucyate || 91||

varāha 4|22

यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्नविद्यते॥ ९२॥

वराह ४।२३

yo jāgarti suṣuptistho yasya jāgrannavidyate || 92||

varāha 4|23

यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते॥ ९३॥

वराह ४।२३

yasya nirvāsano bodhaḥ sa jīvanmukta ucyate || 93||

varāha 4|23

रागद्वेषभयादीनामनुरूपं चरन्नपि॥ ९४॥

वराह ४।२४

rāgadveṣabhayādīnāmanurūpaṁ carannapi || 94||

varāha 4|24

योऽन्तर्व्योमवदत्यच्छः स जीवन्मुक्त उच्यते॥ ९५॥

वराह ४।२४

yo'ntarvyomavadatyacchaḥ sa jīvanmukta ucyate || 95||

varāha 4|24

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते॥ ९६॥

वराह ४।२४

yasya nāhaṅkṛto bhāvo buddhiryasya na lipyate || 96||

varāha 4|24

कुर्वतोऽकुर्वतो वापि स जीवन्मुक्त उच्यते॥ ९७॥

वराह ४।२५

kurvato'kurvato vāpi sa jīvanmukta ucyate || 97||

varāha 4|25

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः॥ ९८॥

वराह ४।२६

yasmānnodvijate loko lokānnodvijate ca yaḥ || 98||

varāha 4|26

हर्षामर्षभयोन्मुक्तः स जीवन्मुक्त उच्यते॥ ९९॥

वराह ४।२६

harṣāmarṣabhayonmuktaḥ sa jīvanmukta ucyate || 99||

varāha 4|26

यः समस्तार्थजालेषु व्यवहार्यपि शीतलः॥ १००॥

वराह ४।२७

yaḥ samastārthajāleṣu vyavahāryapi śītalaḥ || 100||

varāha 4|27

परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उच्यते॥ १०१॥

महा २।६२

parārtheṣviva pūrṇātmā sa jīvanmukta ucyate || 101||

mahā 2|62

प्रजहाति यदा कामान्सर्वांश्चित्तगतान्मुने॥ १०२॥

वराह ४।२८

prajahāti yadā kāmānsarvāṁścittagatānmune || 102||

varāha 4|28

मयि सर्वात्मके तुष्टः स जीवन्मुक्त उच्यते॥ १०३॥

वराह ४।२८

mayi sarvātmake tuṣṭaḥ sa jīvanmukta ucyate || 103||

varāha 4|28

चैत्यवर्जितचिन्मात्रे पदे परमपावने॥ १०४॥

वराह ४।२९

caityavarjitacinmātre pade paramapāvane || 104||

varāha 4|29

अक्षुब्धचित्तो विश्रान्तः स जीवन्मुक्त उच्यते॥ १०५॥

वराह ४।२९

akṣubdhacitto viśrāntaḥ sa jīvanmukta ucyate || 105||

varāha 4|29

इदं जगदयं सोऽहं दृश्यजातमवास्तवम्॥ १०६॥

वराह ४।३०

idaṁ jagadayaṁ so'haṁ dṛśyajātamavāstavam || 106||

varāha 4|30

यस्य चित्ते न स्फुरति स जीवन्मुक्त उच्यते॥ १०७॥

वराह ४।३०

yasya citte na sphurati sa jīvanmukta ucyate || 107||

varāha 4|30

शान्तसंसारकलनः कलावानपि निष्कलः॥ १०८॥

महा २।६१

śāntasaṁsārakalanaḥ kalāvānapi niṣkalaḥ || 108||

mahā 2|61

यः सचित्तोऽपि निश्चित्तः स जीवन्मुक्त उच्यते॥ १०९॥

महा २।६१

yaḥ sacitto'pi niścittaḥ sa jīvanmukta ucyate || 109||

mahā 2|61

चिदात्माहं परात्माहं निर्गुणोऽहं परात्परः॥ ११०॥

तेजोबिन्दु ४।१

cidātmāhaṁ parātmāhaṁ nirguṇo'haṁ parātparaḥ || 110||

tejobindu 4|1

आत्ममात्रेण यस्तिष्ठेत्स जीवन्मुक्त उच्यते॥ १११॥

तेजोबिन्दु ४।१

ātmamātreṇa yastiṣṭhetsa jīvanmukta ucyate || 111||

tejobindu 4|1

देहत्रयातिरिक्तोऽहं शुद्धचैतन्यमस्म्यहम्॥ ११२॥

तेजोबिन्दु ४।२

dehatrayātirikto'haṁ śuddhacaitanyamasmyaham || 112||

tejobindu 4|2

ब्रह्माहमिति यस्यान्तः स जीवन्मुक्त उच्यते॥ ११३॥

तेजोबिन्दु ४।२

brahmāhamiti yasyāntaḥ sa jīvanmukta ucyate || 113||

tejobindu 4|2

यस्य देहादिकं नास्ति यस्य ब्रह्मेति निश्चयः॥ ११४॥

तेजोबिन्दु ४।३

yasya dehādikaṁ nāsti yasya brahmeti niścayaḥ || 114||

tejobindu 4|3

परमानन्दपूर्णो यः स जीवन्मुक्त उच्यते॥ ११५॥

तेजोबिन्दु ४।३

paramānandapūrṇo yaḥ sa jīvanmukta ucyate || 115||

tejobindu 4|3

नित्यानन्दः प्रसन्नात्मा ह्यन्यचिन्ताविवर्जितः॥ ११६॥

तेजोबिन्दु ४।६

nityānandaḥ prasannātmā hyanyacintāvivarjitaḥ || 116||

tejobindu 4|6

किञ्चिदस्तित्वहीनो यः स जीवन्मुक्त उच्यते॥ ११७॥

तेजोबिन्दु ४।७

kiñcidastitvahīno yaḥ sa jīvanmukta ucyate || 117||

tejobindu 4|7

अहं ब्रह्मास्म्यहं ब्रह्मास्म्यहं ब्रह्मेति निश्चयः॥ ११८॥

तेजोबिन्दु ४।२९

ahaṁ brahmāsmyahaṁ brahmāsmyahaṁ brahmeti niścayaḥ || 118||

tejobindu 4| 29

चिदहं चिदहं चेति स जीवन्मुक्त उच्यते॥ ११९॥

तेजोबिन्दु ४।३०

cidahaṁ cidahaṁ ceti sa jīvanmukta ucyate || 119||

tejobindu 4| 30

इति जीवन्मुक्तिवाक्यान्येकोनविंशत्यधिकं शतम्॥ ११९॥

अष्टमं प्रकरणं समाप्तम्।

iti jīvanmuktivākyānyekonaviṁśatyadhikaṁ śatam || 119||

aṣṭamaṁ prakaraṇaṁ samāptam |

९ अथ सार्धान्तिकस्वानुभूतिवाक्यानि। (११८)

9 atha sārdhāntikasvānubhūtivākyāni | (118)

योऽसावसौ पुरुषः सोऽहमस्मि॥ १॥

ईश १६

yo'sāvasau puruṣaḥ so'hamasmi || 1||

īśa 16

????तद्योऽहं सोऽसौ योऽसौ सोऽहम्॥ २॥ ????

???? १ ऐतरेय २।४।३

बह्वृच   ८
????tadyo'haṁ so'sau yo'sau so'ham || 2|| ????
???? 1 aitareya
2|4|3

bahvṛca   8

तं शान्तमचलमद्वयानन्दचिद्घन एवास्मि॥ ३॥
परमहंस   २
taṁ śāntamacalamadvayānandacidghana evāsmi || 3||
paramahaṁsa
2

तत्पूर्णानन्दैकबोधस्तद्ब्रह्मैवाहमस्मि॥ ४॥
नारदपरिव्राजक   ३।
८६
tatpūrṇānandaikabodhastadbrahmaivāhamasmi || 4||

nāradaparivrājaka   3|86

त्वं वाहमस्मि भगवो देव तेऽहं वै त्वमसि॥ ५॥
वराह   २।३४
tvaṁ vāhamasmi bhagavo deva te'haṁ vai tvamasi || 5||
varāha   2|34

सच्चिदानन्दात्मकोऽहमजोऽहं परिपूर्णोऽहमस्मि॥ ६॥

त्रिपाद्विभूतिमहानारायण ८
saccidānandātmako'hamajo'haṁ paripūrṇo'hamasmi || 6||

tripādvibhūtimahānārāyaṇa 8

शुद्धाद्वैतब्रह्माहम्॥ ७॥

मण्डलब्राह्मण २।४

śuddhādvaitabrahmāham || 7||

maṇḍalabrāhmaṇa 2|4

वाचामगोचरनिराकारपरब्रह्मस्वरूपोऽहमेव॥ ८॥

त्रिपाद्विभूतिमहानारायण ८
vācāmagocaranirākāraparabrahmasvarūpo'hameva || 8||

tripādvibhūtimahānārāyaṇa 8

सदोज्ज्वलोऽविद्यातत्कार्यहीनः स्वात्मा बन्धहरः सर्वदा द्वैतरहित
आनन्दरूपः सर्वाधिष्ठानसन्मात्रो निरस्ताविद्यातमोमोहोऽहमेवाहमों
तद्यत्परं ब्रह्म रामचन्द्रश्चिदात्मकः सोऽहमों तद्रामभद्रः
परं ज्योती रसोऽहमोम्॥ ९॥

नृसिंहतापिनी २।१।
१

sadojjvalo'vidyātatkāryahīnaḥ svātmā bandhaharaḥ sarvadā dvaitarahita
ānandarūpaḥ sarvādhiṣṭhānasanmātro nirastāvidyātamomoho'hamevāhamoṁ

tadyatparaṁ brahma rāmacandraścidātmakaḥ so'hamoṁ tadrāmabhadraḥ
paraṁ jyotī raso'hamom || 9||

nṛsiṁhatāpinī 2|1|1

तत्परः परमपुरुषः पुराणपुरुषोत्तमोनित्यशुद्धबुद्धमुक्तसत्य-
परमानन्दानन्ताद्वयपरिपूर्णः परमात्मा ब्रह्मैवाहं रामोऽस्मि॥ १०॥

तारसार ३।८

tatparaḥ paramapuruṣaḥ purāṇapuruṣottamonityaśuddhabuddhamuktasatya-
paramānandānantādvayaparipūrṇaḥ paramātmā brahmaivāhaṁ rāmo'smi || 10||

tārasāra 3|8

त्रिषु धामसु यद्भोज्यं भोक्ता भोगश्च यद्भवेत्॥ ११॥

कैवल्य १।१८

triṣu dhāmasu yadbhojyaṁ bhoktā bhogaśca yadbhavet || 11||

kaivalya 1|18

तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः॥ १२॥

कैवल्य १।१८

tebhyo vilakṣaṇaḥ sākṣī cinmātro'haṁ sadāśivaḥ || 12||

kaivalya 1|18

मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्॥ १३॥

कैवल्य १।१९

mayyeva sakalaṁ jātaṁ mayi sarvaṁ pratiṣṭhitam || 13||

kaivalya 1|19

मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम्॥ १४॥

कैवल्य १।१९

mayi sarvaṁ layaṁ yāti tadbrahmādvayamasmyaham || 14||

kaivalya 1|19

निर्वाणोऽस्मि निरीहोऽस्मि निरंशोऽस्मि निरीप्सितः॥ १५॥

सन्न्यास २।५६

nirvāṇo'smi nirīho'smi niraṁśo'smi nirīpsitaḥ || 15||

sannyāsa 2|
56

चिदात्माऽस्मि निरंशोऽस्मि परापरविवर्जितः॥ १६॥

अन्नपूर्णा ५।१३

cidātmā'smi niraṁśo'smi parāparavivarjitaḥ || 16||

annapūrṇā 5|
13

ब्रह्मैवाहं सर्ववेदान्तवेद्यं नाहं वेद्यं व्योमवातादिरूपम्॥ १७॥

सर्वसार ५

brahmaivāhaṁ sarvavedāntavedyaṁ nāhaṁ vedyaṁ vyomavātādirūpam || 17||

sarvasāra 5

रूपं नाहं नाम नाहं न कर्म ब्रह्मैवाहं सच्चिदानन्दरूपम्॥ १८॥

सर्वसार ५

rūpaṁ nāhaṁ nāma nāhaṁ na karma brahmaivāhaṁ

saccidānandarūpam || 18||

sarvasāra 5

नित्यः शुद्धो बुद्धमुक्तस्वभावः सत्यः सूक्ष्मः
सन्विभुश्चाद्वितीयः॥ १९॥

मैत्रेयी १।११

nityaḥ śuddho buddhamuktasvabhāvaḥ satyaḥ sūkṣmaḥ
sanvibhuścādvitīyaḥ || 19||

maitreyī 1|11

आनन्दाब्धिर्यत्परः सोऽहमस्मि प्रत्यग्धातुर्नात्र संशीतिरस्ति॥ २०॥

मैत्रेयी १।११

ānandābdhiryatparaḥ so'hamasmi pratyagdhāturnātra saṁśītirasti
|| 20||

maitreyī 1|11

सोऽहमर्कः परं ज्योतिरर्कज्योतिरहं शिवः॥ २१॥

महावाक्य

so'hamarkaḥ paraṁ jyotirarkajyotirahaṁ śivaḥ || 21||

mahāvākya

आत्मज्योतिरहं शुक्रः सर्वज्योतिरसावहोम्॥ २२॥

महावाक्य

ātmajyotirahaṁ śukraḥ sarvajyotirasāvahom || 22||

mahāvākya

द्वैतभावविमुक्तोऽस्मि सच्चिदानन्दलक्षणः॥ २३॥

अन्नपूर्णा ५।६८

dvaitabhāvavimukto'smi saccidānandalakṣaṇaḥ || 23||

annapūrṇā 5|
68

शुद्धबोधस्वरूपोऽहं केवलोऽहं सदाशिवः॥ २४॥

अध्यात्म ६९

śuddhabodhasvarūpo'haṁ kevalo'haṁ sadāśivaḥ || 24||

adhyātma 69

निष्क्रियोऽस्म्यविकारोऽस्मि निर्गुणोऽस्मि निराकृतिः॥ २५॥

कुण्डिका २५

niṣkriyo'smyavikāro'smi nirguṇo'smi nirākṛtiḥ || 25||

kuṇḍikā 25

निर्विकल्पोऽस्मि नित्योऽस्मि निरालम्बोऽस्मि निर्द्वयः॥ २६॥

कुण्डिका २५

nirvikalpo'smi nityo'smi nirālambo'smi nirdvayaḥ || 26||

kuṇḍikā 25

केवलाखण्डबोधोऽहं स्वानन्दोऽहं निरन्तरः॥ २७॥

कुण्डिका २६

kevalākhaṇḍabodho'haṁ svānando'haṁ nirantaraḥ || 27||

kuṇḍikā 26

सत्यं ज्ञानमनन्तं यत्परं ब्रह्माहमेव तत्॥ २८॥

वराह ३।२

satyaṁ jñānamanantaṁ yatparaṁ brahmāhameva tat || 28||

varāha 3|2

केवलं चित्सदानन्दं ब्रह्मैवाहं जनार्दनः॥ २९॥

वराह ३।१९

kevalaṁ citsadānandaṁ brahmaivāhaṁ janārdanaḥ || 29||

varāha 3|19

अशुभाशुभसङ्कल्पैः संशान्तोऽस्मि निरामयः॥ ३०॥

सन्न्यास २।४९

aśubhāśubhasaṅkalpaiḥ saṁśānto'smi nirāmayaḥ || 30||

sannyāsa 2|

49

नष्टेष्टानिष्टकलनः संविन्मात्रपरोऽस्म्यहम्॥ ३१॥

सन्न्यास २।४९

naṣṭeṣṭāniṣṭakalanaḥ saṁvinmātraparo'smyaham || 31||

sannyāsa 2|

49

अन्तर्याम्यहमग्राह्योऽनिर्देश्योऽहमलक्षणः॥ ३२॥

ब्रह्मविद्या ८०

antaryāmyahamagrāhyo'nirdeśyo'hamalakṣaṇaḥ || 32||

brahmavidyā

80

अद्वैतोऽहं पूर्णोऽहमबाह्योऽहमनन्तरः॥ ३३॥

ब्रह्मविद्या ८८

advaito'haṁ pūrṇo'hamabāhyo'hamanantaraḥ || 33||

brahmavidyā

88

अद्वयानन्दविज्ञानघनोऽस्म्यहमविक्रियः॥ ३४॥

ब्रह्मविद्या ८९

advayānandavijñānaghano'smyahamavikriyaḥ || 34||

brahmavidyā

89

अविद्याकार्यहीनोऽहमवाङ्मनसगोचरः॥ ३५॥

ब्रह्मविद्या ९०

avidyākāryahīno'hamavāṅmanasagocaraḥ || 35||

brahmavidyā

90

आत्मचैतन्यरूपोऽहमहमानन्दचिद्घनः॥ ३६॥

ब्रह्मविद्या ९१

ātmacaitanyarūpo'hamahamānandacidghanaḥ || 36||

brahmavidyā

91

आप्तकामोऽहमाकाशात्परमात्मेश्वरोऽस्म्यहम्॥ ३७॥

ब्रह्मविद्या ९२

āptakāmo'hamākāśātparamātmeśvaro'smyaham || 37||

brahmavidyā

92

चिदानन्दोऽस्म्यहं चेता चिद्घनश्चिन्मयोऽस्म्यहम्॥ ३८॥

ब्रह्मविद्या ९५

cidānando'smyahaṁ cetā cidghanaścinmayo'smyaham || 38||
brahmavidyā
95

ज्योतिर्मयोऽस्म्यहं ज्यायाज्ज्योतिषां ज्योतिरस्म्यहम्॥ ३९॥
ब्रह्मविद्या ९५
jyotirmayo'smyahaṁ jyāyājjyotiṣāṁ jyotirasmyaham || 39||
brahmavidyā
95

नित्योऽहं निरवद्योऽहं निष्क्रियोऽमि निरञ्जनः॥ ४०॥
ब्रह्मविद्या ९७
nityo'haṁ niravadyo'haṁ niṣkriyo'mi nirañjanaḥ || 40||
brahmavidyā
97

निर्मलो निर्विकल्पोऽहं निराख्यातोऽस्मि निश्चलः॥ ४१॥
ब्रह्मविद्या ९७
nirmalo nirvikalpo'haṁ nirākhyāto'smi niścalaḥ || 41||
brahmavidyā
97

निर्विकारो नित्यपूतो निर्गुणो निस्पृहोऽस्म्यहम्॥ ४२॥
ब्रह्मविद्या ९८
nirvikāro nityapūto nirguṇo nispṛho'smyaham || 42||
brahmavidyā
98

निरिन्द्रियो नियन्ताहं निरपेक्षोऽस्मि निष्कलः॥ ४३॥

ब्रह्मविद्या ९८

nirindriyo niyantāhaṁ nirapekṣo'smi niṣkalaḥ || 43||

brahmavidyā

98

पुरुषः परमात्माहं पुराणः परमोऽस्म्यहम्॥ ४४॥

ब्रह्मविद्या ९९

puruṣaḥ paramātmāhaṁ purāṇaḥ paramo'smyaham || 44||

brahmavidyā

99

पूर्णानन्दैकबोधोऽहं प्रत्यगेकरसोऽस्म्यहम्॥ ४५॥

ब्रह्मविद्या १००

pūrṇānandaikabodho'haṁ pratyagekaraso'smyaham || 45||

brahmavidyā

100

प्रज्ञातोऽहं प्रशान्तोऽहं प्रकाशः परमेश्वरः॥ ४६॥

ब्रह्मविद्या १०१

prajñāto'haṁ praśānto'haṁ prakāśaḥ parameśvaraḥ || 46||

brahmavidyā

101

एकधा चिन्त्यमानोऽहं द्वैताद्वैतविलक्षणः॥ ४७॥

ब्रह्मविद्या १०१

ekadhā cintyamāno'haṁ dvaitādvaitavilakṣaṇaḥ || 47||

brahmavidyā

101

शुद्धोऽस्मि शुक्रः शान्तोऽस्मि शाश्वतोऽस्मि शिवोऽस्म्यहम्॥ ४८॥

ब्रह्मविद्या १०४

śuddho'smi śukraḥ śānto'smi śāśvato'smi śivo'smyaham || 48||

brahmavidyā

104

अहं सकृद्विभातोऽस्मि स्वे महिम्नि सदा स्थितः॥ ४९॥

ब्रह्मविद्या १०५

ahaṁ sakṛdvibhāto'smi sve mahimni sadā sthitaḥ || 49||

brahmavidyā

105

मानावमानहीनोऽस्मि निर्गुणोऽस्मि शिवोऽस्म्यहम्॥ ५१॥

मैत्रेयी ३।४

mānāvamānahīno'smi nirguṇo'smi śivo'smyaham || 51||

maitreyī 3|4

द्वैताद्वैतविहीनोऽस्मि द्वन्द्वहीनोऽस्मि सोऽस्म्यहम्॥ ५२॥

मैत्रेयी ३।४

dvaitādvaitavihīno'smi dvandvahīno'smi so'smyaham || 52||

maitreyī 3|4

भावाभावविहीनोऽस्मि भाषाहीनोऽस्मि भास्म्यहम्॥ ५३॥

मैत्रेयी ३।५

bhāvābhāvavihīno'smi bhāṣāhīno'smi bhāsmyaham || 53||

maitreyī 3|5

शून्याशून्यविहीनोऽस्मि शोभनाशोभनोऽस्म्यहम्॥ ५४॥

मैत्रेयी ३।५

śūnyāśūnyavihīno'smi śobhanāśobhano'smyaham || 54||

maitreyī 3|5

सदसद्भेदहीनोऽस्मि सङ्कल्परहितोऽस्म्यहम्॥ ५५॥

मैत्रेयी ३।७

sadasadbhedahīno'smi saṅkalparahito'smyaham || 55||

maitreyī 3|7

नानात्मभेदहीनोऽस्मि ह्यखण्डानन्दविग्रहः॥ ५६॥

मैत्रेयी ३।८

nānātmabhedahīno'smi hyakhaṇḍānandavigrahaḥ || 56||

maitreyī 3|8

बन्धमोक्षविहीनोऽस्मि शुद्धं ब्रह्मास्मि सोऽस्म्यहम्॥ ५७॥

मैत्रेयी ३।९

bandhamokṣavihīno'smi śuddhaṁ brahmāsmi so'smyaham || 57||

maitreyī 3|9

चित्तादिसर्वहीनोऽस्मि परमोऽस्मि परात्परः॥ ५८॥

मैत्रेयी ३।१०

cittādisarvahīno'smi paramo'smi parātparaḥ || 58||

maitreyī 3|10

सदा विचाररूपोऽस्मि निर्विचारोऽस्मि सोऽस्म्यहम्॥ ५९॥

मैत्रेयी ३।१०

sadā vicārarūpo'smi nirvicāro'smi so'smyaham || 59||

maitreyī 3|10

ध्यातृध्यानविहीनोऽस्मि ध्येयहीनोऽस्मि सोऽस्म्यहम्॥ ६०॥

मैत्रेयी ३।११

dhyātṛdhyānavihīno'smi dhyeyahīno'smi so'smyaham || 60||

maitreyī 3|11

लक्ष्यालक्ष्यविहीनोऽस्मि लयहीनरसोऽस्म्यहम्॥ ६१॥

मैत्रेयी ३।१३

lakṣyālakṣyavihīno'smi layahīnaraso'smyaham || 61||

maitreyī 3|13

मातृमानविहीनोऽस्मि मेयहीनः शिवोऽस्म्यहम्॥ ६२॥

मैत्रेयी ३।१३

mātṛmānavihīno'smi meyahīnaḥ śivo'smyaham || 62||

maitreyī 3|13

सर्वेन्द्रियविहीनोऽस्मि सर्वकर्मकृदप्यहम्॥ ६३॥

मैत्रेयी ३।१५

sarvendriyavihīno'smi sarvakarmakṛdapyaham || 63||

maitreyī 3|15

मुदितामुदिताख्योऽस्मि सर्वमौनफलोऽस्म्यहम्॥ ६४॥

मैत्रेयी ३।१६

muditāmuditākhyo'smi sarvamaunaphalo'smyaham || 64||

maitreyī 3|16

षड्विकारविहीनोऽस्मि षट्कोशरहितोऽस्म्यहम्॥ ६५॥

मैत्रेयी ३।१८

ṣaḍvikāravihīno'smi ṣaṭkośarahito'smyaham || 65||

maitreyī 3|18

देशकालविमुक्तोऽस्मि दिगम्बरसुखोऽस्म्यहम्॥ ६६॥

मैत्रेयी ३।१९

deśakālavimukto'smi digambarasukho'smyaham || 66||

maitreyī 3|19

अखण्डाकाशरूपोऽस्मि ह्यखण्डाकारमस्म्यहम्॥ ६७॥

मैत्रेयी ३।२०

akhaṇḍākāśarūpo'smi hyakhaṇḍākāramasmyaham || 67||

maitreyī 3|20

प्रपञ्चमुक्तचित्तोऽस्मि प्रपञ्चरहितोऽस्म्यहम्॥ ६८॥

मैत्रेयी ३।२०

prapañcamuktacitto'smi prapañcarahito'smyaham || 68||

maitreyī 3|20

सर्वप्रकाशरूपोऽस्मि चिन्मात्रज्योतिरस्म्यहम्॥ ६९॥

मैत्रेयी ३।२१

sarvaprakāśarūpo'smi cinmātrajyotirasmyaham || 69||

maitreyī 3|21

कालत्रयविमुक्तोऽस्मि कामादिरहितोऽस्म्यहम्॥ ७०॥

मैत्रेयी ३।२१

kālatrayavimukto'smi kāmādirahito'smyaham || 70||

maitreyī 3|21

मुक्तिहीनोऽस्मि मुक्तोऽस्मि मोक्षहीनोऽस्म्यहम् सदा॥ ७१॥

मैत्रेयी ३।२२

muktihīno'smi mukto'smi mokṣahīno'smyaham sadā || 71||

maitreyī 3|22

गन्तव्यदेशहीनोऽस्मि गमनादिविवर्जितः॥ ७२॥

मैत्रेयी ३।२३

gantavyadeśahīno'smi gamanādivivarjitaḥ || 72||

maitreyī 3|23

सर्वदा समरूपोऽस्मि शान्तोऽस्मि पुरुषोत्तमः॥ ७३॥

मैत्रेयी ३।२४

sarvadā samarūpo'smi śānto'smi puruṣottamaḥ || 73||

maitreyī 3|24

चिदक्षरोऽहं सत्योऽहं वासुदेवोऽजरोऽमरः॥ ७४॥

तेजोबिन्दु ६।६९

cidakṣaro'haṁ satyo'haṁ vāsudevo'jaro'maraḥ || 74||

tejobindu 6|
69

अहमेवाक्षरं ब्रह्म वासुदेवाख्यमद्वयम्॥ ७५॥

नारदपरिव्राजक ३।
२०

ahamevākṣaraṁ brahma vāsudevākhyamadvayam || 75||

nāradaparivrājaka 3|20

परब्रह्मस्वरूपोऽहं परमानन्दमस्म्यहम्॥ ७६॥

तेजोबिन्दु ३।१

parabrahmasvarūpo'haṁ paramānandamasmyaham || 76||

tejobindu 3|1

केवलं ज्ञानरूपोऽहं केवलं परमोऽस्म्यहम्॥ ७७॥

तेजोबिन्दु ३।१

kevalaṁ jñānarūpo'haṁ kevalaṁ paramo'smyaham || 77||

tejobindu 3|1

केवलं शान्तरूपोऽहं केवलं चिन्मयोऽस्म्यहम्॥ ७८॥

तेजोबिन्दु ३।२

kevalaṁ śāntarūpo'haṁ kevalaṁ cinmayo'smyaham || 78||

tejobindu 3|2

केवलं नित्यरूपोऽहं केवलं शाश्वतोऽस्म्यहम्॥ ७९॥

तेजोबिन्दु ३।२

kevalaṁ nityarūpo'haṁ kevalaṁ śāśvato'smyaham || 79||

tejobindu 3|2

केवलं सत्त्वरूपोऽहमहं त्यक्त्वाहमस्म्यहम्॥ ८०॥

तेजोबिन्दु ३।३

kevalaṁ sattvarūpo'hamahaṁ tyaktvāhamasmyaham || 80||

tejobindu 3|3

केवलं तुर्यरूपोऽस्मि तुर्यातीतोऽस्मि केवलः॥ ८१॥

तेजोबिन्दु ३।४

kevalaṁ turyarūpo'smi turyātīto'smi kevalaḥ || 81||

tejobindu 3|4

केवलाकाररूपोऽस्मि शुद्धरूपोऽस्म्यहं सदा॥ ८२॥

तेजोबिन्दु ३।५

kevalākārarūpo'smi śuddharūpo'smyahaṁ sadā || 82||

tejobindu 3|5

निर्विकल्पस्वरूपोऽस्मि निरीहोऽस्मि निरामयः॥ ८३॥

तेजोबिन्दु ३।६

nirvikalpasvarūpo'smi nirīho'smi nirāmayaḥ || 83||

tejobindu 3|6

अपरिच्छिन्नरूपोऽस्मि ह्यनन्तानन्दरूपवान्॥ ८४॥

तेजोबिन्दु ३।७

aparicchinnarūpo'smi hyanantānandarūpavān || 84||

tejobindu 3|7

आत्मारामस्वरूपोऽस्मि अहमात्मा सदाशिवः॥ ८५॥

तेजोबिन्दु ३।९

ātmārāmasvarūpo'smi ahamātmā sadāśivaḥ || 85||

tejobindu 3|9

आदिमध्यान्तशून्योऽस्मि ह्याकाशसदृशोऽस्म्यहम्॥ ८६॥

तेजोबिन्दु ३।१०

ādimadhyāntaśūnyo'smi hyākāśasadṛśo'smyaham || 86||

tejobindu 3|

10

नित्यशुद्धचिदानन्दः सत्तामात्रोऽहमव्ययः॥ ८७॥

तेजोबिन्दु ३।११

nityaśuddhacidānandaḥ sattāmātro'hamavyayaḥ || 87||

tejobindu 3|

11

नित्यबुद्धविशुद्धैकः सच्चिदानन्दमस्म्यहम्॥ ८८॥

तेजोबिन्दु ३।११

nityabuddhaviśuddhaikaḥ saccidānandamasmyaham || 88||

tejobindu 3|

11

भूमानन्दस्वरूपोऽस्मि भाषाहीनोऽस्म्यहं सदा॥ ८९॥

तेजोबिन्दु ३।१२

bhūmānandasvarūpo'smi bhāṣāhīno'smyahaṁ sadā || 89||

tejobindu 3|

12

सर्वाधिष्ठानरूपोऽस्मि सर्वदा चिद्घनोऽस्म्यहम्॥ ९०॥

तेजोबिन्दु ३।१२

sarvādhiṣṭhānarūpo'smi sarvadā cidghano'smyaham || 90||

tejobindu 3|

12

चित्तवृत्तिविहीनोऽहं चिदात्मैकरसोऽस्म्यहम्॥ ९१॥

तेजोबिन्दु ३।१४

cittavr̥ttivihīno'haṁ cidātmaikaraso'smyaham || 91||

tejobindu 3|

14

अहं ब्रह्मैव सर्वं स्यादहं चैतन्यमेव हि॥ ९२॥

तेजोबिन्दु ३।१६

ahaṁ brahmaiva sarvaṁ syādahaṁ caitanyameva hi || 92||

tejobindu 3|

16

अहमेवाहमेवास्मि भूमाकारस्वरूपवान्॥ ९३॥

तेजोबिन्दु ३।१६

ahamevāhamevāsmi bhūmākārasvarūpavān || 93||

tejobindu 3|

16

अहमेव महानात्मा ह्यहमेव परात्परः॥ ९४॥

तेजोबिन्दु ३।

१७

ahameva mahānātmā hyahameva parātparaḥ || 94||

tejobindu

3|17

अहमन्यवदाभामि ह्यहमेव शरीरवत्॥ ९५॥

तेजोबिन्दु ३।

१७

ahamanyavadābhāmi hyahameva śarīravat || 95||

tejobindu

3|17

अहं शिष्यवदाभामि ह्यहं लोकत्रयाश्रयः॥ ९६॥

तेजोबिन्दु ३।
१८

ahaṁ śiṣyavadābhāmi hyahaṁ lokatrayāśrayaḥ || 96||

tejobindu
3|18

अहं कालत्रयातीतो ह्यहं वेदैरुपासितः॥ ९७॥

तेजोबिन्दु ३।१८

ahaṁ kālatrayātīto hyahaṁ vedairupāsitaḥ || 97||

tejobindu
3|18

अहं शास्त्रेण निर्णीत अहं चित्ते व्यवस्थितः॥ ९८॥

तेजोबिन्दु ३।१९

ahaṁ śāstreṇa nirṇīta ahaṁ citte vyavasthitaḥ || 98||

tejobindu 3|
19

आनन्दघन एवाहमहं ब्रह्मास्मि केवलम्॥ ९९॥

तेजोबिन्दु ३।२६

ānandaghana evāhamahaṁ brahmāsmi kevalam || 99||

tejobindu 3|
26

आत्मनात्मनि तृप्तोऽस्मि ह्यरूपो ह्यहमव्ययः॥ १००॥

तेजोबिन्दु ३।२८

ātmanātmani tṛpto'smi hyarūpo hyahamavyayaḥ || 100||

tejobindu 3|
28

आकाशादपि सूक्ष्मोऽहमाद्यन्ताभाववानहम्॥ १०१॥

तेजोबिन्दु ३।२९

ākāśādapi sūkṣmo'hamādyantābhāvavānaham || 101||

tejobindu 3|
29

सत्तामात्रस्वरूपोऽहं शुद्धमोक्षस्वरूपवान्॥ १०२॥

तेजोबिन्दु ३।३०

sattāmātrasvarūpo'haṁ śuddhamokṣasvarūpavān || 102||

tejobindu 3|
30

सत्यानन्दस्वरूपोऽहं ज्ञानानन्दघनोऽस्म्यहम्॥ १०३॥

तेजोबिन्दु ३।३१

satyānandasvarūpo'haṁ jñānānandaghano'smyaham || 103||

tejobindu 3|
31

नामरूपविमुक्तोऽहमहमानन्दविग्रहः॥ १०४॥

तेजोबिन्दु ३।३६

nāmarūpavimukto'hamahamānandavigrahaḥ || 104||

tejobindu 3|
36

आदिचैतन्यमात्रोऽहमखण्डैकरसोऽस्म्यहम्॥ १०५॥

तेजोबिन्दु ३।३७

ādicaitanyamātro'hamakhaṇḍaikaraso'smyaham || 105||

tejobindu 3|
37

सर्वत्र पूर्णरूपोऽहं परामृतरसोऽस्म्यहम्॥ १०६॥

तेजोबिन्दु ३।३८

sarvatra pūrṇarūpo'haṁ parāmṛtaraso'smyaham || 106||

tejobindu 3|
38

एकमेवाद्वितीयं सद्ब्रह्मैवाहं न संशयः॥ १०७॥

तेजोबिन्दु ३।३९

ekamevādvitīyaṁ sadbrahmaivāhaṁ na saṁśayaḥ || 107||

tejobindu 3|
39

अहमेव परं ब्रह्म ह्यहमेव गुरोर्गुरुः॥ १०८॥

तेजोबिन्दु ६।४४

ahameva paraṁ brahma hyahameva gurorguruḥ || 108||

tejobindu 6|
44

सर्वज्ञानप्रकाशोऽस्मि मुख्यविज्ञानविग्रहः॥ १०९॥

तेजोबिन्दु ६।६८

sarvajñānaprakāśo'smi mukhyavijñānavigrahaḥ || 109||

tejobindu 6|
68

तुर्यातुर्यप्रकाशोऽस्मि तुर्यातुर्यादिवर्जितः॥ ११०॥

तेजोबिन्दु ६।६९

turyāturyaprakāśo'smi turyāturyādivarjitaḥ || 110||

tejobindu 6|
69

दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम्॥ १११॥

मुक्तिका २।७३

dṛśisvarūpaṁ gaganopamaṁ paraṁ sakṛdvibhātaṁ tvajamekamakṣaram || 111||

muktikā 2|73

अलेपकं सर्वगतं यदव्ययं तदेव चाहं सकलं विमुक्त ॐ॥ ११२॥

मुक्तिका २।७३

alepakaṁ sarvagataṁ yadavyayaṁ tadeva cāhaṁ sakalaṁ vimukta om || 112||

muktikā 2|73

अहं ब्रह्मास्मि मन्त्रोऽयं जन्मपापं विनाशयेत्॥ ११३॥

तेजोबिन्दु ३।६१

ahaṁ brahmāsmi mantro'yaṁ janmapāpaṁ vināśayet || 113||

tejobindu 3|
61

अहं ब्रह्मास्मि मन्त्रोऽयं भेदबुद्धिं विनाशयेत्॥ ११४॥

तेजोबिन्दु ३।६३
ahaṁ brahmāsmi mantro'yaṁ bhedabuddhiṁ vināśayet || 114||
tejobindu 3|
63

अहं ब्रह्मास्मि मन्त्रोऽयं कोटिदोषं विनाशयेत्॥ ११५॥
तेजोबिन्दु ३।६८
ahaṁ brahmāsmi mantro'yaṁ koṭidoṣaṁ vināśayet || 115||
tejobindu 3|
68

अहं ब्रह्मास्मि मन्त्रोऽयं ज्ञानानन्दं प्रयच्छति॥ ११६॥
तेजोबिन्दु ३।७३
ahaṁ brahmāsmi mantro'yaṁ jñānānandaṁ prayacchati || 116||
tejobindu 3|
73

सर्वमन्त्रान्समुत्सृज्य इमं मन्त्रं समभ्यसेत्॥ ११७॥
तेजोबिन्दु ३।७४
sarvamantrānsamutsṛjya imaṁ mantraṁ samabhyaset || 117||
tejobindu 3|
74

सद्यो मोक्षमवाप्नोति नास्ति सन्देहमण्वपि॥ ११८॥
तेजोबिन्दु ३।७४
sadyo mokṣamavāpnoti nāsti sandehamaṇvapi || 118||
tejobindu 3|
74

इति स्वानुभूतिवाक्यानि अष्टादशोत्तरशतम्॥ ११८॥
नवमं प्रकरणं समाप्तम्।

iti svānubhūtivākyāni aṣṭādaśottaraśatam || 118||
navamaṁ prakaraṇaṁ samāptam |

१० अथ सार्धान्तिकसमाधिवाक्यानि। (५०)

10 atha sārdhāntikasamādhivākyāni | (50)

जीवात्मपरमात्मैक्यावस्था त्रिपुटिरहिता परमानन्दस्वरूपा
शुद्धचैतन्यात्मिका समाधिः॥ १॥

शाण्डिल्य १।११

jīvātmaparamātmaikyāvasthā tripuṭirahitā paramānandasvarūpā
śuddhacaitanyātmikā samādhiḥ || 1||

śāṇḍilya 1|11

ध्यातृध्याने विहाय निवातस्थितदीपवद्ध्येयैकगोचरं चित्तं समाधिः॥ २॥

पैङ्गल ३

dhyātṛdhyāne vihāya nivātasthitadīpavaddhyeyaikagocaraṁ cittaṁ samādhiḥ || 2||

paiṅgala 3

मनः प्रचारशून्यं परमात्मनि लीनं भवति॥ ३॥

मण्डलब्राह्मण ३।१

manaḥ pracāraśūnyaṁ paramātmani līnaṁ bhavati || 3||

maṇḍalabrāhmaṇa 3|1

प्राप्ते ज्ञानेन विज्ञाने ज्ञेये परमात्मनि हृदि संस्थिते देहे
लब्धशान्तिपदं गते तदा प्रभा मनोबुद्धिशून्यं भवति॥ ४॥

पैङ्गल ४।९

prāpte jñānena vijñāne jñeye paramātmani hṛdi saṁsthite dehe
labdhaśāntipadaṁ gate tadā prabhā manobuddhiśūnyaṁ bhavati
|| 4||

paiṅgala 4|9

प्राणापानयोरैक्यं कृत्वा धृतकुम्भको नासाग्रदर्शनदृढभावनया
द्विकराङ्गुलिभिः षण्मुखीकरणेन प्रणवध्वनिं निशम्य मनस्तत्र
लीनं भवति॥ ५॥

मण्डलब्राह्मण २।२

prāṇāpānayoraikyaṁ kṛtvā dhṛtakumbhako
nāsāgradarśanadṛḍhabhāvanayā
dvikarāṅgulibhiḥ ṣaṇmukhīkaraṇena praṇavadhvaniṁ niśamya
manastatra
līnaṁ bhavati || 5||

maṇḍalabrāhmaṇa 2|2

पयःस्रवानन्तरं धेनुस्तनक्षीरमिव सर्वेन्द्रियवर्गे परिनष्टे मनोनाशं भवति॥ ६॥

मण्डलब्राह्मण ३।१

payaḥsravānantaraṁ dhenustanakṣīramiva sarvendriyavarge
parinaṣṭe manonāśaṁ bhavati || 6||

maṇḍalabrāhmaṇa 3|1

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह॥ ७॥

मैत्रायणी ६।३०

yadā pañcāvatiṣṭhante jñānāni manasā saha || 7||

maitrāyaṇī 6|
30

बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्॥ ८॥

कठ २।३।१०

buddhiśca na viceṣṭati tāmāhuḥ paramāṁ gatim || 8||

kaṭha 2|3|10

संशान्तसर्वसङ्कल्पा या शिलावदवस्थितिः॥ ९॥

महा ५।६

saṁśāntasarvasaṅkalpā yā śilāvadavasthitiḥ || 9||

mahā 5|6

जाग्रन्निद्राविनिर्मुक्ता सा स्वरूपस्थितिः परा॥ १०॥

महा ५।६

jāgrannidrāvinirmuktā sā svarūpasthitiḥ parā || 10||

mahā 5|6

मारुतेमध्यसञ्चारे मनःस्थैर्यं प्रजायते॥ ११॥

शाण्डिल्य १।५।१०

mārutemadhyasañcāre manaḥsthairyaṁ prajāyate || 11||

śāṇḍilya 1|5|10

यो मनः सुस्थिरीभावः सैवावस्था मनोन्मनी॥ १२॥

शाण्डिल्य १।५।१०

yo manaḥ susthirībhāvaḥ saivāvasthā manonmanī || 12||

śāṇḍilya 1|5|10

सरूपोऽसौ मनोनाशो जीवन्मुक्तस्य विद्यते॥ १३॥

अन्नपूर्णा ४।१८

sarūpo'sau manonāśo jīvanmuktasya vidyate || 13||

annapūrṇā 4|
18

निदाघरूपनाशस्तु वर्तते देहमुक्तिके॥ १४॥

अन्नपूर्णा ४।१८

nidāgharūpanāśastu vartate dehamuktike || 14||

annapūrṇā 4|
18

चित्ते चैत्यदशाहीने या स्थितिः क्षीणचेतसाम्॥ १५॥

अन्नपूर्णा २।१२

citte caityadaśāhīne yā sthitiḥ kṣīṇacetasām || 15||

annapūrṇā 2|
12

सोच्यते शान्तकलना जाग्रत्येव सुषुप्तता॥ १६॥

अन्नपूर्णा २।१२

socyate śāntakalanā jāgratyeva suṣuptatā || 16||

annapūrṇā 2|
12

नैतज्जाग्रन्न च स्वप्नः सङ्कल्पानामभावनात्॥ १७॥

अन्नपूर्णा ५।१०९

naitajjāgranna ca svapnaḥ saṅkalpānāmabhāvanāt || 17||
annapūrṇā 5|
109

सुषुप्तभावो नाप्येतदभावाज्जडतास्थितेः॥ १८॥
अन्नपूर्णा ५।१०९
suṣuptabhāvo nāpyetadabhāvājjaḍatāsthiteḥ || 18||
annapūrṇā 5|
109

तत्त्वावबोध एवासौ वासनातृणपावकः॥ १९॥
महा ४।१२
tattvāvabodha evāsau vāsanātṛṇapāvakaḥ || 19||
mahā 4|12

प्रोक्तः समाधिशब्देन न तु तूष्णीमवस्थितिः॥ २०॥
महा ४।१२
proktaḥ samādhiśabdena na tu tūṣṇīmavasthitiḥ || 20||
mahā 4|12

निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः॥ २१॥
तारसार १।३७
nirvikāratayā vṛttyā brahmākāratayā punaḥ || 21||
tārasāra 1|37

वृत्तिविस्मरणं सम्यक्समाधिरभिधीयते॥ २२॥
तारसार १।३७
vṛttivismaraṇaṁ samyaksamādhirabhidhīyate || 22||

tārasāra 1|37

दृश्यासम्भवबोधेन रागद्वेषादितानवे॥ २३॥

महा ४।६२

dṛśyāsambhavabodhena rāgadveṣāditānave || 23||

mahā 4|62

रतिर्वलोदिता या सा समाधिरभिधीयते॥ २४॥

महा ४।६२

ratirvaloditā yā sā samādhirabhidhīyate || 24||

mahā 4|62

अहमेव परं ब्रह्म ब्रह्माहमिति संस्थितिः॥ २५॥

त्रिशिखिब्राह्मण १६०

ahameva paraṁ brahma brahmāhamiti saṁsthitiḥ || 25||

triśikhibrāhmaṇa 160

समाधिः स तु विज्ञेयः सर्ववृत्तिनिरोधकः॥ २६॥

त्रिशिखिब्राह्मण १६१

samādhiḥ sa tu vijñeyaḥ sarvavṛttinirodhakaḥ || 26||

triśikhibrāhmaṇa 161

समाधिः संविदुत्पत्तिः परजीवैकतां प्रति॥ २७॥

अन्नपूर्णा ५।७५

samādhiḥ saṁvidutpattiḥ parajīvaikatāṁ prati || 27||

annapūrṇā 5|

ध्यानस्य विस्मृतिः सम्यक्समाधिरभिधीयते॥ २८॥

त्रिशिखिब्राह्मण ३२

dhyānasya vismṛtiḥ samyaksamādhirabhidhīyate || 28||

triśikhibrāhmaṇa 32

समाहिता नित्यतृप्ता यथाभूतार्थदर्शिनी॥ २९॥

अन्नपूर्णा १।४८

samāhitā nityatṛptā yathābhūtārthadarśinī || 29||

annapūrṇā 1|
48

ब्रह्मन्समाधिशब्देन परा प्रज्ञोच्यते बुधैः॥ ३०॥

अन्नपूर्णा १।४८

brahmansamādhiśabdena parā prajñocyate budhaiḥ || 30||

annapūrṇā 1|
48

अक्षुब्धा निरहङ्कारा द्वन्द्वेष्वननुपातिनी॥ ३१॥

अन्नपूर्णा १।४९

akṣubdhā nirahaṅkārā dvandveṣvananupātinī || 31||

annapūrṇā 1|
49

ब्रह्मन्समाधि शब्देन मेरोः स्थिरतरा स्थितिः॥ ३२॥

अन्नपूर्णा १।४९

brahmansamādhi śabdena meroḥ sthiratarā sthitiḥ || 32||

annapūrṇā 1|
49

निश्चिता विगताऽभीष्टा हेयोपादेयवर्जिता॥ ३३॥

अन्नपूर्णा १।५०

niścitā vigatā'bhīṣṭā heyopādeyavarjitā || 33||

annapūrṇā 1|
50

ब्रह्मन्समाधि शब्देन परिपूर्णमनोगतिः॥ ३४॥

अन्नपूर्णा १।५०

brahmansamādhi śabdena paripūrṇamanogatiḥ || 34||

annapūrṇā 1|
50

सलिले सैन्धवं यद्वत्साम्यं भजति योगतः॥ ३५॥

वराह २।७५

salile saindhavaṁ yadvatsāmyaṁ bhajati yogataḥ || 35||

varāha 2|75

तथात्ममनसोरैक्यं समाधिरभिधीयते॥ ३६॥

सौभाग्यलक्ष्मी २।
१४

tathātmamanasoraikyaṁ samādhirabhidhīyate || 36||

saubhāgyalakṣmī 2|14

यत्समत्वं तयोरत्र जीवात्मपरमात्मनोः॥ ३७॥

सौभाग्यलक्ष्मी २।
१६

yatsamatvaṁ tayoratra jīvātmaparamātmanoḥ || 37||

saubhāgyalakṣmī 2|16

समस्तनष्टसङ्कल्पः समाधिरभिधीयते॥ ३८॥

सौभाग्यलक्ष्मी २।
१६

samastanaṣṭasaṅkalpaḥ samādhirabhidhīyate || 38||

saubhāgyalakṣmī 2|16

प्रभाशून्यं मनःशून्यं बुद्धिशून्यं निरामयम्॥ ३९॥

सौभाग्यलक्ष्मी २।
१७

prabhāśūnyaṁ manaḥśūnyaṁ buddhiśūnyaṁ nirāmayam || 39||

saubhāgyalakṣmī 2|17

सर्वशून्यं निराभासं समाधिरभिधीयते॥ ४०॥

सौभाग्यलक्ष्मी २।
१७

sarvaśūnyaṁ nirābhāsaṁ samādhirabhidhīyate || 40||

saubhāgyalakṣmī 2|17

ब्रह्माकारमनोवृत्तिप्रवाहोऽहङ्कृतिं विना॥ ४१॥

मुक्तिका २।५३

brahmākāramanovṛttipravāho'haṅkṛtiṁ vinā || 41||

muktikā 2|53

संप्रज्ञातसमाधिः स्याद्ध्यानाभ्यासप्रकर्षतः॥ ४२॥

मुक्तिका २।५४

saṁprajñātasamādhiḥ syāddhyānābhyāsaprakarṣataḥ || 42||

muktikā 2|54

प्रशान्तवृत्तिकं चित्तं परमानन्ददीपकम्॥ ४३॥

मुक्तिका २।५४

praśāntavṛttikaṁ cittaṁ paramānandadīpakam || 43||

muktikā 2|54

असंप्रज्ञातनामायं समाधिर्योगिनां प्रियः॥ ४४॥

मुक्तिका २५४

asaṁprajñātanāmāyaṁ samādhiryogināṁ priyaḥ || 44||

muktikā 254

स्वानुभूतिरसावेशाद्दृश्यशब्दावुपेक्षितुः॥ ४५॥

सरस्वतीरहस्य २।
२८

svānubhūtirasāveśāddṛśyaśabdāvupekṣituḥ || 45||

sarasvatīrahasya 2|28

निर्विकल्पसमाधिः स्यान्निवातस्थितदीपवत्॥ ४६॥

सरस्वतीरहस्य २।
२९
nirvikalpasamādhiḥ syānnivātasthitadīpavat || 46||

sarasvatīrahasya 2|29

प्रभाशून्यं मनःशून्यं बुद्धिशून्यं चिदात्मकम्॥ ४७॥

मुक्तिका २।५५

prabhāśūnyaṁ manaḥśūnyaṁ buddhiśūnyaṁ cidātmakam || 47||

muktikā 2|55

अतद्व्यावृत्तिरूपोऽसौ समाधिर्मुनिभावितः॥ ४८॥

मुक्तिका २।५५

atadvyāvṛttirūpo'sau samādhirmunibhāvitaḥ || 48||

muktikā 2|55

ऊर्ध्वपूर्णमधःपूर्णं मध्यपूर्णं शिवात्मकम्॥ ४९॥

मुक्तिका २।५६

ūrdhvapūrṇamadhaḥpūrṇaṁ madhyapūrṇaṁ śivātmakam || 49||

muktikā 2|56

साक्षाद्विधिमुखो ह्येष समाधिः पारमार्थिकः॥ ५०॥

मुक्तिका २।५६

sākṣādvidhimukho hyeṣa samādhiḥ pāramārthikaḥ || 50||

muktikā 2|56

इति सार्धान्तिकसमाधिवाक्यानि पञ्चाशत्॥ ५०॥

दशमं प्रकरणं समाप्तम्।

iti sārdhāntikasamādhivākyāni pañcāśat || 50||

daśamaṁ prakaraṇaṁ samāptam |

११ अथ सार्धान्तिकाष्टविधिस्वरूपवाक्येषु नानालिङ्गस्वरूपवाक्यानि॥ (३२)

11 atha sārdhāntikāṣṭavidhisvarūpavākyeṣu nānāliṅgasvarūpavākyāni || (32)

श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणः॥ १॥

केन २

śrotrasya śrotraṁ manaso mano yadvāco ha vācaṁ sa u prāṇasya prāṇaḥ || 1||

kena 2

यो वै भूमा तत्सुखम्॥ २॥

छान्दोग्य ७|२३|१

yo vai bhūmā tatsukham || 2||

chāndogya 7|23|1

यो वै भूमा तदमृतम्॥ ३॥

छान्दोग्य ७|२४|१

yo vai bhūmā tadamṛtam || 3||

chāndogya 7|24|1

नेति नेति नह्येतस्मादिति नेत्यन्यत्परमस्त्यथ नामधेय॰

सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेव सत्यम्॥ ४॥

बृहदारण्यक २।३।६

neti neti nahyetasmāditi netyanyatparamastyatha nāmadheya satyasya satyamiti prāṇā vai satyaṁ teṣāmeva satyam || 4||

bṛhadāraṇyaka 2|3|6

रातेर्दातुः परायणम्॥ ५॥

महा २।९

rāterdātuḥ parāyaṇam || 5||

mahā 2|9

स पर्यगाच्छुक्रमकायमव्रणमस्नाविर॰ शुद्धमपापविद्धम्॥ ६॥

ईश ८

sa paryagācchukramakāyamavraṇamsnāviraṁ śuddhamapāpaviddham || 6||

īśa 8

प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः॥ ७॥

माण्डुक्यकारिका १।२६

praṇavo hyaparaṁ brahma praṇavaśca paraḥ smṛtaḥ || 7||

māṇḍukyakārikā 1|26

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः॥ ८॥

आत्म ३१

na nirodho na cotpattirna baddho na ca sādhakaḥ || 8||

ātma 31

न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥ ९॥

अमृतबिन्दु ३।१०

na mumukṣurna vai mukta ityeṣā paramārthatā || 9||

amṛtabindu

3|10

अखण्डैकरसं शास्त्रमखण्डैकरसा त्रयी॥ १०॥

तेजोबिन्दु २।३

akhaṇḍaikarasaṁ śāstramakhaṇḍaikarasā trayī || 10||

tejobindu 2|3

अखण्डैकरसो देह अखण्डैकरसं मनः॥ ११॥

तेजोबिन्दु २।७

akhaṇḍaikaraso deha akhaṇḍaikarasaṁ manaḥ || 11||

tejobindu 2|7

अखण्डैकरसं सूत्रमखण्डैकरसो विराट्॥ १२॥

तेजोबिन्दु २।१४

akhaṇḍaikarasaṁ sūtramakhaṇḍaikaraso virāṭ || 12||

tejobindu 2|

14

अखण्डैकरसा विद्या ह्यखण्डैकरसोऽव्ययः॥ १३॥

तेजोबिन्दु २।८

akhaṇḍaikarasā vidyā hyakhaṇḍaikaraso'vyayaḥ || 13||

tejobindu 2|8

अखण्डैकरसं गोप्यमखण्डैकरसः शशी॥ १४॥

तेजोबिन्दु २।१६

akhaṇḍaikarasaṁ gopyamakhaṇḍaikarasaḥ śaśī || 14||

tejobindu 2|

16

अखण्डैकरसं क्षेत्रमखण्डैकरसा क्षमा॥ १५॥

तेजोबिन्दु २।१७

akhaṇḍaikarasaṁ kṣetramakhaṇḍaikarasā kṣamā || 15||

tejobindu 2|

17

अखण्डैकरसास्तारा अखण्डैकरसो रविः॥ १६॥

तेजोबिन्दु २।१७

akhaṇḍaikarasāstārā akhaṇḍaikaraso raviḥ || 16||

tejobindu 2|

17

अखण्डैकरसो ज्ञाता अखण्डैकरसा स्थितिः॥ १७॥

तेजोबिन्दु २।१२

akhaṇḍaikaraso jñātā akhaṇḍaikarasā sthitiḥ || 17||

tejobindu 2|

12

अखण्डैकरसा माता अखण्डैकरसः पिता॥ १८॥

तेजोबिन्दु २।१३

akhaṇḍaikarasā mātā akhaṇḍaikarasaḥ pitā || 18||

tejobindu 2|
13

अखण्डैकरसो राजा अखण्डैकरसं पुरम्॥ १९॥

तेजोबिन्दु २।१९

akhaṇḍaikaraso rājā akhaṇḍaikarasaṁ puram || 19||

tejobindu 2|
19

अखण्डैकरसं तारमखण्डैकरसो जपः॥ २०॥

तेजोबिन्दु २।२०

akhaṇḍaikarasaṁ tāramakhaṇḍaikaraso japaḥ || 20||

tejobindu 2|
20

सर्ववर्जितचिन्मात्रं त्वत्ता मत्ता च चिन्मयम्॥ २१॥

तेजोबिन्दु २।२६

sarvavarjitacinmātraṁ tvattā mattā ca cinmayam || 21||

tejobindu 2|
26

आदिरन्तं च चिन्मात्रं गुरुशिष्यादि चिन्मयम्॥ २२॥

तेजोबिन्दु २।३१

ādirantaṁ ca cinmātraṁ guruśiṣyādi cinmayam || 22||

tejobindu 2|
31

दृग्दृश्यं यदि चिन्मात्रमस्ति चेच्चिन्मयं सदा॥ २३॥

तेजोबिन्दु २।३१

dṛgdṛśyaṁ yadi cinmātramasti ceccinmayaṁ sadā || 23||

tejobindu 2|

31

सर्वाश्चर्यं च चिन्मात्रं देहश्चिन्मात्रमेव हि॥ २४॥

तेजोबिन्दु २।३२

sarvāścaryaṁ ca cinmātraṁ dehaścinmātrameva hi || 24||

tejobindu 2|

32

अहं त्वं चैव चिन्मात्रं मूर्तामूर्तादि चिन्मयम्॥ २५॥

तेजोबिन्दु २।३३

ahaṁ tvaṁ caiva cinmātraṁ mūrtāmūrtādi cinmayam || 25||

tejobindu 2|

33

पुण्यं पापं च चिन्मात्रं जीवश्चिन्मात्रविग्रहः॥ २६॥

तेजोबिन्दु २।३३

puṇyaṁ pāpaṁ ca cinmātraṁ jīvaścinmātravigrahaḥ || 26||

tejobindu 2|

33

देहत्रयविहीनत्वात्कालत्रयविवर्जनात्॥ २७॥

तेजोबिन्दु ५।१७

dehatrayavihīnatvātkālatrayavivarjanāt || 27||

tejobindu 5|

17

जीवत्रयगुणाभावात्तापत्रयविवर्जनात्॥ २८॥

तेजोबिन्दु ५।१८

jīvatrayaguṇābhāvāttāpatrayavivarjanāt || 28||

tejobindu 5|

18

लोकत्रयविहीनत्वात्सर्वमात्मेति शासनात्॥ २९॥

तेजोबिन्दु ५।१८

lokatrayavihīnatvātsarvamātmeti śāsanāt || 29||

tejobindu 5|

18

चित्ताभावाच्चिन्तनीयं देहाभावाज्जरा न च॥ ३०॥

तेजोबिन्दु ५।१९

cittābhāvāccintanīyaṁ dehābhāvājjarā na ca || 30||

tejobindu 5|

19

पादाभावाद्गतिर्नास्ति हस्ताभावात्क्रिया न च॥ ३१॥

तेजोबिन्दु ५।१९

pādābhāvādgatirnāsti hastābhāvātkriyā na ca || 31||

tejobindu 5|

19

मृत्युर्नास्ति जनाभावाद्बुद्ध्यभावात्सुखादिकम्॥ ३२॥

तेजोबिन्दु ५।२०

mṛtyurnāsti janābhāvādbuddhyabhāvātsukhādikam || 32||

tejobindu 5|
20

इति सार्धान्तिकनानालिङ्गस्वरूपवाक्यानि द्वात्रिंशत्॥ ३२॥
एकादशं प्रकरणं समाप्तम्।

iti sārdhāntikanānāliṅgasvarūpavākyāni dvātriṁśat || 32||
ekādaśaṁ prakaraṇaṁ samāptam |

१२ अथ सार्धान्तिकपुंलिङ्गस्वरूपवाक्यानि। (३०)
12 atha sārdhāntikapuṁliṅgasvarūpavākyāni | (30)

स एषोऽकलोऽमृतः॥ १॥
प्रश्न ६।५

sa eṣo'kalo'mṛtaḥ || 1||
praśna 6|5

नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न
प्रज्ञंनाप्रज्ञमदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यम्-
अव्यपदेश्यमैकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं
चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः॥ २॥
रामोत्तरतापिनी ३।
५

nāntaḥprajñaṁ na bahiḥprajñaṁ nobhayataḥprajñaṁ na prajñānaghanaṁ na
prajñaṁnāprajñamadṛśyamavyavahāryamagrāhyamalakṣaṇamacintyam-
avyapadeśyamaikātmapratyayasāraṁ prapañcopaśamaṁ śāntaṁ

śivamadvaitaṁ

caturthaṁ manyante sa ātmā sa vijñeyaḥ || 2||

rāmottaratāpinī

3|5

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैतः॥ ३॥

माण्डुक्य १२

amātraścaturtho'vyavahāryaḥ prapañcopaśamaḥ śivo'dvaitaḥ || 3||

māṇḍukya 12

यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा॥ ४॥

छान्दोग्य ७।२४।१

yatra nānyatpaśyati nānyacchṛṇoti nānyadvijānāti sa bhūmā || 4||

chāndogya 7|

24|1

स एष नेतिनेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गोन
हि सज्यतेऽसितो न व्यथते न रिष्यति॥ ५॥

बृहदारण्यक ३।९।

२६

sa eṣa netinetyātmā'gṛhyo na hi gṛhyate'śīryo na hi

śīryate'saṅgona

hi sajyate'sito na vyathate na riṣyati || 5||

bṛhadāraṇyaka

3|9|26

रसघन एवैवं वाऽरेयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव॥ ६॥

बृहदारण्यक ४।५।

१३
rasaghana evaivaṁ vā'reyamātmānantaro'bāhyaḥ kṛtsnaḥ
prajñānaghana eva || 6||

bṛhadāraṇyaka

4|5|13

तस्मान्मनो विलीने मनसि गते सङ्कल्पविकल्पे दग्धे पुण्यपापे सदाशिवः
ॐ शक्त्यात्मकः सर्वत्रावस्थितिः स्वयंज्योतिः शुद्धो नित्यो निरञ्जनः
शान्ततमः प्रकाशयति॥ ७॥

हंस २

tasmānmano vilīne manasi gate saṅkalpavikalpe dagdhe
puṇyapāpe sadāśivaḥ
om śaktyātmakaḥ sarvatrāvasthitiḥ svayaṁjyotiḥ śuddho nityo
nirañjanaḥ
śāntatamaḥ prakāśayati || 7||

haṁsa 2

एष शुद्धः पूतः शून्यः शान्तोऽप्राणोऽनीशात्मानन्तोऽक्षयः
स्थिरः शाश्वतोऽजः स्वतन्त्रः स्वे महिम्नि तिष्ठति॥ ८॥

मैत्रायणी २।४ ६।

२८

eṣa śuddhaḥ pūtaḥ śūnyaḥ śānto'prāṇo'nīśātmānanto'kṣayaḥ
sthiraḥ śāśvato'jaḥ svatantraḥ sve mahimni tiṣṭhati || 8||

maitrāyaṇī 2|

4 6|28

चक्षुषो द्रष्टा श्रोत्रस्य द्रष्टा मनसो द्रष्टा वाचो द्रष्टा
बुद्धेर्द्रष्टा प्राणस्य द्रष्टा तमसो द्रष्टा सर्वस्य द्रष्टा
ततः सर्वस्मादन्यो विलक्षणः सद्घनोऽयं चिद्घन आनन्दघन

एवैकरसोऽव्यवहार्यः॥ ९॥

नृसिंहतापिनी २।
२।१

cakṣuṣo draṣṭā śrotrasya draṣṭā manaso draṣṭā vāco draṣṭā buddherdraṣṭā prāṇasya draṣṭā tamaso draṣṭā sarvasya draṣṭā tataḥ sarvasmādanyo vilakṣaṇaḥ sadghano'yaṁ cidghana ānandaghana
evaikaraso'vyavahāryaḥ || 9||

nṛsiṁhatāpinī
2|2|1

सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वयानन्दः
परः प्रत्यगेकरसः॥ १०॥

नृसिंहतापिनी २।९।
१

sanmātro nityaḥ śuddho buddhaḥ satyo mukto nirañjano vibhuradvayānandaḥ
paraḥ pratyagekarasaḥ || 10||

nṛsiṁhatāpinī
2|9|1

अदृष्टोऽव्यवहार्योऽप्यल्पो नाल्पः साक्ष्यविशेषःसर्वज्ञोऽनन्तोऽभिन्नोऽद्वयो
विदिताविदितात्परः॥ ११॥

नृसिंहतापिनी २।९।
१

adṛṣṭo'vyavahāryo'pyalpo nālpaḥ sākṣyaviśeṣaḥsarvajño'nanto'bhinno'dvayo
viditāviditātparaḥ || 11||

nṛsiṁhatāpinī
2|9|1

अद्वैतपरमानन्दो विभुर्नित्यो निष्कलङ्को निर्विकल्पो निरञ्जनो निराख्यातः
शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित्॥ १२॥

त्रिपाद्विभूतिमहानारायण १

advaitaparamānando vibhurnityo niṣkalaṅko nirvikalpo nirañjano nirākhyātaḥ
śuddho deva eko nārāyaṇo na dvitīyo'sti kaścit || 12||

tripādvibhūtimahānārāyaṇa 1

अचक्षुर्विश्वतश्चक्षुरकर्णो विश्वतःकर्ण अपादो विश्वतःपाद
अपाणिर्विश्वतःपाणिरहमशिरा विश्वतःशिरा विद्यामात्रैकसंश्रयो विद्यारूपः॥ १३॥

भस्मजाबाल २

acakṣurviśvataścakṣurakarṇo viśvataḥkarṇa apādo viśvataḥpāda
apāṇirviśvataḥpāṇirahamaśirā viśvataḥśirā vidyāmātraikasaṁśrayo vidyārūpaḥ || 13||

bhasmajābāla
2

दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः॥ १४॥

मुण्डक २।१।२

divyo hyamūrtaḥ puruṣaḥ sabāhyābhyantaro hyajaḥ || 14||

muṇḍaka 2|1|
2

अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः॥ १५॥

मुण्डक २।१।२

aprāṇo hyamanāḥ śubhro hyakṣarātparataḥ paraḥ || 15||

muṇḍaka 2|1|
2

अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः॥ १६॥

माण्डुक्यकारिका
१।१०

advaitaḥ sarvabhāvānāṁ devasturyo vibhuḥ smṛtaḥ || 16||

māṇḍukyakārikā 1|10

अपूर्वोऽनन्तरोऽबाह्यो न परः प्रणवोऽव्ययः॥ १७॥

माण्डुक्यकारिका
१।२६

apūrvo'nantaro'bāhyo na paraḥ praṇavo'vyayaḥ || 17||

māṇḍukyakārikā 1|26

अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः॥ १८॥

माण्डुक्यकारिका
१।२९

amātro'nantamātraśca dvaitasyopaśamaḥ śivaḥ || 18||

māṇḍukyakārikā 1|29

कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥ १९॥

ब्रह्म

karmādhyakṣaḥ sarvabhūtādhivāsaḥ sākṣī cetā kevalo nirguṇaśca || 19||

brahma

सर्वसङ्कल्परहितः सर्वनादमयः शिवः॥ २०॥

तेजोबिन्दु ५।२

sarvasaṅkalparahitaḥ sarvanādamayaḥ śivaḥ || 20||

tejobindu 5|2

सर्ववर्जितचिन्मात्रः सर्वानन्दमयः परः॥ २१॥

तेजोबिन्दु ५।२

sarvavarjitacinmātraḥ sarvānandamayaḥ paraḥ || 21||

tejobindu 5|2

सर्वानुभवनिर्मुक्तः सर्वध्यानविवर्जितः॥ २२॥

तेजोबिन्दु ५।३

sarvānubhavanirmuktaḥ sarvadhyānavivarjitaḥ || 22||

tejobindu 5|3

आत्माऽनात्मविवेकादिभेदाभेदविवर्जितः॥ २३॥

तेजोबिन्दु ५।४

ātmā'nātmavivekādibhedābhedavivarjitaḥ || 23||

tejobindu 5|4

महावाक्यार्थतो दूरो ब्रह्मास्मीत्यतिदूरतः॥ २४॥

तेजोबिन्दु ५।५

mahāvākyārthato dūro brahmāsmītyatidūrataḥ || 24||

tejobindu 5|5

तच्छब्दवर्ज्यस्त्वंशब्दहीनो वाक्यार्थवर्जितः॥ २५॥

तेजोबिन्दु ५।६

tacchabdavarjyastvaṁśabdahīno vākyārthavarjitaḥ || 25||

tejobindu 5|6

क्षराक्षरविहीनो यो नादान्तर्ज्योतिरेव सः॥ २६॥

तेजोबिन्दु ५।६

kṣarākṣaravihīno yo nādāntarjyotireva saḥ || 26||

tejobindu 5|6

अखण्डैकरसो वाहमानन्दोऽस्मीतिवर्जितः॥ २७॥

तेजोबिन्दु ५।७

akhaṇḍaikaraso vāhamānando'smītivarjitaḥ || 27||

tejobindu 5|7

दृश्यदर्शननिर्मुक्तः केवलामलरूपवान्॥ २८॥

महा ६।७९

dṛśyadarśananirmuktaḥ kevalāmalarūpavān || 28||

mahā 6|79

नित्योदितो निराभासो द्रष्टा साक्षी चिदात्मकः॥ २९॥

महा ६।८०

nityodito nirābhāso draṣṭā sākṣī cidātmakaḥ || 29||

mahā 6|80

स एव विदितादन्यस्तथैवाविदितादपि॥ ३०॥

पाशुपतब्रह्म १३

sa eva viditādanyastathaivāviditādapi || 30||

pāśupatabrahma 13

इति सार्धान्तिकपुंलिङ्गस्वरूपवाक्यानि त्रिंशत्॥ ३०॥

द्वादशं प्रकरणं समाप्तम्

iti sārdhāntikapuṁliṅgasvarūpavākyāni triṁśat || 30||

dvādaśaṁ prakaraṇaṁ samāptam

१३ अथ सार्धान्तिकस्त्रीलिङ्गस्वरूपवाक्यानि। (१२)

13 atha sārdhāntikastrīliṅgasvarūpavākyāni | (12)

अलौकिकपरमानन्दलक्षणाखण्डामिततेजोराशिः॥ १॥

त्रिपाद्विभूतिमहानारायण ८

alaukikaparamānandalakṣaṇākhaṇḍāmitatejorāśiḥ || 1||

tripādvibhūtimahānārāyaṇa 8

भावाभावकलाविनिर्मुक्ता चिद्विद्याऽद्वितीयब्रह्मसंवित्तिः
सच्चिदानन्दलहरी महात्रिपुरसुन्दरी बहिरन्तरप्रविश्य
स्वयमेकैव विभाति॥ २॥

बह्वृचा

bhāvābhāvakalāvinirmuktā cidvidyā'dvitīyabrahmasaṁvittiḥ
saccidānandalaharī mahātripurasundarī bahirantarapraviśya
svayamekaiva vibhāti || 2||

सर्वसङ्कल्परहिता सर्वसंज्ञाविवर्जिता॥ ३॥

महा ५।१००

sarvasaṅkalparahitā sarvasaṁjñāvivarjitā || 3||

mahā 5|100

सैषा चिदविनाशात्मा स्वात्मेत्यादिकृता भिधा॥ ४॥

महा ५।१००

saiṣā cidavināśātmā svātmetyādikṛtā bhidhā || 4||

mahā 5|100

आकाशशतभागाच्छा ज्ञेषु निष्कलरूपिणी॥ ५॥

महा ५।१०१

ākāśaśatabhāgācchā jñeṣu niṣkalarūpiṇī || 5||

mahā 5|101

नास्तमेति न चोदेति नोत्तिष्ठति न तिष्ठति॥ ६॥

महा ५।१०२

nāstameti na codeti nottiṣṭhati na tiṣṭhati || 6||

mahā 5|102

न च याति न चायाति न च नेह चेह चित्॥ ७॥

महा ५।१०२

na ca yāti na cāyāti na ca neha ceha cit || 7||

mahā 5|102

सैषा चिदमलाकारा निर्विकल्पा निरास्पदा॥ ८॥

महा ५।१०३

saiṣā cidamalākārā nirvikalpā nirāspadā || 8||

mahā 5|103

महाचिदेकैवेहास्ति महासत्तेति चोच्यते॥ ९॥

अन्नपूर्णा ५।५५

mahācidekaivehāsti mahāsatteti cocyate || 9||

annapūrṇā 5|

55

निष्कलङ्का समा शुद्धा निरहङ्काररूपिणी॥ १०॥

अन्नपूर्णा ५।५५

niṣkalaṅkā samā śuddhā nirahaṅkārarūpiṇī || 10||

annapūrṇā 5|

55

सकृद्विभाता विमला नित्योदयवती समा॥ ११॥

अन्नपूर्णा ५।५६

sakṛdvibhātā vimalā nityodayavatī samā || 11||

annapūrṇā 5|

56

सा ब्रह्मपरमात्मेति नामभिः परिगीयते॥ १२॥

अन्नपूर्णा ५।५६

sā brahmaparamātmeti nāmabhiḥ parigīyate || 12||

annapūrṇā 5|

56

इति स्त्रीलिङ्गस्वरूपवाक्यानि द्वादश॥ १२॥
त्रयोदशं प्रकरणं समाप्तम्।

iti strīliṅgasvarūpavākyāni dvādaśa || 12||
trayodaśaṁ prakaraṇaṁ samāptam |

१४ अथ सार्धान्तिकनपुंसकलिङ्गस्वरूपवाक्यानि॥(३९)
14 atha sārdhāntikanapuṁsakaliṅgasvarūpavākyāni ||(39)

अन्यदेव तद्विदितादथो अविदितादधि॥ १॥
केन ४
anyadeva tadviditādatho aviditādadhi || 1||
kena 4

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्॥ २॥
मुण्डक १।१।६
yattadadreśyamagrāhyamagotramavarṇamacakṣuḥśrotraṁ tadapāṇipādam || 2||
muṇḍaka 1|1|
6

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्॥ ३॥
पैङ्गल १
sadeva somyedamagra āsīdekamevādvitīyam || 3||
paiṅgala 1

अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाश-
मसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राण-

ममुखममात्रमनन्तरमबाह्यम्॥ ४॥

बृहदारण्यक ३।७।
८

asthūlamanaṇvahrasvamadīrghamalohitamasnehamacchāyamatamo'v
āyvanākāśa-
masaṅgamarasamagandhamacakṣuṣkamaśrotramavāgamano'tejaska
maprāṇa-
mamukhamamātramanantaramabāhyam || 4||

bṛhadāraṇyaka
3|7|8

नित्यं शुद्धं मुक्तं सत्यं सूक्ष्मं परिपूर्णमद्वयं सदानन्दचिन्मात्रं
पुरतः सुविभातमद्वैतमचिन्त्यमलिङ्गं स्वप्रकाशमानन्दघनम्॥ ५॥

नृसिंहतापिनी २।९।
१

nityaṁ śuddhaṁ muktaṁ satyaṁ sūkṣmaṁ paripūrṇamadvayaṁ
sadānandacinmātraṁ
purataḥ suvibhātamadvaitamacintyamaliṅgaṁ
svaprakāśamānandaghanam || 5||

nṛsiṁhatāpinī
2|9|1

एतद्ध्यशब्दमस्पर्शमरूपमरसमगन्धमवक्तव्यमदातव्यमगन्तव्य-
मविसर्जयितव्यमनानन्दयितव्यममन्तव्यमबोद्धव्यमनहङ्कर्तयितव्य-
मचेतयितव्यमप्राणमितव्यमपानयितव्यमव्यानयितव्यमनुदानयितव्य-
मसमानयितव्यमनिन्द्रियमविषयमकरणमलक्षणमसङ्गमगुण-
मविक्रियमव्यपदेश्यमसत्त्वमरजस्कमतमस्कममायमभयमप्यौपनिषदमेव
सुविभातं सकृद्विभातं पुरतोऽस्मात्सुविभातमद्वयम्॥ ६॥

नृसिंहतापिनी २।९।
१
etaddhyaśabdamasparśamarūpamarasamagandhamavaktavyamadāta
vyamagantavya-
mavisarjayitavyamanānandayitavyamamantavyamaboddhavyamanaha
ṅkartayitavya-
macetayitavyamaprāṇamitavyamapānayitavyamavyānayitavyamanudā
nayitavya-
masamānayitavyamanindriyamaviṣayamakaraṇamalakṣaṇamasaṅgam
aguṇa-
mavikriyamavyapadeśyamasattvamarajaskamatamaskamamāyamabha
yamapyaupaniṣadameva
suvibhātaṁ sakṛdvibhātaṁ purato'smātsuvibhātamadvayam || 6||
nṛsiṁhatāpinī
2|9|1

अनिर्वचनीयं ज्योतिः सर्वव्यापकं निरतिशयानन्दलक्षणं परमाकाशम्॥ ७॥
मण्डलब्राह्मण ४।१
anirvacanīyaṁ jyotiḥ sarvavyāpakaṁ niratiśayānandalakṣaṇaṁ paramākāśam || 7||

maṇḍalabrāhmaṇa 4|1

तद्ब्रह्म तापत्रयातीतं षट्कोशविनिर्मुक्तं षडूर्मिवर्जितं पञ्चकोशातीतं षड्भावविकारशून्यमेवमादिसर्वं विलक्षणम्॥ ८॥
मुद्गल ४
tadbrahma tāpatrayātītaṁ ṣaṭkośavinirmuktaṁ ṣaḍūrmivarjitaṁ pañcakośātītaṁ

ṣaḍbhāvavikāraśūnyamevamādisarvaṁ vilakṣaṇam || 8||

mudgala 4

???? निरुपप्लवं ज्योतिराभ्यन्तरं सर्वमायातीतमप्रत्यगेकरसमद्वितीयम् ॥ ९॥????

???? nirupaplavaṁ jyotirābhyantaraṁ
sarvamāyātītamapratyagekarasamadvitīyam || 9||????
????

???? तज्ज्योतिरेकमद्वितीयं सर्वकल्पनातीतं ध्रुवमक्षरमेकं सदा
चकास्ति सच्चिदानन्दम्॥ १०॥ ????

???? tajjyotirekamadvitīyaṁ sarvakalpanātītaṁ
dhruvamakṣaramekaṁ sadā
cakāsti saccidānandam || 10|| ????
????

यत्तत्सत्यं विज्ञानमानन्दं निष्क्रियं निरञ्जनं सर्वगतं सुसूक्ष्मं
सर्वतोमुखनिर्देश्यममृतं निष्कलम् रूपम्॥ ११॥

शाण्डिल्य ३।१

yattatsatyaṁ vijñānamānandaṁ niṣkriyaṁ nirañjanaṁ sarvagataṁ
susūkṣmaṁ
sarvatomukhanirdeśyamamṛtaṁ niṣkalam rūpam|| 11||

śāṇḍilya 3|1

एकमद्वैतं निष्कलं निष्क्रियं शान्तं निरतिशयमनामयमद्वैतं
चतुर्थं ब्रह्मविष्णुरुद्रातीतमेकमाशास्यम्॥ १२॥

भस्मजाबाल १

ekamadvaitaṁ niṣkalaṁ niṣkriyaṁ śāntaṁ
niratiśayamanāmayamadvaitaṁ

caturthaṁ brahmaviṣṇurudrātītamekamāśāsyam || 12||

bhasmajābāla 1

अद्वयमनाद्यन्तमशेषवेदवेदान्तवेद्यमनिर्देश्यमनिरुक्तमप्रच्यव-
माशास्यमद्वैतं चतुर्थं सर्वाधारमनाधारमनिरीक्ष्यम्॥ १३॥

भस्मजाबाल २

advayamanādyantamaśeṣavedavedāntavedyamanirdeśyamaniruktamapracyava-
māśāsyamadvaitaṁ caturthaṁ sarvādhāramanādhāramanirīkṣyam || 13||

bhasmajābāla 2

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसन्नित्यमगन्धवच्च यत्॥ १४॥

कठ १|३|१५

aśabdamasparśamarūpamavyayaṁ tathā'rasannityamagandhavacca yat || 14||

kaṭha 1|3|15

परं विज्ञानाद्यद्वरिष्ठं प्रजानां यदर्चिमद्यदणुभ्योऽणु च॥ १५॥

मुण्डक २|२|१-२

paraṁ vijñānādyadvariṣṭhaṁ prajānāṁ yadarcimadyadaṇubhyo'ṇu ca || 15||

muṇḍaka 2|2|1-2

बृहच्च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति॥ १६॥

मुण्डक ३।१।४

bṛhacca taddivyamacintyarūpaṁ sūkṣmācca tatsūkṣmataraṁ vibhāti || 16||

muṇḍaka 3|1|
4

एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किञ्चित्॥ १७॥

नारदपरिव्राजक ९।
११

etajjñeyaṁ nityamevātmasaṁsthaṁ nātaḥ paraṁ veditavyaṁ hi kiñcit || 17||

nāradaparivrājaka 9|11

अघोषमव्यञ्जनमस्वरं च यत्तालुकण्ठोष्ठमनासिकं च यत्॥ १८॥

अमृतनाद २५

aghoṣamavyañjanamasvaraṁ ca yattālukaṇṭhoṣṭhamanāsikaṁ ca yat || 18||

amṛtanāda
25

अरेफजातमुभयोष्मवर्जितं यदक्षरं न क्षरते कथञ्चित्॥ १९॥

अमृतनाद २५

arephajātamubhayoṣmavarjitaṁ yadakṣaraṁ na kṣarate kathañcit || 19||

amṛtanāda
25

अगोचरं मनोवाचामवधूतादिसंप्लवम्॥ २०॥

मैत्रेयी १।९

agocaraṁ manovācāmavadhūtādisaṁplavam || 20||

maitreyī 1|9

सत्तामात्रप्रकाशैकप्रकाशं भावनातिगम्॥ २१॥

मैत्रेयी १।९

sattāmātraprakāśaikaprakāśaṁ bhāvanātigam || 21||

maitreyī 1|9

अहेयमनुपादेयमसामान्यविशेषणम्॥ २२॥

मैत्रेयी १।१०

aheyamanupādeyamasāmānyaviśeṣaṇam || 22||

maitreyī 1|10

ध्रुवं स्तिमितगम्भीरं न तेजो न तमस्ततम्॥ २३॥

महा २।६५

dhruvaṁ stimitagambhīraṁ na tejo na tamastatam || 23||

mahā 2|65

निष्कलं निर्मलं शान्तं सर्वातीतं निरामयम्॥ २४॥

योगशिखा १।५

niṣkalaṁ nirmalaṁ śāntaṁ sarvātītaṁ nirāmayam || 24||

yogaśikhā 1|5

न शून्यं नापि चाकारि न दृश्यं नापि दर्शनम्॥ २५॥

महा २।६६

na śūnyaṁ nāpi cākāri na dṛśyaṁ nāpi darśanam || 25||

mahā 2|66

चिन्मात्रं चैत्यरहितमनन्तमजरं शिवम्॥ २६॥

महा २।६८

cinmātraṁ caityarahitamanantamajaraṁ śivam || 26||

mahā 2|68

चैत्यानुपातरहितं सामान्येन च सर्वगम्॥ २७॥

महा ४।११८

caityānupātarahitaṁ sāmānyena ca sarvagam || 27||

mahā 4|118

अनामयमनाभासमनामकमकारणम्॥ २८॥

महा ५।४५

anāmayamanābhāsamanāmakamakāraṇam || 28||

mahā 5|45

मनोवचोभ्यामग्राह्यं पूर्णात्पूर्णं सुखात्सुखम्॥ २९॥

महा ५।४६

manovacobhyāmagrāhyaṁ pūrṇātpūrṇaṁ sukhātsukham || 29||

mahā 5|46

द्रष्टृदर्शनदृश्यादिवर्जितं तदिदं पदम्॥ ३०॥

महा ५।४८

draṣṭṛdarśanadṛśyādivarjitaṁ tadidaṁ padam || 30||

mahā 5|48

शुद्धं सूक्ष्मं निराकारं निर्विकारं निरञ्जनम्॥ ३१॥

योगशिखा २।१७

śuddhaṁ sūkṣmaṁ nirākāraṁ nirvikāraṁ nirañjanam || 31||

yogaśikhā 2|
17

अप्रमाणमनिर्देश्यमप्रमेयमतीन्द्रियम्॥ ३२॥

योगशिखा ३।१८

apramāṇamanirdeśyamaprameyamatīndriyam || 32||

yogaśikhā 3|
18

निर्लेपकं निरापायं कूटस्थमचलं ध्रुवम्॥ ३३॥

योगशिखा ३।२१

nirlepakaṁ nirāpāyaṁ kūṭasthamacalaṁ dhruvam || 33||

yogaśikhā 3|
21

सद्घनं चिद्घनं नित्यमानन्दघनमव्ययम्॥ ३४॥

अध्यात्म ६१

sadghanaṁ cidghanaṁ nityamānandaghanamavyayam || 34||

adhyātma 61

प्रत्यगेकरसं पूर्णमनन्तं विश्वतोमुखम्॥ ३५॥

अध्यात्म ६१

pratyagekarasaṁ pūrṇamanantaṁ viśvatomukham || 35||

adhyātma 61

अहेयमनुपादेयमनादेयमनाश्रयम्॥ ३६॥

अध्यात्म ६२

aheyamanupādeyamanādeyamanāśrayam || 36||

adhyātma 62

शुद्धं बुद्धं सदा मुक्तमनामकमरूपकम्॥ ३७॥

तेजोबिन्दु ६।७०

śuddhaṁ buddhaṁ sadā muktamanāmakamarūpakam || 37||

tejobindu 6|
70

सङ्कल्पसङ्क्षयवशाद्गलिते तु चित्ते संसारमोहमिहिका गलिता भवन्ति॥ ३८॥

महा ५।५३

saṅkalpasaṅkṣayavaśādgalite tu citte saṁsāramohamihikā galitā bhavanti || 38||

mahā 5|53

स्वच्छं विभाति शरदीव खमागतायां चिन्मात्रमेकमजमाद्यमनन्तमन्तः॥ ३९॥

महा ५।५३

svacchaṁ vibhāti śaradīva khamāgatāyāṁ cinmātramekamajamādyamanantamantaḥ || 39||

mahā 5|53

इति सार्धान्तिकनपुंसकलिङ्गस्वरूपवाक्यान्येकोनचत्वारिंशत्॥३९॥

चतुर्दशं प्रकरणं समाप्तम्।

iti sārdhāntikanapuṁsakaliṅgasvarūpavākyānyekonacatvāriṁśat || 39||

caturdaśaṁ prakaraṇaṁ samāptam |

१५ अथ सार्धान्तिकात्मस्वरूपमहावाक्यानि। (४०)

15 atha sārdhāntikātmasvarūpamahāvākyāni | (40)

आकाशो ह वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा॥ १॥

छान्दोग्य ८।१४।१

ākāśo ha vai nāma nāmarūpayornirvahitā te yadantarā tadbrahma tadamṛtaṁ sa ātmā || 1||

chāndogya 8|
14|1

इदं सर्वं यदयमात्मा॥ २॥

नृसिंहतापिनी २।
५।१

idaṁ sarvaṁ yadayamātmā || 2||

nṛsiṁhatāpinī
2|5|1

चिदेकरसो ह्ययमात्मा॥ ३॥

नृसिंहतापिनी २।
२।१

cidekaraso hyayamātmā || 3||

nṛsiṁhatāpinī
2|2|1

अतो ह्ययमात्मा॥ ४॥

नृसिंहतापिनी २।
२।१

ato hyayamātmā || 4||

nṛsiṁhatāpinī

2|2|1

अनुज्ञाता ह्ययमात्मा॥ ५॥

नृसिंहतापिनी २।

८।१

anujñātā hyayamātmā || 5||

nṛsiṁhatāpinī

2|8|1

अनुज्ञैकरसो ह्ययमात्मा॥ ६॥

नृसिंहतापिनी २।

८।१

anujñaikaraso hyayamātmā || 6||

nṛsiṁhatāpinī

2|8|1

अविकल्पो ह्ययमात्मा॥ ७॥

नृसिंहतापिनी २।

८।१

avikalpo hyayamātmā || 7||

nṛsiṁhatāpinī

2|8|1

देहादेः परतरत्वाद्ब्रह्मैव परमात्मा॥ ८॥

निरलम्ब

dehādeḥ parataratvādbrahmaiva paramātmā || 8||

niralamba

अखण्डैकरसो ह्ययमात्मा॥ ९॥

तेजोबिन्दु २।६

akhaṇḍaikaraso hyayamātmā || 9||

tejobindu 2|6

निर्गुणः साक्षीभूतो निष्क्रियो निरवयवात्मा॥ १०॥

आत्म १

nirguṇaḥ sākṣībhūto niṣkriyo niravayavātmā || 10||

ātma 1

विरजः पर आकाशादज आत्मा महान् ध्रुवः॥ ११॥

बृहदारण्यक ४।४।
२०

virajaḥ para ākāśādaja ātmā mahān dhruvaḥ || 11||

bṛhadāraṇyaka
4|4|20

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा॥ १२॥

श्वेताश्वतर ६।११

eko devaḥ sarvabhūteṣu gūḍhaḥ sarvavyāpī sarvabhūtāntarātmā || 12||

śvetāśvatara
6|11

निःशब्दं परमं ब्रह्म परमात्मा समीर्यते॥ १३॥

नाद्बिन्दु ४८

niḥśabdaṁ paramaṁ brahma paramātmā samīryate || 13||
nādbindu 48

सकले निष्कले भावे सर्वत्रात्माव्यवस्थितः॥ १४॥
ध्यानबिन्दु ८
sakale niṣkale bhāve sarvatrātmāvyavasthitaḥ || 14||
dhyānabindu
8

सर्वदा सर्वकृत्सर्वः परमात्मेत्युदाहृतः॥ १५॥
महा ४।५६
sarvadā sarvakṛtsarvaḥ paramātmetyudāhṛtaḥ || 15||
mahā 4|56

अनाद्यन्तावभासात्मा परमात्मेह विद्यते॥ १६॥
अन्नपूर्णा २।३४
anādyantāvabhāsātmā paramātmeha vidyate || 16||
annapūrṇā 2|
34

नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः॥ १७॥
अन्नपूर्णा ५।७५
nityaḥ sarvagato hyātmā kūṭastho doṣavarjitaḥ || 17||
annapūrṇā 5|
75

तत्परः परमात्मा च श्रीरामः पुरुषोत्तमः॥ १८॥
तारसार २।४

tatparaḥ paramātmā ca śrīrāmaḥ puruṣottamaḥ || 18||

tārasāra 2|4

सर्वकारणकार्यात्मा कार्यकारणवर्जितः॥ १९॥

तेजोबिन्दु ५।१

sarvakāraṇakāryātmā kāryakāraṇavarjitaḥ || 19||

tejobindu 5|1

सर्वातीतस्वभावात्मा नादान्तर्ज्योतिरेव सः॥ २०॥

तेजोबिन्दु ५।७

sarvātītasvabhāvātmā nādāntarjyotireva saḥ || 20||

tejobindu 5|7

निर्विकल्पस्वरूपात्मा सविकल्पविवर्जितः॥ २१॥

तेजोबिन्दु ४।७५

nirvikalpasvarūpātmā savikalpavivarjitaḥ || 21||

tejobindu 4|
75

सदा समाधिशून्यात्मा आदिमध्यान्तवर्जितः॥ २२॥

तेजोबिन्दु ४।७६

sadā samādhiśūnyātmā ādimadhyāntavarjitaḥ || 22||

tejobindu 4|
76

प्रज्ञानवाक्यहीनात्मा अहं ब्रह्मास्मिवर्जितः॥ २३॥

तेजोबिन्दु ४।७७

prajñānavākyahīnātmā ahaṁ brahmāsmivarjitaḥ || 23||

tejobindu 4|
77

तत्त्वमस्यादिहीनात्मा अयमात्मेत्यभावकः॥ २४॥

तेजोबिन्दु ४।७७

tattvamasyādihīnātmā ayamātmetyabhāvakaḥ || 24||

tejobindu 4|
77

ओङ्कारवाच्यहीनात्मा सर्ववाच्यविवर्जितः॥ २५॥

तेजोबिन्दु ४।७८

oṅkāravācyahīnātmā sarvavācyavivarjitaḥ || 25||

tejobindu 4|
78

सर्वत्र पूर्णरूपात्मा सर्वत्रात्मावशेषकः॥ २६॥

तेजोबिन्दु ४।५

sarvatra pūrṇarūpātmā sarvatrātmāvaśeṣakaḥ || 26||

tejobindu 4|5

शुद्धचैतन्यरूपात्मा सर्वसङ्गविवर्जितः॥ २७॥

तेजोबिन्दु ४।६

śuddhacaitanyarūpātmā sarvasaṅgavivarjitaḥ || 27||

tejobindu 4|6

आनन्दात्मा प्रियो ह्यात्मा मोक्षात्मा बन्धवर्जितः॥ २८॥

तेजोबिन्दु ४।३६

ānandātmā priyo hyātmā mokṣātmā bandhavarjitaḥ || 28||

tejobindu 4|
36

शून्यात्मा सूक्ष्मरूपात्मा विश्वात्मा विश्वहीनकः॥ २९॥

तेजोबिन्दु ४|४३

śūnyātmā sūkṣmarūpātmā viśvātmā viśvahīnakaḥ || 29||

tejobindu 4|
43

सत्तामात्रस्वरूपात्मा नान्यत्किञ्चिज्जगद्भयम्॥ ३०॥

तेजोबिन्दु ४|४५

sattāmātrasvarūpātmā nānyatkiñcijjagadbhayam || 30||

tejobindu 4|
45

अपरिच्छिन्नरूपात्मा अणुस्थूलादिवर्जितः॥ ३१॥

तेजोबिन्दु ४|४८

aparicchinnarūpātmā aṇusthūlādivarjitaḥ || 31||

tejobindu 4|
48

नामरूपविहीनात्मा परसंवित्सुखात्मकः॥ ३२॥

तेजोबिन्दु ४|४९

nāmarūpavihīnātmā parasaṁvitsukhātmakaḥ || 32||

tejobindu 4|
49

साक्ष्यसाक्षित्वहीनात्मा किञ्चित्किञ्चिन्न किञ्चन॥ ३३॥

तेजोबिन्दु ४।५१
sākṣyasākṣitvahīnātmā kiñcitkiñcinna kiñcana || 33||
tejobindu 4|
51

मुक्तामुक्तस्वरूपात्मा मुक्तामुक्तविवर्जितः॥ ३४॥
तेजोबिन्दु ४।६५
muktāmuktasvarūpātmā muktāmuktavivarjitaḥ || 34||
tejobindu 4|
65

द्वैताद्वैतस्वरूपात्मा द्वैताद्वैतादिवर्जितः॥ ३५॥
तेजोबिन्दु ४।६६
dvaitādvaitasvarūpātmā dvaitādvaitādivarjitaḥ || 35||
tejobindu 4|
66

निष्कलात्मा निर्मलात्मा बुद्ध्यात्मा पुरुषात्मकः॥ ३६॥
तेजोबिन्दु ४।६८
niṣkalātmā nirmalātmā buddhyātmā puruṣātmakaḥ || 36||
tejobindu 4|
68

आत्मेतिशब्दहीनो य आत्मशब्दार्थवर्जितः॥ ३७॥
तेजोबिन्दु ५।८
ātmetiśabdahīno ya ātmaśabdārthavarjitaḥ || 37||
tejobindu 5|8

सच्चिदानन्दहीनो य एषैवात्मा सनातनः॥ ३८॥

तेजोबिन्दु ५।८

saccidānandahīno ya eṣaivātmā sanātanaḥ || 38||

tejobindu 5|8

यस्य किञ्चिद्बहिर्नास्ति किञ्चिदन्तः कियन्न च॥ ३९॥

तेजोबिन्दु ५।९

yasya kiñcidbahirnāsti kiñcidantaḥ kiyanna ca || 39||

tejobindu 5|9

यस्य लिङ्गं प्रपञ्चं वा ब्रह्मैवात्मा न संशयः॥ ४०॥

तेजोबिन्दु ५।१०

yasya liṅgaṁ prapañcaṁ vā brahmaivātmā na saṁśayaḥ || 40||

tejobindu 5|
10

इति सार्धान्तिकात्मस्वरूपवाक्यानि चत्वारिंशत्॥ ४०॥

पञ्चदशं प्रकरणं समाप्तम्।

iti sārdhāntikātmasvarūpavākyāni catvāriṁśat || 40||

pañcadaśaṁ prakaraṇaṁ samāptam |

१६ अथ सार्धान्तिकसर्वस्वरूपवाक्यानि॥ (४०)

16 atha sārdhāntikasarvasvarūpavākyāni || (40)

ॐकार एवेदं सर्वम्॥ १॥

छान्दोग्य २।२३।३

omkāra evedaṁ sarvam || 1||

chāndogya 2|
23|3

स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स
दक्षिणतः स उत्तरतः स एवेदं सर्वम्॥ २॥

छान्दोग्य ७।२५।१

sa evādhastātsa upariṣṭātsa paścātsa purastātsa
dakṣiṇataḥ sa uttarataḥ sa evedaṁ sarvam || 2||

chāndogya 7|
25|1

अहमेवाधस्तादहमुपरिष्टादहं पश्चादहं
पुरस्तादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदं सर्वम्॥ ३॥

छान्दोग्य ७।२५।१

ahamevādhastādahamupariṣṭādahaṁ paścādahaṁ
purastādahaṁ dakṣiṇato'ahamuttarato'ahamevedaṁ sarvam
|| 3||

chāndogya 7|
25|1

आत्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत
आत्मोत्तरत आत्मैवेदं सर्वम्॥ ४॥

छान्दोग्य ७।२५।२

ātmaivādhastādātmopariṣṭādātmā paścādātmā purastādātmā
dakṣiṇata
ātmottarata ātmaivedaṁ sarvam || 4||

chāndogya 7|
25|2

आत्मैवेदममृतमिदं ब्रह्मेदं सर्वम्॥ ५॥

छान्दोग्य ७।२५।२

ātmaivedamamṛtamidaṁ brahmedaṁ sarvam || 5||

chāndogya 7|25|2

एतद्ब्रह्मैतत्सर्वम्॥ ६॥

बृहदारण्यक ५।१।१

etadbrahmaitatsarvam || 6||

bṛhadāraṇyaka 5|1|1

????? नारायण एवेदं सर्वम्॥ ७॥ ????

???? नारायणोत्तर्तापिनी १।५

????? nārāyaṇa evedaṁ sarvam || 7|| ????

???? nārāyaṇottartāpinī 1|5

सच्चिदानन्दरूपमिदं सर्वम्॥ ८॥

नृसिंहतापिनी २।७।१

saccidānandarūpamidaṁ sarvam || 8||

nṛsiṁhatāpinī 2|7|1

सत्तामात्रं हीदं सर्वम्॥ ९॥

नृसिंहतापिनी ९

sattāmātraṁ hīdaṁ sarvam || 9||

nṛsiṁhatāpinī

9

मत्स्वरूपमेवेदं सर्वम्॥ १०॥

त्रिपाद्विभूतिनारायण

८

matsvarūpamevedaṁ sarvam || 10||

tripādvibhūtinārāyaṇa 8

स एव सर्वं यद्भूतं यच्च भव्यं सनातनम्॥ ११॥

कैवल्य १।९

sa eva sarvaṁ yadbhūtaṁ yacca bhavyaṁ sanātanam || 11||

kaivalya 1|9

स्वयं ब्रह्मा स्वयं विष्णुः स्वयमिन्द्रः स्वयं शिवः॥ १२॥

अध्यात्म २०

svayaṁ brahmā svayaṁ viṣṇuḥ svayamindraḥ svayaṁ śivaḥ || 12||

adhyātma 20

स्वयं विश्वमिदं सर्वं स्वस्मादय्न्यन्न किञ्चन॥ १३॥

अध्यात्म २०

svayaṁ viśvamidaṁ sarvaṁ svasmādaynyanna kiñcana || 13||

adhyātma 20

मरुभूमौ जलं सर्वं मरुभूमात्रमेव तत्॥ १४॥

महा ४।८४

marubhūmau jalaṁ sarvaṁ marubhūmātrameva tat || 14||

mahā 4|84

जगत्त्रयमिदं सर्वं चिन्मात्रं स्वविचारतः॥ १५॥

महा ४।८४

jagattrayamidaṁ sarvaṁ cinmātraṁ svavicārataḥ || 15||

mahā 4|84

भववर्जितचिन्मात्रं सर्वं चिन्मात्रमेव हि॥ १६॥

तेजोबिन्दु २।२५

bhavavarjitacinmātraṁ sarvaṁ cinmātrameva hi || 16||

tejobindu 2|25

यत्किञ्चिद्यन्न किञ्चिच्च सर्वं चिन्मात्रमेव हि॥ १७॥

तेजोबिन्दु २।२७

yatkiñcidyanna kiñcicca sarvaṁ cinmātrameva hi || 17||

tejobindu 2|27

अखण्डैकरसं सर्वं यद्यच्चिन्मात्रमेव हि॥ १८॥

तेजोबिन्दु २।२८

akhaṇḍaikarasaṁ sarvaṁ yadyaccinmātrameva hi || 18||

tejobindu 2|
28

भूतं भव्यं भविष्यच्च सर्वं चिन्मात्रमेव हि॥ १९॥

तेजोबिन्दु २।२८

bhūtaṁ bhavyaṁ bhaviṣyacca sarvaṁ cinmātrameva hi || 19||

tejobindu 2|
28

ज्ञाता चिन्मात्ररूपश्च सर्वं चिन्मात्रमेव हि॥ २०॥

तेजोबिन्दु २।२९

jñātā cinmātrarūpaśca sarvaṁ cinmātrameva hi || 20||

tejobindu 2|

29

यच्च यावच्च दूरस्थं सर्वं चिन्मात्रमेव हि॥ २१॥

तेजोबिन्दु २।३९

yacca yāvacca dūrasthaṁ sarvaṁ cinmātrameva hi || 21||

tejobindu 2|

39

चिन्मात्रान्नास्ति लक्ष्यं च सर्वं चिन्मात्रमेव हि॥ २२॥

तेजोबिन्दु २।४१

cinmātrānnāsti lakṣyaṁ ca sarvaṁ cinmātrameva hi || 22||

tejobindu 2|

41

आत्मनोऽन्या गतिर्नास्ति सर्वमात्ममयं जगत्॥ २३॥

तेजोबिन्दु ६।४६

ātmano'nyā gatirnāsti sarvamātmamayaṁ jagat || 23||

tejobindu 6|

46

आत्मनोऽन्यत्तुषं नास्ति सर्वमात्ममयं जगत्॥ २४॥

तेजोबिन्दु ६।४६

ātmano'nyattuṣaṁ nāsti sarvamātmamayaṁ jagat || 24||

tejobindu 6|
46

सर्वमात्मैव शुद्धात्मा सर्वं चिन्मात्रमद्वयम्॥ २५॥

तेजोबिन्दु ६।३९

sarvamātmaiva śuddhātmā sarvaṁ cinmātramadvayam || 25||

tejobindu 6|
39

सर्वं च खल्विदं ब्रह्म नित्यचिद्घनमक्षतम्॥ २६॥

महा ४।११९

sarvaṁ ca khalvidaṁ brahma nityacidghanamakṣatam || 26||

mahā 4|119

समस्तं खल्विदं ब्रह्म सर्वमात्मेदमाततम्॥ २७॥

महा ६।१२

samastaṁ khalvidaṁ brahma sarvamātmedamātatam || 27||

mahā 6|12

न त्वं नाहं न चान्यं वा सर्वं ब्रह्मैव केवलम्॥ २८॥

तेजोबिन्दु ६।४

na tvaṁ nāhaṁ na cānyaṁ vā sarvaṁ brahmaiva kevalam || 28||

tejobindu 6|4

न तदस्ति न यत्राहं न तदस्ति न तन्मयम्॥ २९॥

महा ६।११

na tadasti na yatrāhaṁ na tadasti na tanmayam || 29||

mahā 6|11

किमन्यदभिवाञ्छामि सर्वं सच्चिन्मयं ततम्॥ ३०॥

महा ६।११

kimanyadabhivāñchāmi sarvaṁ saccinmayaṁ tatam || 30||

mahā 6|11

भ्रान्तिरभ्रान्तिर्नास्त्येव सर्वं ब्रह्मैव केवलम्॥ ३१॥

तेजोबिन्दु ५।४२

bhrāntirabhrāntirnāstyeva sarvaṁ brahmaiva kevalam || 31||

tejobindu 5|

42

न देहो न च कर्माणि सर्वं ब्रह्मैव केवलम्॥ ३२॥

तेजोबिन्दु ६।१०५

na deho na ca karmāṇi sarvaṁ brahmaiva kevalam || 32||

tejobindu 6|

105

लक्षणात्रयविज्ञानं सर्वं ब्रह्मैव केवलम्॥ ३३॥

तेजोबिन्दु ६।१०६

lakṣaṇātrayavijñānaṁ sarvaṁ brahmaiva kevalam || 33||

tejobindu 6|

106

जगन्नाम्नाचिदाभाति सर्वं ब्रह्मैव केवलम्॥ ३४॥

योगशिखा ४।१८

jagannāmnācidābhāti sarvaṁ brahmaiva kevalam || 34||

yogaśikhā 4|

ब्रह्ममात्रमिदं सर्वं ब्रह्म मात्रमसन्न हि॥ ३५॥

तेजोबिन्दु ६।४७

brahmamātramidaṁ sarvaṁ brahma mātramasanna hi || 35||

tejobindu 6|
47

ब्रह्ममात्रं वृत्तं सर्वं ब्रह्ममात्रं रसं सुखम्॥ ३६॥

तेजोबिन्दु ६।४८

brahmamātraṁ vṛttaṁ sarvaṁ brahmamātraṁ rasaṁ sukham || 36||

tejobindu 6|
48

ब्रह्ममात्रं श्रुतं सर्वं स्वयं ब्रह्मैव केवलम्॥ ३७॥

तेजोबिन्दु ६।४८

brahmamātraṁ śrutaṁ sarvaṁ svayaṁ brahmaiva kevalam || 37||

tejobindu 6|
48

ब्रह्मैव सर्वं चिन्मात्रं ब्रह्ममात्रं जगत्त्रयम्॥ ३८॥

तेजोबिन्दु ६।४२

brahmaiva sarvaṁ cinmātraṁ brahmamātraṁ jagattrayam || 38||

tejobindu 6|
42

सर्वं प्रशान्तमजमेकमनादिमध्यमाभास्वरं स्वदनमात्रमचैत्य-

मचिह्नम्॥ ३९॥

महा ४।१०

sarvaṁ praśāntamajamekamanādimadhyamābhāsvaraṁ svadanamātramacaitya-
macihnam || 39||

mahā 4|10

सर्वं प्रशान्तमिति शब्दमयी च दृष्टिर्बोधार्धमेव हि मुधैव
तदोमितीदम्॥ ४०॥

महा ४।१०

sarvaṁ praśāntamiti śabdamayī ca dṛṣṭirbodhārdhameva hi mudhaiva
tadomitīdam || 40||

mahā 4|10

इति सार्धान्तिकसर्वस्वरूपवाक्यानि चत्वारिंशत्॥ ४०॥
षोडशं प्रकरणं समाप्तम्।

iti sārdhāntikasarvasvarūpavākyāni catvāriṁśat || 40||
ṣoḍaśaṁ prakaraṇaṁ samāptam |

१७ अथ सार्धान्तिकब्रह्मस्वरूपवाक्यानि। (९४)
17 atha sārdhāntikabrahmasvarūpavākyāni | (94)

सर्वं ह्येतद् ब्रह्म॥ १॥

रामोत्तरतापिनी ३।
५

sarvaṁ hyetad brahma || 1||

rāmottaratāpinī

3|5

अयमात्मा ब्रह्म॥ २॥

शुकरहस्य २।१।४

ayamātmā brahma || 2||

śukarahasya

2|1|4

सत्यं ज्ञानमनन्तं ब्रह्म॥ ३॥

तैत्तिरीय २।१

satyaṁ jñānamanantaṁ brahma || 3||

taittirīya 2|1

प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म॥ ४॥

आत्मबोध १

prajñā pratiṣṭhā prajñānaṁ brahma || 4||

ātmabodha 1

तदेतद्ब्रह्माऽपूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः॥ ५॥

बृहदारण्यक २।

५।१९

tadetadbrahmā'pūrvamanaparamanantaramabāhyamayamātmā brahma sarvānubhūḥ || 5||

bṛhadāraṇyaka

2|5|19

विज्ञानमानन्दं ब्रह्म॥ ६॥

बृहदारण्यक ३।९।
२८

vijñānamānandaṁ brahma || 6||

bṛhadāraṇyaka

3|9|28

अजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्म॥ ७॥

गोपालतापिनी २।९

ajaro'maro'mṛto'bhayo brahmābhayaṁ vai brahma || 7||

gopālatāpinī

2|9

सर्वभूतस्थमेकं नारायणं कारणंपुरुषमकारणं परं ब्रह्मोम्॥ ८॥

आत्मबोध १

sarvabhūtasthamekaṁ nārāyaṇaṁ kāraṇaṁpuruṣamakāraṇaṁ paraṁ brahmom || 8||

ātmabodha 1

स्वयं प्रकाशः स्वयं ब्रह्म॥ ९॥

अथर्वशिखा ३

svayaṁ prakāśaḥ svayaṁ brahma || 9||

atharvaśikhā

3

तदेतदद्वयं स्वयंप्रकाशमहानन्दमात्मैवैतदभय-
ममृतमेतद्ब्रह्म॥ १०॥

नृसिंहतापिनी २।

८।१

tadetadadvayaṁ svayaṁprakāśamahānandamātmaivaitadabhaya-mamṛtametadbrahma || 10||

nṛsiṁhatāpinī 2|8|1

सदेव पुरस्तात्सिद्धं ब्रह्म॥ ११॥

नृसिंहतापिनी २।९।१

sadeva purastātsiddhaṁ brahma || 11||

nṛsiṁhatāpinī 2|9|1

आकाशवत्सूक्ष्मं केवलसत्तामात्रस्वभावं परं ब्रह्म॥ १२॥

सर्वसार १

ākāśavatsūkṣmaṁ kevalasattāmātrasvabhāvaṁ paraṁ brahma || 12||

sarvasāra 1

अद्वितीयमखिलोपाधिविनिर्मुक्तं तत्सकलशक्त्युपबृंहितमनाद्यनन्तं नित्यं शिवं शान्तं निर्गुणमित्यादिवाच्यमनिर्वाच्यं चैतन्यं ब्रह्म॥ १३॥

निरलम्ब

advitīyamakhilopādhivinirmuktaṁ tatsakalaśaktyupabṛṁhitamanādyanantaṁ nityaṁ śivaṁ śāntaṁ nirguṇamityādivācyamanirvācyaṁ caitanyaṁ brahma || 13||

niralamba

एकमेवाद्वितीयं ब्रह्म॥ १४॥

त्रिपाद्विभूतिमहानारायण ३
ekamevādvitīyaṁ brahma || 14||

tripādvibhūtimahānārāyaṇa 3

सर्वदानवच्छिन्नं परं ब्रह्म॥ १५॥

योगचूडामणि ७२

sarvadānavacchinnaṁ paraṁ brahma || 15||

yogacūḍāmaṇi 72

सच्चिदानन्दतेजःरूपं तारकं ब्रह्म॥ १६॥

मण्डलब्राह्मण १।२

saccidānandatejaḥrūpaṁ tārakaṁ brahma || 16||

maṇḍalabrāhmaṇa 1|2

तन्नित्यमुक्तमविक्रियं सत्यज्ञानानन्तानन्दपरिपूर्णं सनातनमेकमेवाद्वितीयं ब्रह्म॥ १७॥

पैङ्गल १

tannityamuktamavikriyaṁ satyajñānānantānandaparipūrṇaṁ sanātanamekamevādvitīyaṁ brahma || 17||

paiṅgala 1

चित्स्वरूपं निरञ्जनं परं ब्रह्म॥ १८॥

त्रिपाद्विभूतिमहानारायण ७
citsvarūpaṁ nirañjanaṁ paraṁ brahma || 18||

tripādvibhūtimahānārāyaṇa *7*

तत्त्वंपदलक्ष्यं प्रत्यगभिन्नं ब्रह्म॥ १९॥

पैङ्गल ३

tattvaṁpadalakṣyaṁ pratyagabhinnaṁ brahma || 19||

paiṅgala 3

अखण्डार्थं परं ब्रह्म॥ २०॥

बह्वृचा

akhaṇḍārthaṁ paraṁ brahma || 20||

bahvṛcā

सर्वकालाबाधितं ब्रह्म॥ २१॥

त्रिपाद्विभूतिमहानारायण १

sarvakālābādhitaṁ brahma || 21||

tripādvibhūtimahānārāyaṇa 1

सगुणनिर्गुणस्वरूपं ब्रह्म॥ २२॥

त्रिपाद्विभूतिमहानारायण १

saguṇanirguṇasvarūpaṁ brahma || 22||

tripādvibhūtimahānārāyaṇa 1

आदिमध्यान्तशून्यं ब्रह्म॥ २३॥

त्रिपाद्विभूतिमहानारायण १
ādimadhyāntaśūnyaṁ brahma || 23||

tripādvibhūtimahānārāyaṇa 1

मायातीतगुणातीतं ब्रह्म॥ २४॥

त्रिपाद्विभूतिमहानारायण १
māyātītaguṇātītaṁ brahma || 24||

tripādvibhūtimahānārāyaṇa 1

अनन्तमप्रमेयाखण्डपरिपूर्णं ब्रह्म॥ २५॥

त्रिपाद्विभूतिमहानारायण १
anantamaprameyākhaṇḍaparipūrṇaṁ brahma || 25||

tripādvibhūtimahānārāyaṇa 1

अद्वितीयपरमानन्दनित्यशुद्धबुद्धमुक्तसत्यस्वरूपव्यापकाभिन्नापरि-ह्च्छिन्नं ब्रह्म॥ २६॥

त्रिपाद्विभूतिमहानारायण १
advitīyaparamānandanityaśuddhabuddhamuktasatyasvarūpavyāpakāb
hinnāpari-hchinnaṁ brahma || 26||

tripādvibhūtimahānārāyaṇa 1

सच्चिदानन्दस्वप्रकाशं ब्रह्म॥ २७॥

त्रिपाद्विभूतिमहानारायण १
saccidānandasvaprakāśaṁ brahma || 27||

tripādvibhūtimahānārāyaṇa 1

मनोवाचामगोचरं ब्रह्म॥ २८॥

त्रिपाद्विभूतिमहानारायण १
manovācāmagocaraṁ brahma || 28||

tripādvibhūtimahānārāyaṇa 1

देशतः कालतो वस्तुतः परिच्छेदरहितं ब्रह्म॥ २९॥

त्रिपाद्विभूतिमहानारायण १
deśataḥ kālato vastutaḥ paricchedarahitaṁ brahma || 29||

tripādvibhūtimahānārāyaṇa 1

अखिलप्रमाणागोचरं ब्रह्म॥ ३०॥

त्रिपाद्विभूतिमहानारायण १
akhilapramāṇāgocaraṁ brahma || 30||

tripādvibhūtimahānārāyaṇa 1

तुरीयं निराकारमेकं ब्रह्म॥ ३१॥

त्रिपाद्विभूतिमहानारायण १

turīyaṁ nirākāramekaṁ brahma || 31||

tripādvibhūtimahānārāyaṇa 1

अद्वैतमनिर्वाच्यं ब्रह्म॥ ३२॥

त्रिपाद्विभूतिमहानारायण १

advaitamanirvācyaṁ brahma || 32||

tripādvibhūtimahānārāyaṇa 1

शिवं प्रशान्तममृतं ब्रह्मयोनिम्॥ ३३॥

कैवल्य १।६

śivaṁ praśāntamamṛtaṁ brahmayonim || 33||

kaivalya 1|6

यदेकमक्षरं निष्क्रियं शिवं सन्मात्रं परं ब्रह्म॥ ३४॥

शाण्डिल्य ३।१

yadekamakṣaraṁ niṣkriyaṁ śivaṁ sanmātraṁ paraṁ brahma || 34||

śāṇḍilya 3|1

असावादित्यो ब्रह्म॥ ३५॥

सूर्य

asāvādityo brahma || 35||

sūrya

ॐमित्येतदक्षरं परं ब्रह्म॥ ३६॥

तारसार २।१

ommityetadakṣaraṁ paraṁ brahma || 36||

tārasāra 2|1

ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण॥ ३७॥

मुण्डक २।२।११

brahmaivedamamṛtaṁ purastādbrahma paścādbrahma dakṣiṇataścottareṇa || 37||

muṇḍaka 2|2|11

अधश्चोर्ध्वं प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्॥ ३८॥

मुण्डक २।२।११

adhaścordhvaṁ prasṛtaṁ brahmaivedaṁ viśvamidaṁ variṣṭham || 38||

muṇḍaka 2|2|11

तदेव निष्कलं ब्रह्म निर्विकल्पं निरञ्जनम्॥ ३९॥

अमृतबिन्दु ८

tadeva niṣkalaṁ brahma nirvikalpaṁ nirañjanam || 39||

amṛtabindu 8

चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि॥ ४०॥

शुकरहस्य २।२

caitanyamekaṁ brahmātaḥ prajñānaṁ brahma mayyapi || 40||
śukarahasya
2|2

ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम्॥ ४१॥
शुकरहस्य २।८
brahmaśabdena tadbrahma svaprakāśātmarūpakam || 41||
śukarahasya
2|8

एतद्भावविनिर्मुक्तं तद्ग्राह्यं ब्रह्म तत्परम्॥ ४२॥
तारसार १।१४
etadbhāvavinirmuktaṁ tadgrāhyaṁ brahma tatparam || 42||
tārasāra 1|14

चिन्मात्रात्परमं ब्रह्म चिन्मात्रान्नास्ति कोऽपि हि॥ ४३॥
तेजोबिन्दु २।३५
cinmātrātparamaṁ brahma cinmātrānnāsti ko'pi hi || 43||
tejobindu 2|
35

अखण्डैकरसं ब्रह्म चिन्मात्रान्न हि विद्यते॥ ४४॥
तेजोबिन्दु २।४१
akhaṇḍaikarasaṁ brahma cinmātrānna hi vidyate || 44||
tejobindu 2|
41

सदोदितं परं ब्रह्म ज्योतिषामुदयो यतः॥ ४५॥

नादबिन्दु १७

sadoditaṁ paraṁ brahma jyotiṣāmudayo yataḥ || 45||

nādabindu 17

यस्मिन्प्रलीयते शब्दस्तत्परं ब्रह्म गीयते॥ ४६॥

ब्रह्मविद्या १३

yasminpralīyate śabdastatparaṁ brahma gīyate || 46||

brahmavidyā

13

???? सर्वशक्ति परं ब्रह्म नित्यमापूर्णमद्वयम्॥ ४७॥ ????

???? sarvaśakti paraṁ brahma nityamāpūrṇamadvayam || 47||

????

????

सत्ता सर्वपदार्थानां नान्या संवेदनादृते॥ ४८॥

महा ५।४७

sattā sarvapadārthānāṁ nānyā saṁvedanadṛte || 48||

mahā 5|47

परं ब्रह्म परं सत्त्वं सच्चिदानन्दलक्षणम्॥ ४९॥

योगशिखा २।१६

paraṁ brahma paraṁ sattvaṁ saccidānandalakṣaṇam || 49||

yogaśikhā 2|

16

अक्षरं परमं ब्रह्म निर्विशेषं निरञ्जनम्॥ ५०॥

योगशिखा ३।१६

akṣaraṁ paramaṁ brahma nirviśeṣaṁ nirañjanam || 50||

yogaśikhā 3|
16

ब्रह्मैवैकमनाद्यन्तमब्धिवत्प्रविजृम्भते॥ ५१॥

अन्नपूर्णा ५।१०

brahmaivaikamanādyantamabdhivatpravijṛmbhate || 51||

annapūrṇā 5|
10

न किञ्चिद्भावनाकारं यत्तद्ब्रह्म परं विदुः॥ ५२॥

अन्नपूर्णा ५।४८

na kiñcidbhāvanākāraṁ yattadbrahma paraṁ viduḥ || 52||

annapūrṇā 5|
48

एकमेवाद्वयं ब्रह्म नेह ननास्ति किञ्चन॥ ५३॥

त्रिपाद्विभूतिनारायण
३

ekamevādvayaṁ brahma neha nanāsti kiñcana || 53||

tripādvibhūtinārāyaṇa 3

ब्रह्मैव विद्यते साक्षाद्वस्तुतोऽवस्तुतोऽपि च॥ ५४॥

पाशुपतब्रह्म २७

brahmaiva vidyate sākṣādvastuto'vastuto'pi ca || 54||

pāśupatabrahma 27

तद्विद्याविषयं ब्रह्म सत्यज्ञानसुखाद्वयम्॥ ५५॥

अन्नपूर्णा ४।२७

tadvidyāviṣayaṁ brahma satyajñānasukhādvayam || 55||

annapūrṇā 4|
27

शान्तं च तदतीतं च परं ब्रह्म तदुच्यते॥ ५६॥

योगशिखा ६।६६

śāntaṁ ca tadatītaṁ ca paraṁ brahma taducyate || 56||

yogaśikhā 6|
66

अनुभूतिमयं तस्मात्सारं ब्रह्मेति कथ्यते॥ ५७॥

अन्नपूर्णा २।१७

anubhūtimayaṁ tasmātsāraṁ brahmeti kathyate || 57||

annapūrṇā 2|
17

यदिदं ब्रह्म पुच्छाख्यं सत्यज्ञानाद्वयात्मकम्॥ ५८॥

कठरुद्र २२

yadidaṁ brahma pucchākhyaṁ satyajñānādvayātmakam || 58||

kaṭharudra
22

सद्रूपं परमं ब्रह्म त्रिपरिच्छेदवर्जितम्॥ ५९॥

कठरुद्र २७

sadrūpaṁ paramaṁ brahma triparicchedavarjitam || 59||

kaṭharudra
27

तद्ब्रह्मानन्दमद्वन्द्वं निर्गुणं सत्यचिद्घनम्॥ ६०॥
कठरुद्र ३४
tadbrahmānandamadvandvaṁ nirguṇaṁ satyacidghanam || 60||
kaṭharudra
34

सर्वाधिष्ठानमद्वन्द्वं परं ब्रह्म सनातनम्॥ ६१॥
अन्नपूर्णा ४।२९
sarvādhiṣṭhānamadvandvaṁ paraṁ brahma sanātanam || 61||
annapūrṇā 4|
29

प्रज्ञानमेव तद्ब्रह्म सत्यप्रज्ञानलक्षणम्॥ ६२॥
महा ४।८१
prajñānameva tadbrahma satyaprajñānalakṣaṇam || 62||
mahā 4|81

अस्तीत्युक्ते जगत्सर्वं सद्रूपं ब्रह्म तद्भवेत्॥ ६३॥
वराह २।७१
astītyukte jagatsarvaṁ sadrūpaṁ brahma tadbhavet || 63||
varāha 2|71

भातीत्युक्ते जगत्सर्वं भानं ब्रह्मैव केवलम्॥ ६४॥
वराह २।७२
bhātītyukte jagatsarvaṁ bhānaṁ brahmaiva kevalam || 64||

ब्रह्ममात्रं चिदाकाशं सच्चिदानन्दमद्वयम्॥ ६५॥

तेजोबिन्दु ६|४९

brahmamātraṁ cidākāśaṁ saccidānandamadvayam || 65||

tejobindu 6|
49

ब्रह्मणोऽन्यतरन्नास्ति ब्रह्मणोऽन्यज्जगन्न च॥ ६६॥

तेजोबिन्दु ६|४९

brahmaṇo'nyatarannāsti brahmaṇo'nyajjaganna ca || 66||

tejobindu 6|
49

ब्रह्मणोऽन्यदह नास्ति ब्रह्मणोऽन्यत्फलं न हि॥ ६७॥

तेजोबिन्दु ६|५०

brahmaṇo'nyadaha nāsti brahmaṇo'nyatphalaṁ na hi || 67||

tejobindu 6|
50

ब्रह्मणोऽन्यत्तृणं नास्ति ब्रह्मणोऽन्यत्पदं न हि॥ ६८॥

तेजोबिन्दु ६|५०

brahmaṇo'nyattṛṇaṁ nāsti brahmaṇo'nyatpadaṁ na hi || 68||

tejobindu 6|
50

ब्रह्मणोऽन्यद्गुरुर्नास्ति ब्रह्मणोऽन्यदसद्वपुः॥ ६९॥

तेजोबिन्दु ६|५१

brahmaṇo'nyadgururnāsti brahmaṇo'nyadasadvapuḥ || 69||
tejobindu 6|
51

नित्यानन्दमयं ब्रह्म केवलं सर्वदा स्वयम्॥ ७०॥
तेजोबिन्दु ६।१०१
nityānandamayaṁ brahma kevalaṁ sarvadā svayam || 70||
tejobindu 6|
101

बीजं मायाविनिर्मुक्तं परं ब्रह्मेति कीर्त्यते॥ ७१॥
रामरहस्य ५।११
bījaṁ māyāvinirmuktaṁ paraṁ brahmeti kīrtyate || 71||
rāmarahasya
5|11

मद्रूपमद्वयं ब्रह्म आदिमध्यान्तवर्जितम्॥ ७२॥
वासुदेव
madrūpamadvayaṁ brahma ādimadhyāntavarjitam || 72||
vāsudeva

सर्वत्रावस्थितं शान्तं चिद्ब्रह्मेत्यनुभूयते॥ ७३॥
अन्नपूर्णा ५।२१
sarvatrāvasthitaṁ śāntaṁ cidbrahmetyanubhūyate || 73||
annapūrṇā 5|
21

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि॥ ७४॥

अन्नपूर्णा ५।११२

siddhānto'dhyātmaśāstrāṇāṁ sarvāpahnava eva hi || 74||

annapūrṇā 5|

112

नाविद्यास्तीह नो माया शान्तं ब्रह्मेदमक्लमम्॥ ७५॥

अन्नपूर्णा ५।११२

nāvidyāstīha no māyā śāntaṁ brahmedamaklamam || 75||

annapūrṇā 5|

112

स्वात्मन्यारोपिताशेषाभासवस्तुनिरासतः॥ ७६॥

अध्यात्म २१

svātmanyāropitāśeṣābhāsavastunirāsataḥ || 76||

adhyātma 21

स्वयमेव परं ब्रह्म पूर्णमद्वयमक्रियम्॥ ७७॥

अध्यात्म २१

svayameva paraṁ brahma pūrṇamadvayamakriyam || 77||

adhyātma 21

राम एव परं ब्रह्म राम एव परं तपः॥ ७८॥

रमरहस्य ६

rāma eva paraṁ brahma rāma eva paraṁ tapaḥ || 78||

ramarahasya

6

राम एव परं तत्त्वं श्रीरामो ब्रह्मतारकम्॥ ७९॥

रामरहस्य १।६

rāma eva paraṁ tattvaṁ śrīrāmo brahmatārakam || 79||

rāmarahasya

1|6

चिद्रूपमात्रं ब्रह्मैव सच्चिदानन्दमद्वयम्॥ ८०॥

तेजोबिन्दु ३।२६

cidrūpamātraṁ brahmaiva saccidānandamadvayam || 80||

tejobindu 3|

26

ऋतं सत्यं परं ब्रह्म सर्वसंसारभेषजम्॥ ८१॥

जाबालदर्शन ९।१

ṛtaṁ satyaṁ paraṁ brahma sarvasaṁsārabheṣajam || 81||

jābāladarśana

9|1

ब्रह्म चिद्ब्रह्म भुवनं ब्रह्म भूतपरम्परा॥ ८२॥

अन्नपूर्णा ५।२०

brahma cidbrahma bhuvanaṁ brahma bhūtaparamparā || 82||

annapūrṇā 5|

20

ब्रह्माहं ब्रह्मचिच्छत्रुर्ब्रह्म चिन्मित्रबान्धवाः॥ ८३॥

अन्नपूर्णा ५।२०

brahmāhaṁ brahmacicchatrurbrahma cinmitrabāndhavāḥ || 83||

annapūrṇā 5|

20

ब्रह्मरूपतया ब्रह्म केवलं प्रतिभासते॥ ८४॥

आत्म १

brahmarūpatayā brahma kevalaṁ pratibhāsate || 84||

ātma 1

जगद्रूपतयाप्येतद्ब्रह्मैव प्रतिभासते॥ ८५॥

आत्म २

jagadrūpatayāpyetadbrahmaiva pratibhāsate || 85||

ātma 2

विद्याविद्यादिभेदेन भावाभावादिभेदतः॥ ८६॥

आत्म २

vidyāvidyādibhedena bhāvābhāvādibhedataḥ || 86||

ātma 2

गुरुशिष्यादिभेदेन ब्रह्मैव प्रतिभासते॥ ८७॥

आत्म ३

guruśiṣyādibhedena brahmaiva pratibhāsate || 87||

ātma 3

इदं ब्रह्म परं ब्रह्म सत्यं ब्रह्म प्रभुर्हि सः॥ ८८॥

तेजोबिन्दु ६।३५

idaṁ brahma paraṁ brahma satyaṁ brahma prabhurhi saḥ || 88||

tejobindu 6|
35

कालो ब्रह्म कला ब्रह्म सुखं ब्रह्म स्वयंप्रभम्॥ ८९॥

तेजोबिन्दु ६।३५

kālo brahma kalā brahma sukhaṁ brahma svayaṁprabham || 89||

tejobindu 6|35

एकं ब्रह्म द्वयं ब्रह्म मोहो ब्रह्म शमादिकम्॥ ९०॥

तेजोबिन्दु ६।३६

ekaṁ brahma dvayaṁ brahma moho brahma śamādikam || 90||

tejobindu 6|36

दोषो ब्रह्म गुणो ब्रह्म दमः शान्तं विभुः प्रभुः॥ ९१॥

तेजोबिन्दु ६।३६

doṣo brahma guṇo brahma damaḥ śāntaṁ vibhuḥ prabhuḥ || 91||

tejobindu 6|36

लोको ब्रह्म गुरुर्ब्रह्म शिष्यो ब्रह्म सदाशिवः॥ ९२॥

तेजोबिन्दु ६।३७

loko brahma gururbrahma śiṣyo brahma sadāśivaḥ || 92||

tejobindu 6|37

पूर्वं ब्रह्म परं ब्रह्म शुद्धं ब्रह्म शुभाशुभम्॥ ९३॥

तेजोबिन्दु ६।३७

pūrvaṁ brahma paraṁ brahma śuddhaṁ brahma śubhāśubham || 93||

tejobindu 6|
37

जीव एव सदा ब्रह्म स्वयं ब्रह्म सनातनम्॥ ९४॥

तेजोबिन्दु ६।३८

jīva eva sadā brahma svayaṁ brahma sanātanam || 94||

tejobindu 6|
38

इति सार्धान्तिकब्रह्मस्वरूपवाक्यानि चतुर्नवतिः॥ ९४॥

सप्तदशं प्रकरणं समाप्तम्।

iti sārdhāntikabrahmasvarūpavākyāni caturnavatiḥ || 94||

saptadaśaṁ prakaraṇaṁ samāptam |

१८ अथ सार्धान्तिकावशिष्टवाक्यानि। (३६)

18 atha sārdhāntikāvaśiṣṭavākyāni | (36)

सर्वविशेषं नेतिनेतीति विहाय यदवशिष्यते तदद्वयं ब्रह्म॥ १॥

अद्वयतारक ३

sarvaviśeṣaṁ netinetīti vihāya yadavaśiṣyate tadadvayaṁ brahma || 1||

advayatāraka
3

जीवभावजगद्भावबाधे प्रत्यगभिन्नं ब्रह्मैवावशिष्यते॥ २॥

पैङ्गल २

jīvabhāvajagadbhāvabādhe pratyagabhinnaṁ brahmaivāvaśiṣyate || 2||

paiṅgala 2

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते॥ ३॥

शान्ति पाठ

pūrṇamadaḥ pūrṇamidaṁ pūrṇātpūrṇamudacyate || 3||

śānti pāṭha

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥ ४॥

शान्ति पाठ

pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate || 4||

śānti pāṭha

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः॥ ५॥

त्रिपाद्विभूतिमहानारायण ४

kāryopādhirayaṁ jīvaḥ kāraṇopādhirīśvaraḥ || 5||

tripādvibhūtimahānārāyaṇa 4

कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते॥ ६॥

शुकरहस्य ३।१२

kāryakāraṇatāṁ hitvā pūrṇabodho'vaśiṣyate || 6||

śukarahasya 3|12

ततः स्तिमितगम्भीरं न तेजो न तमस्ततम्॥ ७॥

योगकुण्डली ३।२४

tataḥ stimitagambhīraṁ na tejo na tamastatam || 7||

yogakuṇḍalī

3|24

अनाख्यमनभिव्यक्तं सत्किञ्चिदवशिष्यते॥ ८॥

महा २।६५

anākhyamanabhivyaktaṁ satkiñcidavaśiṣyate || 8||

mahā 2|65

सङ्कल्पमनसी भिन्ने न कदाचन केनचित्॥ ९॥

महा ४।५३

saṅkalpamanasī bhinne na kadācana kenacit || 9||

mahā 4|53

सङ्कल्पजाते गलिते स्वरूपमवशिष्यते॥ १०॥

महा ४।५३

saṅkalpajāte galite svarūpamavaśiṣyate || 10||

mahā 4|53

महाप्रलयसम्पत्तौ ह्यसत्तां समुपागते॥ ११॥

महा ४।५५

mahāpralayasampattau hyasattāṁ samupāgate || 11||

mahā 4|55

अशेषदृश्ये सर्गादौ शान्तमेवावशिष्यते॥ १२॥

महा ४।५५

aśeṣadṛśye sargādau śāntamevāvaśiṣyate || 12||

mahā 4|55

खेदोल्लासविलासेषु स्वात्मकर्तृतयानया॥ १३॥

महा ६।३

khedollāsavilāseṣu svātmakartṛtayānayā || 13||

mahā 6|3

स्वसङ्कल्पे क्षयं याते समतैवावशिष्यते॥ १४॥

महा ६।३

svasaṅkalpe kṣayaṁ yāte samataivāvaśiṣyate || 14||

mahā 6|3

समता सर्वभावेषु यासौ सत्यपरा स्थितिः॥ १५॥

महा ६।४

samatā sarvabhāveṣu yāsau satyaparā sthitiḥ || 15||

mahā 6|4

परमामृतनाम्नी सा समतैवावशिष्यते॥ १६॥

महा ४।१६

paramāmṛtanāmnī sā samataivāvaśiṣyate || 16||

mahā 4|16

कालत्रयमुपेक्षित्वा हीनायाश्चैत्यबन्धनैः॥ १७॥

सन्न्यास २।२७

kālatrayamupekṣitvā hīnāyāścaityabandhanaiḥ || 17||

sannyāsa 2|

27

चितश्चैत्यनुपेक्षित्र्याः समतैवावशिष्यते॥ १८॥

सन्न्यास २।२७

citaścaityanupekṣitryāḥ samataivāvaśiṣyate || 18||

sannyāsa 2|
27

सा हि वाचामगम्यत्वादसत्तामिव शाश्वतीम्॥ १९॥

सन्न्यास २।२८

sā hi vācāmagamyatvādasattāmiva śāśvatīm || 19||

sannyāsa 2|
28

नैरात्म्यसिद्धान्तदशामुपयातेऽवशिष्यते॥ २०॥

सन्न्यास २।२८

nairātmyasiddhāntadaśāmupayāte'vaśiṣyate || 20||

sannyāsa 2|
28

यावद्यावन्मुनिश्रेष्ठ स्वयं सन्त्यज्यतेऽखिलम्॥ २१॥

अन्नपूर्णा १।४४

yāvadyāvanmuniśreṣṭha svayaṁ santyajyate'khilam || 21||

annapūrṇā 1|
44

तावत्तावत्परालोकः परमात्मैव शिष्यते॥ २२॥

अन्नपूर्णा १।४४

tāvattāvatparālokaḥ paramātmaiva śiṣyate || 22||

annapūrṇā 1|
44

अभ्यासेन परिस्पन्दे प्राणानां क्षयमागते॥ २३॥

अन्नपूर्णा २।३२

abhyāsena parispande prāṇānāṁ kṣayamāgate || 23||

annapūrṇā 2|
32

मनः प्रशममायाति निर्वाणमवशिष्यते॥ २४॥

अन्नपूर्णा २।३२

manaḥ praśamamāyāti nirvāṇamavaśiṣyate || 24||

annapūrṇā 2|
32

ज्ञेयवस्तुपरित्यागे विलयं याति मानसम्॥ २५॥

शाण्डिल्य १।५।२३

jñeyavastuparityāge vilayaṁ yāti mānasam || 25||

śāṇḍilya 1|5|
23

मानसे विलयं याते कैवल्यमवशिष्यते॥ २६॥

शाण्डिल्य १।५।२३

mānase vilayaṁ yāte kaivalyamavaśiṣyate || 26||

śāṇḍilya 1|5|
23

यतो वाचो निवर्तन्ते विकल्पकलनान्विताः॥ २७॥

अन्नपूर्णा २।३३

yato vāco nivartante vikalpakalanānvitāḥ || 27||

annapūrṇā 2|
33

विकल्पसङ्क्षयाज्जन्तोः पदं तदवशिष्यते॥ २८॥

अन्नपूर्णा २।३३

vikalpasaṅkṣayājjantoḥ padaṁ tadavaśiṣyate || 28||

annapūrṇā 2|
33

चिद्व्योमेव किलास्तीह परापरविवर्जितम्॥ २९॥

अन्नपूर्णा ५।३६

cidvyomeva kilāstīha parāparavivarjitam || 29||

annapūrṇā 5|
36

सर्वत्रासम्भवच्चैत्यं यत्कल्पान्तेऽवशिष्यते॥ ३०॥

अन्नपूर्णा ५।३६

sarvatrāsambhavaccaityaṁ yatkalpānte'vaśiṣyate || 30||

annapūrṇā 5|
36

पञ्चरूपपरित्यागादर्थरूपप्रहाणतः॥ ३१॥

बह्वृचा

pañcarūpaparityāgādartharūpaprahāṇataḥ || 31||

bahvṛcā

अधिष्ठानं परं तत्त्वमेकं सच्छिष्यते महत्॥ ३२॥

बह्वृचा

adhiṣṭhānaṁ paraṁ tattvamekaṁ sacchiṣyate mahat || 32||

bahvṛcā

सर्ववेदान्तसिद्धान्तसारं वच्मि यथार्थतः॥ ३३॥

कठरुद्र ४२

sarvavedāntasiddhāntasāraṁ vacmi yathārthataḥ || 33||

kaṭharudra

42

स्वयं मृत्वा स्वयं भूत्वा स्वयमेवावशिष्यते॥ ३४॥

कठरुद्र ४२

svayaṁ mṛtvā svayaṁ bhūtvā svayamevāvaśiṣyate || 34||

kaṭharudra

42

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्॥ ३५॥

योगकुण्डली ३।३५

aśabdamasparśamarūpamavyayaṁ tathā'rasaṁ nityamagandhavacca yat || 35||

yogakuṇḍalī

3|35

अनाद्यनन्तं महतः परं ध्रुवं तदेव शिष्यत्यमलं निरामयम्॥ ३६॥

कठ १।३।१५

anādyanantaṁ mahataḥ paraṁ dhruvaṁ tadeva śiṣyatyamalaṁ nirāmayam || 36||

kaṭha 1|3|15

इति सार्धान्तिकावशिष्टवाक्यानि षट्त्रिंशत्॥३६॥
अष्टादशं प्रकरणं समाप्तम्।

iti sārdhāntikāvaśiṣṭavākyāni ṣaṭtriṁśat ||36||
aṣṭādaśaṁ prakaraṇaṁ samāptam |

१९ अथ सार्धान्तिकफलवाक्यानि। (४०)
19 atha sārdhāntikaphalavākyāni | (40)

स यो ह वै तत्परमं॥ १॥

रुद्रहृदय ५२

sa yo ha vai tatparamaṁ || 1||

rudrahṛdaya

52

ब्रह्म वेद ब्रह्मैव भवति॥ २॥

मुण्डक ३।२।९

brahma veda brahmaiva bhavati || 2||

muṇḍaka 3|

2|9

ब्रह्मविदाप्नोति परम्॥ ३॥

तैत्तिरीय २।१।१

brahmavidāpnoti param || 3||

taittirīya 2|1|1

ब्रह्मसंस्थोऽमृतत्वमेति॥ ४॥

छान्दोग्य २।२३।१

brahmasaṁstho'mṛtatvameti || 4||

chāndogya 2|
23|1

तरति शोकमात्मवित्॥ ५॥

छान्दोग्य ७।१।३

tarati śokamātmavit || 5||

chāndogya 7|
1|3

य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति॥ ६॥

बृहदारण्यक १।४।
१०

ya evaṁ vedāhaṁ brahmāsmīti sa idaṁ sarvaṁ bhavati || 6||

bṛhadāraṇyaka
1|4|10

स एष विसुकृतो विदुष्कृतो ब्रह्मविद्विद्वान्ब्रह्मैवाभिप्रैति॥ ७॥

कौषीतकीब्राह्मण १।
४

sa eṣa visukṛto viduṣkṛto brahmavidvidvānbrahmaivābhipraiti || 7||

kauṣītakībrāhmaṇa 1|4

तद्ब्रह्मैवाहमस्मीति ब्रह्म प्रणवमनुस्मरन् भ्रमरकीटन्यायेन

शरीरत्रयमुत्सृज्य सन्न्यासेनैव देहत्यागं करोति स कृतकृत्यो भवति॥ ८॥

नारदपरिव्राजक ३।८६

tadbrahmaivāhamasmīti brahma praṇavamanusmaran bhramarakīṭanyāyena

śarīratrayamutsr̥jya sannyāsenaiva dehatyāgaṁ karoti sa kr̥takr̥tyo bhavati || 8||

nāradaparivrājaka 3|86

तमेव ज्ञात्वा विद्वान् मृत्युमुखात् प्रमुच्यते॥ ९॥

नारदपरिव्राजक ९।१

tameva jñātvā vidvān mr̥tyumukhāt pramucyate || 9||

nāradaparivrājaka 9|1

तदेवं विद्वांस इहैवामृता भवन्ति॥ १०॥

शाट्यायनी १८

tadevaṁ vidvāṁsa ihaivāmr̥tā bhavanti || 10||

śāṭyāyanī 18

अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते॥ ११॥

कठ १।३।१५

anādyanantaṁ mahataḥ paraṁ dhruvaṁ nicāyya taṁ mr̥tyumukhātpramucyate || 11||

kaṭha 1|3|15

यज्ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति॥ १२॥

कठ २।३।८

yajjñātvā mucyate janturamṛtatvaṁ ca gacchati || 12||

kaṭha 2|3|8

यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्॥ १३॥

मुण्डक ३।३।१

yadā paśyaḥ paśyate rukmavarṇaṁ kartāramīśaṁ puruṣaṁ brahmayonim || 13||

muṇḍaka 3|
3|1

तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति॥ १४॥

मुण्डक ३।१।३

tadā vidvānpuṇyapāpe vidhūya nirañjanaḥ paramaṁ sāmyamupaiti || 14||

muṇḍaka 3|1|
3

एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य॥ १५॥

मुण्डक २।१।१०

etadyo veda nihitaṁ guhāyāṁ so'vidyāgranthiṁ vikiratīha somya || 15||

muṇḍaka 2|1|
10

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः॥ १६॥

योगशिखा ५।४५

bhidyate hṛdayagranthiśchidyante sarvasaṁśayāḥ || 16||

yogaśikhā 5|
45

क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥ १७॥

योगशिखा ५।४५

kṣīyante cāsya karmāṇi tasmindṛṣṭe parāvare || 17||

yogaśikhā 5|
45

यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय॥ १८॥

मुण्डक ३।२।८

yathā nadyaḥ syandamānāḥ samudre'staṁ gacchanti nāmarūpe vihāya || 18||

muṇḍaka 3|2|
8

तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्॥ १९॥

मुण्डक ३।२।८

tathā vidvānnāmarūpādvimuktaḥ parātparaṁ puruṣamupaiti divyam || 19||

muṇḍaka 3|
2|8

ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये॥ २०॥

कैवल्य १।९

jñātvā taṁ mṛtyumatyeti nānyaḥ panthā vimuktaye || 20||

kaivalya 1|9

तदब्रह्माहमिति ज्ञात्वा ब्रह्म सम्पद्यते ध्रुवम्॥ २१॥

अमृतबिन्दु ८

tadbrahmāhamiti jñātvā brahma sampadyate dhruvam || 21||

amṛtabindu 8

यत्र यत्र स्थितोतो ज्ञानी परमाक्षरवित्सदा॥ २२॥

ब्रह्मविद्या ४९

yatra yatra sthitoito jñānī paramākṣaravitsadā || 22||

brahmavidyā

49

परब्रह्मणि लीयते न तस्योत्क्रान्तिरिष्यते॥ २३॥

योगतत्त्व १०८

parabrahmaṇi līyate na tasyotkrāntiriṣyate || 23||

yogatattva

108

यद्यत्स्वाभिमतं वस्तु तत्त्यजन्मोक्षमश्नुते॥ २४॥

महा ४।८८

yadyatsvābhimataṁ vastu tattyajanmokṣamaśnute || 24||

mahā 4|88

असङ्कल्पनशस्त्रेण छिन्नं चित्तमिदं यदा॥ २५॥

महा ४।९१

asaṅkalpanaśastreṇa chinnaṁ cittamidaṁ yadā || 25||

mahā 4|91

सर्वं सर्वगतं शान्तं ब्रह्म सम्पद्यते तदा॥ २६॥

महा ४।९१

sarvaṁ sarvagataṁ śāntaṁ brahma sampadyate tadā || 26||

mahā 4|91

प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम्॥ २७॥

नारदपरिव्राजक ३।५१

priyeṣu sveṣu sukṛtamapriyeṣu ca duṣkṛtam || 27||

nāradaparivrājaka 3|51

विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातनम्॥ २८॥

नारदपरिव्राजक ३।५१

visṛjya dhyānayogena brahmāpyeti sanātanam || 28||

nāradaparivrājaka 3|51

घटाकाशमिवात्मानं विलयं वेत्ति तत्त्वतः॥ २९॥

पैङ्गल ४।१४

ghaṭākāśamivātmānaṁ vilayaṁ vetti tattvataḥ || 29||

paiṅgala 4|14

स गच्छति निरालम्बं ज्ञानालोकं सनातनम्॥ ३०॥

पैङ्गल ४।१४

sa gacchati nirālambaṁ jñānālokaṁ sanātanam || 30||

paiṅgala 4|14

तृणाग्रेष्वम्बरे भानौ नरनागामरेषु च॥ ३१॥

अन्नपूर्णा ५।९४

tṛṇāgreṣvambare bhānau naranāgāmareṣu ca || 31||

annapūrṇā 5|94

यत्तिष्ठति तदेवाहमिति मत्वा न शोचति॥ ३२॥

अन्नपूर्णा ५|९४

yattiṣṭhati tadevāhamiti matvā na śocati || 32||

annapūrṇā 5|94

सर्वसाक्षिणमात्मानं वर्णाश्रमविवर्जितम्॥ ३३॥

वराह २|१३

sarvasākṣiṇamātmānaṁ varṇāśramavivarjitam || 33||

varāha 2|13

ब्रह्मरूपतया पश्यन्ब्रह्मैव भवति स्वयम्॥ ३४॥

वराह २|१३

brahmarūpatayā paśyanbrahmaiva bhavati svayam || 34||

varāha 2|13

तद्ब्रह्मानन्दमद्वन्द्वं निर्गुणं सत्यचिद्घनम्॥ ३५॥

वराह २|२०

tadbrahmānandamadvandvaṁ nirguṇaṁ satyacidghanam || 35||

varāha 2|20

विदित्वा स्वात्मनो रूपं न बिभेति कुतश्चन॥ ३६॥

महा ४|७०

viditvā svātmano rūpaṁ na bibheti kutaścana || 36||

mahā 4|70

वासनां सम्परित्यज्य मयि चिन्मात्रविग्रहे॥ ३७॥

मुक्तिका २।१८

vāsanāṁ samparityajya mayi cinmātravigrahe || 37||

muktikā 2|18

यस्तिष्ठति गतस्नेहः सोऽहं सच्चित्सुखात्मकः॥ ३८॥

मुक्तिका २।१८

yastiṣṭhati gatasnehaḥ so'haṁ saccitsukhātmakaḥ || 38||

muktikā 2|18

दर्शनादर्शने हित्वा स्वयं केवलरूपतः॥ ३९॥

मुक्तिका २।६४

darśanādarśane hitvā svayaṁ kevalarūpataḥ || 39||

muktikā 2|64

य आस्ते कपिशार्दूल ब्रह्म न ब्रह्मवित्स्वयम्॥ ४०॥

मुक्तिका २।६४

ya āste kapiśārdūla brahma na brahmavitsvayam || 40||

muktikā 2|64

इति सार्धान्तिकफलवाक्यानि चत्वारिंशत्॥४०॥

एकोनविंशं प्रकरणं समाप्तम्।

iti sārdhāntikaphalavākyāni catvāriṁśat ||40||

ekonaviṁśaṁ prakaraṇaṁ samāptam |

२० अथ सार्धान्तिकविदेहमुक्तिवाक्यानि॥ (७७)

20 atha sārdhāntikavidehamuktivākyāni || (77)

विमुक्तश्च विमुच्यते॥ १॥

कठ २।२।१

vimuktaśca vimucyate || 1||

kaṭha 2|2|1

गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति॥ २॥

मुण्डक ३।२।९

guhāgranthibhyo vimukto'mṛto bhavati || 2||

muṇḍaka 3|
2|9

अथाकामयमानो योऽकामो निष्काम आत्मकाम आप्तकामो न तस्य प्राणा
उत्क्रामन्त्यत्रैव समवलीयन्ते ब्रह्मैव सन्ब्रह्माप्येति॥ ३॥

बृहदारण्यक ४।४।६

athākāmayamāno yo'kāmo niṣkāma ātmakāma āptakāmo na tasya prāṇā
utkrāmantyatraiva samavalīyante brahmaiva sanbrahmāpyeti || 3||

bṛhadāraṇyaka
4|4|6

तद्यथाऽहि निर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं
शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव॥ ४॥

बृहदारण्यक ४।४।
७

tadyathā'hi nirlvayanī valmīke mṛtā pratyastā śayītaivamevedaṁ śarīraṁ
śete'thāyamaśarīro'mṛtaḥ prāṇo brahmaiva teja eva || 4||

bṛhadāraṇyaka

4|4|7

अशरीरो निरिन्द्रियोऽप्राणोऽतमाः सच्चिदानन्दमात्रः स स्वराट् भवति॥ ५॥

नृसिंहतापिनी २।
७।१

aśarīro nirindriyo'prāṇo'tamāḥ saccidānandamātraḥ sa svarāṭ bhavati || 5||

nṛsiṁhatāpinī
2|7|1

पृथिव्यप्सु प्रलीयत आपो ज्योतिषि लीयन्ते ज्योतिर्वायौ विलीयते वायुराकाश
आकाशमिन्द्रियेष्विन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ विलीयन्ते
भूतादिर्महति विलीयते महानव्यक्ते विलीयते व्यक्तमक्षरे विलीयतेऽक्षरं
तमसि विलीयते तमः परे देव एकीभवति परस्तान्न सन्नासन्न सदसत्॥ ६॥

सुबाल २

pṛthivyapsu pralīyata āpo jyotiṣi līyante jyotirvāyau vilīyate vāyurākāśa
ākāśamindriyeṣvindriyāṇi tanmātreṣu tanmātrāṇi bhūtādau vilīyante
bhūtādirmahati vilīyate mahānavyakte vilīyate vyaktamakṣare vilīyate'kṣaraṁ
tamasi vilīyate tamaḥ pare deva ekībhavati parastānna sannāsanna sadasat || 6||

subāla 2

ब्रह्माण्डं तद्गतलोकान्कार्यरूपांश्च कारणत्वं प्रापयित्वा ततः
सूक्ष्माङ्गं कर्मेन्द्रियाणि प्राणाश्च ज्ञानेन्द्रियाण्यन्तःकरणचतुष्टयं
चैकीकृत्य सर्वाणि भौतिकानि कारणे भूतपञ्चके संयोज्य भूमिं
जले जलं वह्नौ वह्निं वायौ वायुमाकाशे चाकाशमहङ्कारे

चाहङ्कारं महति महदव्यक्ते अव्यक्तं पुरुषे क्रमेण विलीयते
विराट् हिरण्यगर्भेश्वरा उपाधिविलयात्परमात्मनि लीयन्ते॥ ७॥

पैङ्गल ३

brahmāṇḍaṁ tadgatalokānkāryarūpāṁśca kāraṇatvaṁ prāpayitvā tataḥ
sūkṣmāṅgaṁ karmendriyāṇi prāṇāśca jñānendriyāṇyantaḥkaraṇacatuṣṭayaṁ
caikīkṛtya sarvāṇi bhautikāni kāraṇe bhūtapañcake saṁyojya bhūmiṁ
jale jalaṁ vahnau vahniṁ vāyau vāyumākāśe cākāśamahaṅkāre
cāhaṅkāraṁ mahati mahadavyakte avyaktaṁ puruṣe krameṇa vilīyate
virāṭ hiraṇyagarbheśvarā upādhivilayātparamātmani līyante || 7||

paiṅgala 3

प्रारब्धक्षयवशाद्देहत्रयभङ्गं प्राप्योपाधिनिर्मुक्तघटाकाशवत्परिपूर्णता विदेहमुक्तिः॥ ८॥

मुक्तिका १।२।६

prārabdhakṣayavaśāddehatrayabhaṅgaṁ prāpyopādhinirmuktaghaṭākāśavatparipūrṇatā videhamuktiḥ || 8||

muktikā 1|2|6

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः॥ ९॥

शाट्यायनी २५

yadā sarve pramucyante kāmā ye'sya hṛdi śritāḥ || 9||

śāṭyāyanī 25

अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥ १०॥

शाट्यायनी २५

atha martyo'mṛto bhavatyatra brahma samaśnute || 10||

śāṭyāyanī 25

वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्त्वाः॥ ११॥

मुण्डक ३।२।६

vedāntavijñānasuniścitārthāḥ sannyāsayogādyatayaḥ śuddhasattvāḥ || 11||

muṇḍaka 3|
2|6

ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे॥ १२॥

कैवल्य १।४

te brahmalokeṣu parāntakāle parāmṛtāḥ parimucyanti sarve || 12||

kaivalya 1|4

तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः॥ १३॥

श्वेताश्वतर १।१०

tasyābhidhyānādyojanāttattvabhāvādbhūyaścānte viśvamāyānivṛttiḥ || 13||

śvetāśvatara
1|10

जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते॥ १४॥

पैङ्गल ३।३

jīvanmuktapadaṁ tyaktvā svadehe kālasātkṛte || 14||

paiṅgala 3|3

विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव॥ १५॥

महा २।६३

viśatyadehamuktatvaṁ pavano'spandatāmiva || 15||

mahā 2|63

ततस्तु सम्बभूवासौ यद्गिरामप्यगोचरम्॥ १६॥

अन्नपूर्णा ३।१९

tatastu sambabhūvāsau yadgirāmapyagocaram || 16||

annapūrṇā 3|
19

यच्छून्यवादिनां शून्यं ब्रह्म ब्रह्मविदां च यत्॥ १७॥

अन्नपूर्णा ३।१९

yacchūnyavādināṁ śūnyaṁ brahma brahmavidāṁ ca yat || 17||

annapūrṇā 3|
19

विज्ञानमात्रं विज्ञानविदां यदमलात्मकम्॥ १८॥

अन्नपूर्णा ३।२०

vijñānamātraṁ vijñānavidāṁ yadamalātmakam || 18||

annapūrṇā 3|
20

पुरुषः साङ्ख्यसृष्टीनामीश्वरो योगवादिनाम्॥ १९॥

अन्नपूर्णा ३।२०

puruṣaḥ sāṅkhyasṛṣṭīnāmīśvaro yogavādinām || 19||

annapūrṇā 3|
20

शिवः शैवागमस्थानां कालः कालैकवादिनाम्॥ २०॥
अन्नपूर्णा ३।२१
śivaḥ śaivāgamasthānāṁ kālaḥ kālaikavādinām || 20||
annapūrṇā 3|
21

यत्सर्वशास्त्रसिद्धान्तं यत्सर्वहृदयानुगम्॥ २१॥
अन्नपूर्णा ३।२१
yatsarvaśāstrasiddhāntaṁ yatsarvahṛdayānugam || 21||
annapūrṇā 3|
21

यत्सर्वं सर्वगं वस्तु यत्तत्त्वं तदसौ स्थितः॥ २२॥
अन्नपूर्णा ३।२२
yatsarvaṁ sarvagaṁ vastu yattattvaṁ tadasau sthitaḥ || 22||
annapūrṇā 3|
22

यदनुक्तमनिष्पन्दं दीपकं तेजसामपि॥ २३॥
अन्नपूर्णा ३।२२
yadanuktamaniṣpandaṁ dīpakaṁ tejasāmapi || 23||
annapūrṇā 3|
22

स्वानुभूत्यैकमानं च यत्तत्त्वं तदसौ स्थितः॥ २४॥

अन्नपूर्णा ३।२३

svānubhūtyaikamānaṁ ca yattattvaṁ tadasau sthitaḥ || 24||

annapūrṇā 3|
23

यदेकं चाप्यनेकं च साञ्जनं च निरञ्जनम्॥ २५॥

अन्नपूर्णा ३।२३

yadekaṁ cāpyanekaṁ ca sāñjanaṁ ca nirañjanam || 25||

annapūrṇā 3|
23

यत्सर्वं चाप्यसर्वं च यत्तत्त्वं तदसौ स्थितः॥ २६॥

अन्नपूर्णा ३।२३

yatsarvaṁ cāpyasarvaṁ ca yattattvaṁ tadasau sthitaḥ || 26||

annapūrṇā 3|
23

निरानन्दोऽपि सानन्दः सच्चासच्च बभूव सः॥ २७॥

अन्नपूर्णा ३।१८

nirānando'pi sānandaḥ saccāsacca babhūva saḥ || 27||

annapūrṇā 3|
18

न चेतनो न च जडो न चैवासन्न सन्मयः॥ २८॥

अन्नपूर्णा २।२०

na cetano na ca jaḍo na caivāsanna sanmayaḥ || 28||

annapūrṇā 2|
20

अजममरमनाद्यमाद्यमेकं पदममलं सकलं च निष्कलं च॥ २९॥

अन्नपूर्णा ३।२४

ajamamaramanādyamādyamekaṁ padamamalaṁ sakalaṁ ca niṣkalaṁ ca || 29||

annapūrṇā 3|
24

स्थित इति स तदा नभःस्वरूपादपि विमलास्थितिरीश्वरक्षणेन॥ ३०॥

अन्नपूर्णा ३।२४

sthita iti sa tadā nabhaḥsvarūpādapi vimalāsthitirīśvarakṣaṇena || 30||

annapūrṇā 3|
24

व्यपगतकलनाकलङ्कशुद्धः स्वयममलात्मनि पावने पदेऽसौ॥ ३१॥

महा २।७७

vyapagatakalanākalaṅkaśuddhaḥ svayamamalātmani pāvane pade'sau || 31||

mahā 2|77

सलिलकण इवाम्बुधौ महात्मा विगलितवासनमेकतां जगाम॥ ३२॥

महा २।७७

salilakaṇa ivāmbudhau mahātmā vigalitavāsanamekatāṁ jagāma || 32||

mahā 2|77

संशान्तदुःखमजडात्मकमेकसुप्त-

मानन्दमन्थरमपेतरजस्तमो यत्॥ ३३॥

अन्नपूर्णा ४।२४

saṁśāntaduḥkhamajaḍātmakamekasupta-

mānandamantharamapetarajastamo yat || 33||

annapūrṇā 4|
24

आकाशकोशतनवोऽतनवो महान्त-

स्मिन्पदे गलितचित्तलवा भवन्ति॥ ३४॥

अन्नपूर्णा ४।२४

ākāśakośatanavo'tanavo mahānta-

sminpade galitacittalavā bhavanti || 34||

annapūrṇā 4|
24

विदेहमुक्त एवासौ विद्यते निष्कलात्मकः॥ ३५॥

अन्नपूर्णा ४।१९

videhamukta evāsau vidyate niṣkalātmakaḥ || 35||

annapūrṇā 4|
19

समग्राग्र्यगुणाधारमपि सत्त्वं प्रलीयते॥ ३६॥

अन्नपूर्णा ४।१९

samagrāgryaguṇādhāramapi sattvaṁ pralīyate || 36||

annapūrṇā 4|
19

विदेहमुक्तौ विमले पदे परमपावने॥ ३७॥

अन्नपूर्णा ४।२०

videhamuktau vimale pade paramapāvane || 37||

annapūrṇā 4|

20

विदेहमुक्तिविषये तस्मिन् सत्त्वक्षयात्मके॥ ३८॥

अन्नपूर्णा ४।२०

videhamuktiviṣaye tasmin sattvakṣayātmake || 38||

annapūrṇā 4|

20

चित्तनाशे विरूपाख्ये न किञ्चिदिह विद्यते॥ ३९॥

अन्नपूर्णा ४।२१

cittanāśe virūpākhye na kiñcidiha vidyate || 39||

annapūrṇā 4|

21

न गुणा नागुणास्तत्र न श्रीर्नाश्रीर्न चैकता॥ ४०॥

अन्नपूर्णा ४।२१

na guṇā nāguṇāstatra na śrīrnāśrīrna caikatā || 40||

annapūrṇā 4|

21

जीवन्नेव सदा मुक्तः कृतार्थो ब्रह्मवित्तमः॥ ४१॥

आत्म २०

jīvanneva sadā muktaḥ kṛtārtho brahmavittamaḥ || 41||

ātma 20

उपाधिनाशाद्ब्रह्मैव सन्ब्रह्माप्येति निर्द्वयम्॥ ४२॥

आत्म २०

upādhināśādbrahmaiva sanbrahmāpyeti nirdvayam || 42||

ātma 20

शास्त्रेण न स्यात्परमार्थदृष्टिः कार्यक्षमं नश्यति चापरोक्षात्॥ ४३॥

वराह २।६९

śāstreṇa na syātparamārthadṛṣṭiḥ kāryakṣamaṁ naśyati cāparokṣāt || 43||

varāha 2|69

प्रारब्धनाशात्प्रतिभासनाश एवं विधा नश्यति चात्ममाया॥ ४४॥

वराह २।६९

prārabdhanāśātpratibhāsanāśa evaṁ vidhā naśyati cātmamāyā || 44||

varāha 2|69

अहिनिर्ल्वयनी सर्पनिर्वोको जीववर्जितः॥ ४५॥

वराह २।६७

ahinirlvayanī sarpanirvoko jīvavarjitaḥ || 45||

varāha 2|67

वल्मीके पतितस्तिष्ठेत्तं सर्पो नाभिमन्यते॥ ४६॥

वराह २।६७

valmīke patitastiṣṭhettaṁ sarpo nābhimanyate || 46||

varāha 2|67

एवं स्थूलं च सूक्ष्मं च शरीरं नाभिमन्यते॥ ४७॥

वराह २।६८

evaṁ sthūlaṁ ca sūkṣmaṁ ca śarīraṁ nābhimanyate || 47||

varāha 2|68

प्रत्यग्ज्ञानशिखिध्वस्ते मिथ्याज्ञाने सहेतुके॥ ४८॥

वराह २।६८

pratyagjñānaśikhidhvaste mithyājñāne sahetuke || 48||

varāha 2|68

नेति नेतीति रूपत्वादशरीरो भवत्ययम्॥ ४९॥

वराह २।६८

neti netīti rūpatvādaśarīro bhavatyayam || 49||

varāha 2|68

विश्वश्च तैजसश्चैव प्राज्ञश्चेति च ते त्रयः॥ ५०॥

योगकुण्डली ३।२१

viśvaśca taijasaścaiva prājñaśceti ca te trayaḥ || 50||

yogakuṇḍalī 3|21

विराड्ढिरण्यगर्भश्च ईश्वरश्चेति च ते त्रयः॥ ५१॥

योगकुण्डली ३।२२

virāḍḍhiraṇyagarbhaśca īśvaraśceti ca te trayaḥ || 51||

yogakuṇḍalī 3|22

ब्रह्माण्डं चैव पिण्डाण्डं लोका भूरादयः क्रमात्॥ ५२॥

योगकुण्डली ३।२२

brahmāṇḍaṁ caiva piṇḍāṇḍaṁ lokā bhūrādayaḥ kramāt || 52||
yogakuṇḍalī
3|22

स्वस्वोपाधिलयादेव लीयन्ते प्रत्यगात्मनि॥ ५३॥
योगकुण्डली ३।२३
svasvopādhilayādeva līyante pratyagātmani || 53||
yogakuṇḍalī
3|23

तूष्णीमेव स्थितस्तूष्णीं तूष्णीं सत्यं न किञ्चन॥ ५४॥
तेजोबिन्दु ४।४०
tūṣṇīmeva sthitastūṣṇīṁ tūṣṇīṁ satyaṁ na kiñcana || 54||
tejobindu 4|
40

कालभेदं वस्तुभेदं देशभेदं स्वभेदकम्॥ ५५॥
तेजोबिन्दु ४।४१
kālabhedaṁ vastubhedaṁ deśabhedaṁ svabhedakam || 55||
tejobindu 4|
41

किञ्चिद्भेदं न तस्यास्ति किञ्चिद्वापि न विद्यते॥ ५६॥
तेजोबिन्दु ४।४२
kiñcidbhedaṁ na tasyāsti kiñcidvāpi na vidyate || 56||
tejobindu 4|
42

जीवेश्वरेति वा क्वेति वेदशास्त्राणि क्वाहं त्विति॥ ५७॥

तेजोबिन्दु ४।४६

jīveśvareti vā kveti vedaśāstrāṇi kvāhaṁ tviti || 57||

tejobindu 4|
46

इदं चैतन्यमेवेति अहं चैतन्यमित्यपि॥ ५८॥

तेजोबिन्दु ४।४६

idaṁ caitanyameveti ahaṁ caitanyamityapi || 58||

tejobindu 4|
46

इति निश्चयशून्यो यो वैदेही मुक्त एव सः॥ ५९॥

तेजोबिन्दु ४।४७

iti niścayaśūnyo yo vaidehī mukta eva saḥ || 59||

tejobindu 4|
47

ब्रह्मभूतः प्रशान्तात्मा ब्रह्मानन्दमयः सुखी॥ ६०॥

तेजोबिन्दु ४।३३

brahmabhūtaḥ praśāntātmā brahmānandamayaḥ sukhī || 60||

tejobindu 4|
33

स्वच्छरूपो महामौनी वैदेही मुक्त एव सः॥ ६१॥

तेजोबिन्दु ४।३३

svaccharūpo mahāmaunī vaidehī mukta eva saḥ || 61||

tejobindu 4|

33

ब्रह्मैवाहं चिदेवाहमेवं वापि न चिन्त्यते॥ ६२॥

तेजोबिन्दु ४।३६

brahmaivāhaṁ cidevāhamevaṁ vāpi na cintyate || 62||

tejobindu 4|

36

चिन्मात्रेणैव यस्तिष्ठेद्वैदेही मुक्त एव सः॥ ६३॥

तेजोबिन्दु ४।३७

cinmātreṇaiva yastiṣṭhedvaidehī mukta eva saḥ || 63||

tejobindu 4|

37

चैतन्यमात्रसंसिद्धः स्वात्मारामः सुखासनः॥ ६४॥

तेजोबिन्दु ४।४७

caitanyamātrasaṁsiddhaḥ svātmārāmaḥ sukhāsanaḥ || 64||

tejobindu 4|

47

तुर्यतुर्यः परानन्दो वैदेहीमुक्त एव सः॥ ६५॥

तेजोबिन्दु ४।४८

turyaturyaḥ parānando vaidehīmukta eva saḥ || 65||

tejobindu 4|

48

यस्य प्रपञ्चभानं न ब्रह्माकारमपीह न॥ ६६॥

तेजोबिन्दु ४।५१

yasya prapañcabhānaṁ na brahmākāramapīha na || 66||

tejobindu 4|

51

अतीतातीतभावो यो वैदेही मुक्त एव सः॥ ६७॥

तेजोबिन्दु ४।५३

atītātītabhāvo yo vaidehī mukta eva saḥ || 67||

tejobindu 4|

53

चित्तवृत्तेरतीतो यश्चित्तवृत्त्यवभासकः॥ ६८॥

तेजोबिन्दु ४।५३

cittavṛtteratīto yaścittavṛttyavabhāsakaḥ || 68||

tejobindu 4|

53

सर्ववृत्तिविहीनात्मा वैदेही मुक्त एव सः॥ ६९॥

तेजोबिन्दु ४।५४

sarvavṛttivihīnātmā vaidehī mukta eva saḥ || 69||

tejobindu 4|

54

सर्वत्रैवाहमात्मास्मि परमात्मा परात्मकः॥ ७०॥

तेजोबिन्दु ४।६२

sarvatraivāhamātmāsmi paramātmā parātmakaḥ || 70||

tejobindu 4|

62

नित्यानन्दस्वरूपात्मा वैदेहीमुक्त एव सः॥ ७१॥

तेजोबिन्दु ४।६२

nityānandasvarūpātmā vaidehīmukta eva saḥ || 71||

tejobindu 4|
62

जीवात्मा परमात्मेति चिन्तासर्वस्ववर्जितः॥ ७२॥

तेजोबिन्दु ४।६५

jīvātmā paramātmeti cintāsarvasvavarjitaḥ || 72||

tejobindu 4|
65

सर्वसङ्कल्पहीनात्मा वैदेही मुक्त एव सः॥ ७३॥

तेजोबिन्दु ४।६८

sarvasaṅkalpahīnātmā vaidehī mukta eva saḥ || 73||

tejobindu 4|
68

आत्मज्ञेयादिहीनात्मा यत्किञ्चिदिदमात्मकः॥ ७४॥

तेजोबिन्दु ४।७९

ātmajñeyādihīnātmā yatkiñcididamātmakaḥ || 74||

tejobindu 4|
79

भावाभावविहीनात्मा वैदेही मुक्त एव सः॥ ७५॥

तेजोबिन्दु ४।७९

bhāvābhāvavihīnātmā vaidehī mukta eva saḥ || 75||

tejobindu 4|

79

ॐकारवाच्यहीनात्मा सर्ववाच्यविवर्जितः॥ ७६॥
तेजोबिन्दु ४।७८
omkāravācyahīnātmā sarvavācyavivarjitaḥ || 76||
tejobindu 4|
78

अवस्थात्रयहीनात्मा अक्षरात्मा चिदात्मकः॥ ७७॥
तेजोबिन्दु ४।७८
avasthātrayahīnātmā akṣrātmā cidātmakaḥ|| 77||
tejobindu 4|
78

इति सार्धान्तिकविदेहमुक्तिवाक्यानि सप्तसप्ततिः॥ ७७॥
iti sārdhāntikavidehamuktivākyāni saptasaptatiḥ || 77||

इत्येवं सार्धान्तिकविध्यादिविदेहकैवल्यन्तमहा-
वाक्यान्यष्टोत्तरसहस्रम्॥ १००८॥
विंशं प्रकरणं समाप्तम्।
ityevaṁ sārdhāntikavidhyādividehakaivalyantamahā-
vākyānyaṣṭottarasahasram || 1008||
viṁśaṁ prakaraṇaṁ samāptam |

इति श्रीमत्परमहंसपरिव्राजकाचार्य-
श्रीवासुदेवेन्द्रसरस्वतीचरणकमलमकरन्द-
तृप्तस्वान्तरामचन्द्रेन्द्रग्रथितेशावास्या-
द्यष्टोत्तरशतोपनिषत्सारसङ्ग्रह-
भूताष्टोत्तरसहस्रमहावाक्यरत्नावलिः संपूर्णा॥

iti śrīmatparamahaṁsaparivrājakācārya-
śrīvāsudevendrasarasvatīcaraṇakamalamakaranda-
tṛptasvāntarāmacandrendragrathiteśāvāsyā-
dyaṣṭottaraśatopaniṣatsārasaṅgraha-
bhūtāṣṭottarasahasramahāvākyaratnāvaliḥ saṁpūrṇā ||

N.B. -
1. The quotations (vAkyAni) with asterisks after the Upanishad names (references) were also searched previously by Shri S. N. Shastri (with translation and commentary for 170+ 'vAkyA'-s)and are available in the archives of Advaitin group:
(http://groups.yahoo.com/neo/groups/advaitin/files/)
2. Where quotations occur in more than 1 upanishad, only one has been chosen.
==

UNTRACED:

१ सर्वत्राद्वैतब्रह्मबुद्धिं कुर्यात्॥

1 sarvatrādvaitabrahmabuddhiṁ kuryāt ||

२ सर्वं विकारजातं मायामात्रम्

2 sarvaṁ vikārajātaṁ māyāmātram

३ भावाभावकलाविनिर्मुक्तः सर्वसंशयध्वस्तः पूर्णाहंभावः कृतकृत्यो भवति

3 bhāvābhāvakalāvinirmuktaḥ sarvasaṁśayadhvastaḥ
pūrṇāhaṁbhāvaḥ kṛtakṛtyo bhavati

४ तयोऽहं सोऽसौ योऽसौ सोऽहम्

4 tadyo'haṁ so'sau yo'sau so'ham

५ निरुपप्लवं ज्योतिराभ्यन्तरं सर्वमायातीतमप्रत्यगेकरसमद्वितीयम्

5 nirupaplavaṁ jyotirābhyantaraṁ
sarvamāyātītamapratyagekarasamadvitīyam

६ तज्ज्योतिरेकमद्वितीयं सर्वकल्पनातीतं ध्रुवमक्षरमेकं सदा चकास्ति सच्चिदानन्दम्

6 tajjyotirekamadvitīyaṁ sarvakalpanātītaṁ
dhruvamakṣaramekaṁ sadā cakāsti
saccidānandam

७ नारायण एवेदं सर्वम्

7 nārāyaṇa evedaṁ sarvam

८ सर्वशक्ति परं ब्रह्म नित्यमापूर्णमद्वयम्

8 sarvaśakti paraṁ brahma nityamāpūrṇamadvayam

==
====

Upanishads with selected Quotations	**Upanishads without any Quotations**
अक्षि	**अक्षमालिक**
अद्वयतारक	**अथर्वशि खा**
अध्यात्म	**अथर्वशिर**
अन्नपूर्ण	**अव्यक्त**
अमृतनाद	**कलिसन्तरण**
अमृतबिन्दु	**कालाग्निरुद्र**
अवधूत	**कृष्ण**

आत्मबोध
आत्मा
आरुणेय
ईश
एकाक्षर
ऐतरेय
कठ
कठरुद्र
कुण्डिका
केन
कैवल्य
कौषीतकी
गोपाल तापिनी
छान्दोग्य
जाबालदर्शन
तारसार
तुरीयातीत
तेजोबिन्दु
तैत्तिरीय
त्रिपाद्विभूतिमहानारायण
त्रिपुरातापिनी
त्रिषिखि ब्राह्मण
ध्यानबिन्दु
नादबिन्दु
नारदपरिव्राजक
निरालम्ब
नृसिंह तापिनी
परमहंस
परमहंसपरिव्राजक
पाशुपत ब्रह्म
पैंगल
बह्वृचा

क्षुरिका
गणपति
गर्भ
गारुड
जाबाल
जाबाली
त्रिपुरा
दक्षिणामूर्ति
दत्तात्रेय
देवि
निर्वाण
पञ्चब्रह्म
परब्रह्म
प्रश्न
प्राणाग्निहोत्र
बृहज्जाबाल
भावना
भिक्षुक
महानारायण
मान्त्रिक
मुद्गल
रुद्राक्षजाबाल
शरभ
शारीरक
सावित्री
सीता
स्कन्द
हयग्रीव
३६ हंस

बृहदारण्यक
ब्रह्म
ब्रह्मविद्या
भस्मजाबाल
मण्डलब्राह्मण
महत्
महावाक्य
माण्डुक्य
मुक्तिका
मुण्डक
मैत्रायणी
मैत्रेयी
याज्ञवल्क्य
योगकुण्डलि नी
योगचूडामणि
योगतत्त्व
योगशिखा
राम तापिनी
रामरहस्य
रुद्रहृदय
वज्रसूचि का
वराह
वासुदेव
शाण्डिल्य
शाट्यायनी
शुकरहस्य
श्वेताश्वतर
संन्यास
सरस्वतीरहस्य
सर्वसार
सुबाल
सूर्य

सौभाग्य ७२

Number of Quotations from each of the 72 Upanishads

aaruNika 11

aatmaa 16

aatmabodha 17

adhyaatma 24

advayataaraka 1

aitareya 1

akShi 4

amRRitabindu 7

amRRitanaada 2

annapuurNaa 90

atharvashikhaa 1

avadhuuta 5

bahvRRichaa 4

bhasmajaabaala 3

brahma 1

brahmavidyaa 24

bRRihadaaraNyaka 17

chaandogya 17

dhyaanabindu 3

gopaalataapinii 1

haMsa 1

iisha 2

jaabaaladarshana 3

kaivalya 10

kaTha 9

kaTharudra 5

kauShiitakii 1

kena 4

kuNDikaa 5

maaNDukya 9

mahaa 101

mahaavaakya 2

maitraayaNii 3

maitreyii 36

maNDalabraahmaNa 10

mudgala 1

muktikaa 22

muNDaka 19

naadabindu 2

naaradaparivraajaka 28

niraalamba 11

nRRisiMhataapini 23

paashupata 6

pai~Ngala 17

paramahaMsa 2

paramahaMsaparivraajaka 1

prashna 1

raamarahasya 7

raamottarataapinii 2

rudrahRRidaya 1

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

००१ ६७

॥ अक्षमालिकोपनिषत्॥

०

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

००२ ७२

॥ अक्ष्युपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

001 67

|| akṣamālikopaniṣat ||

0

----

varṇa-kramāṅka muktikā-kramāṅka

002 72

|| akṣyupaniṣat ||

निर्ग्रन्थिः शान्तसन्देहो जीवन्मुक्तो विभावनः।
अनिर्वाणोऽपि निर्वाणश्चित्रदीप इव स्थितः॥ ३९॥
nirgranthiḥ śāntasandeho jīvanmukto vibhāvanaḥ |
anirvāṇo'pi nirvāṇaścitradīpa iva sthitaḥ || 39||

आदिमध्यावसानेषु दुःखं सर्वमिदं यतः।
तस्मात्सर्वं परित्यज्य तत्त्वनिष्ठो भवानघ॥ ४७॥
ādimadhyāvasāneṣu duḥkhaṁ sarvamidaṁ yataḥ |
tasmātsarvaṁ parityajya tattvaniṣṭho bhavānagha || 47||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

००३ २३

॥ अथर्वशिखोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

003 23

|| atharvaśikhopaniṣat ||

स्वयंप्रकाशः स्वयं ब्रह्म

svayaṁprakāśaḥ svayaṁ brahma

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

००४ २२

॥ अथर्वशिरोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

004 22

|| atharvaśiropaniṣat ||

०

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

००५ ५३

॥ अद्वयतारक॥

0

varṇa-kramāṅka muktikā-kramāṅka

005 53

|| advayatāraka ||

सर्वविशेषं नेति नेतीति
विहाय यदवशिष्यते ततद्वयं ब्रह्म॥ ३॥
sarvaviśeṣaṁ neti netīti
vihāya yadavaśiṣyate tatadvayaṁ brahma || 3||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
००६ ७३
॥ अध्यात्मोपनिषत्॥
varṇa-kramāṅka muktikā-kramāṅka
006 73
|| adhyātmopaniṣat ||

निद्राया लोकवार्तायाः शब्दादेरात्मविस्मृतेः।
क्वचिन्नवसरं दत्त्वा चिन्तयात्मानमात्मनि॥ ५॥
nidrāyā lokavārtāyāḥ śabdāderātmavismṛteḥ |
kvacinnavasaraṁ dattvā cintayātmānamātmani || 5||

घटाकाशं महाकाश इवात्मानं परात्मनि।
विलाप्याखण्डभावेन तूष्णीं भव सदा मुने॥ ७॥
ghaṭākāśaṁ mahākāśa ivātmānaṁ parātmani |
vilāpyākhaṇḍabhāvena tūṣṇīṁ bhava sadā mune || 7||

क्रियानाशाद्भवेच्चिन्तानाशोऽस्माद्वासनाक्षयः।
वासनाप्रक्षयो मोक्षः सा जीवन्मुक्तिरिष्यते॥ १२॥
kriyānāśādbhaveccintānāśo'smādvāsanākṣayaḥ |
vāsanāprakṣayo mokṣaḥ sā jīvanmuktiriṣyate || 12||

स्वयं ब्रह्मा स्वयं विष्णुः स्वयमिन्द्रः स्वयं शिवः।
स्वयं विश्वमिदं सर्वं स्वस्मादन्यन्न किञ्चन॥ २०॥

svayaṁ brahmā svayaṁ viṣṇuḥ svayamindraḥ svayaṁ śivaḥ |
svayaṁ viśvamidaṁ sarvaṁ svasmādanyanna kiñcana || 20||

स्वात्मन्यारोपिता शेषाभासवस्तुनिरासतः।
स्वयमेव परंब्रह्म पूर्णमद्वयमक्रियम्॥ २१॥
svātmanyāropitā śeṣābhāsavastunirāsataḥ |
svayameva paraṁbrahma pūrṇamadvayamakriyam || 21||

मायाविद्ये विहायैव उपाधी परजीवयोः।
अखण्डं सच्चिदानन्दं परं ब्रह्म विलक्ष्यते॥ ३२॥
māyāvidye vihāyaiva upādhī parajīvayoḥ |
akhaṇḍaṁ saccidānandaṁ paraṁ brahma vilakṣyate || 32||

निर्विकल्पा च चिन्मात्रा वृत्तिः प्रज्ञेति कथ्यते।
nirvikalpā ca cinmātrā vṛttiḥ prajñeti kathyate |

सा सर्वदा भवेद्यस्य स जीवन्मुक्त इष्यते॥ ४४॥
sā sarvadā bhavedyasya sa jīvanmukta iṣyate || 44||

देहेन्द्रियेष्वहंभाव इदंभावस्तदन्यके।
यस्य नो भवतः क्वापि स जीवन्मुक्त इष्यते॥ ४५॥
dehendriyeṣvahaṁbhāva idaṁbhāvastadanyake |
yasya no bhavataḥ kvāpi sa jīvanmukta iṣyate || 45||

न प्रत्यग्ब्रह्मणोर्भेदं कदापि ब्रह्मसर्गयोः।
प्रज्ञया यो विजानाति स जीवन्मुक्त इष्यते॥ ४६॥
na pratyagbrahmaṇorbhedaṁ kadāpi brahmasargayoḥ |
prajñayā yo vijānāti sa jīvanmukta iṣyate || 46||

साधुभिः पूज्यमानेऽस्मिन्पीड्यमानेऽपि दुर्जनैः।
समभावो भवेद्यस्य स जीवन्मुक्त इष्यते॥ ४७॥
sādhubhiḥ pūjyamāne'sminpīḍyamāne'pi durjanaiḥ |
samabhāvo bhavedyasya sa jīvanmukta iṣyate || 47||

सद्घनं चिद्घनं नित्यमानन्दघनमव्ययम्।
प्रत्यगेकरसं पूर्णमनन्तं सर्वतोमुखम्॥ ६१॥
sadghanaṁ cidghanaṁ nityamānandaghanamavyayam |
pratyagekarasaṁ pūrṇamanantaṁ sarvatomukham || 61||

अहेयमनुपादेयमनाधेयमनाश्रयम्।
निर्गुणं निष्क्रियं सूक्ष्मं निर्विकल्पं निरञ्जनम्॥ ६२॥
aheyamanupādeyamanādheyamanāśrayam |
nirguṇaṁ niṣkriyaṁ sūkṣmaṁ nirvikalpaṁ nirañjanam || 62||

शुद्ध बोधस्वरूपोऽहं केवलोऽहं सदाशिवः॥ ६९॥
śuddha bodhasvarūpo'haṁ kevalo'haṁ sadāśivaḥ || 69||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
००७ ७०
॥ अन्नपूर्णोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka
007 70
|| annapūrṇopaniṣat ||

सम्यग्ज्ञानावबोधेन नित्यमेकसमाधिना।
साङ्ख्य एवावबुद्धा ये ते साङ्ख्या योगिनः परे॥ ४९॥

samyagjñānāvabodhena nityamekasamādhinā |
sāṅkhya evāvabuddhā ye te sāṅkhyā yoginaḥ pare || 49||

प्राणाद्यनिलसंशान्तौ युक्त्या ये पदमागताः।
अनामयमनाद्यन्तं ते स्मृता योगयोगिनः॥ ५०॥
prāṇādyanilasaṁśāntau yuktyā ye padamāgatāḥ |
anāmayamanādyantaṁ te smṛtā yogayoginaḥ || 50||

महाचिदेकैवेहास्ति महासत्तेति योच्यते।
निष्कलङ्का समा शुद्धा निरहङ्काररूपिणी॥ ५५॥
mahācidekaivehāsti mahāsatteti yocyate |
niṣkalaṅkā samā śuddhā nirahaṅkārarūpiṇī || 55||

सकृद्विभाता विमला नित्योदयवती समा।
सा ब्रह्म परमात्मेति नामभिः परिगीयते॥ ५६॥
sakṛdvibhātā vimalā nityodayavatī samā |
sā brahma paramātmeti nāmabhiḥ parigīyate || 56||

सैवाहमिति निश्चित्य निदाघ कृतकृत्यवान्।
न भूतं न भविष्यं च चिन्तयामि कदाचन॥ ५७॥
saivāhamiti niścitya nidāgha kṛtakṛtyavān |
na bhūtaṁ na bhaviṣyaṁ ca cintayāmi kadācana || 57||

न स्तौमि न च निन्दामि आत्मनोऽन्यन्नहि क्वचित्।
न तुष्यामि शुभप्राप्तौ न खिद्याम्यशुभागमे॥ ५९॥
na staumi na ca nindāmi ātmano'nyannahi kvacit |
na tuṣyāmi śubhaprāptau na khidyāmyaśubhāgame || 59||

एकमाद्यन्तरहितं चिन्मात्रममलं ततम्।

खादप्यतितरां सूक्ष्मं तद्ब्रह्मास्मि न संशयः॥ ६५॥
ekamādyantarahitaṁ cinmātramamalaṁ tatam |
khādapyatitarāṁ sūkṣmaṁ tadbrahmāsmi na saṁśayaḥ || 65||

द्वैतभावविमुक्तोऽस्मि सच्चिदानन्दलक्षणः।
एवं भावय यत्नेन जीवन्मुक्तो भविष्यसि॥ ६८॥
dvaitabhāvavimukto'smi saccidānandalakṣaṇaḥ |
evaṁ bhāvaya yatnena jīvanmukto bhaviṣyasi || 68||

समाधिः संविदुत्पत्तिः परजीवैकतं प्रति।
नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः॥ ७५॥
samādhiḥ saṁvidutpattiḥ parajīvaikataṁ prati |
nityaḥ sarvagato hyātmā kūṭastho doṣavarjitaḥ || 75||

अलेपकोऽहमजरो नीरागः शान्तवासनः।
निरंशोऽस्मि चिदाकाशमिति मत्वा न शोचति॥ ९२॥
alepako'hamajaro nīrāgaḥ śāntavāsanaḥ |
niraṁśo'smi cidākāśamiti matvā na śocati || 92||

तृणाग्रेष्वम्बरे भानौ नरनागामरेषु च।
यत्तिष्ठति तदेवाहमिति मत्वा न शोचति॥ ९४॥
tṛṇāgreṣvambare bhānau naranāgāmareṣu ca |
yattiṣṭhati tadevāhamiti matvā na śocati || 94||

वाचामतीतविषयो विषयाशादशोज्झितः।
परानन्दरसाक्षुब्धो रमते स्वात्मनात्मनि॥ ९६॥
vācāmatītaviṣayo viṣayāśādaśojjhitaḥ |
parānandarasākṣubdho ramate svātmanātmani || 96||

नैतज्जाग्रन्न च स्वप्नः सङ्कल्पानामसंभवात्।
सुषुप्तभावो नाऽप्येतदभावाज्जडतास्थितेः॥ १०९॥
naitajjāgranna ca svapnaḥ saṅkalpānāmasaṁbhavāt |
suṣuptabhāvo nā'pyetadabhāvājjaḍatāsthiteḥ || 109||

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि।
नाविद्यास्तीह नो माया शान्तं ब्रह्मेदमक्लमम्॥ ११२॥
इत्युपनिषत्॥ इति पञ्चमोऽध्यायः॥ ५॥
siddhānto'dhyātmaśāstrāṇāṁ sarvāpahnava eva hi |
nāvidyāstīha no māyā śāntaṁ brahmedamaklamam || 112||
ityupaniṣat || iti pañcamo'dhyāyaḥ || 5||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
००८ २१
॥ अमृतनादोपनिषत् २१॥

varṇa-kramāṅka muktikā-kramāṅka
008 21
|| amṛtanādopaniṣat 21 ||

अघोषमव्यञ्जनमस्वरं च अकण्ठताल्वोष्ठमनासिकं च।
अरेफजातमुभयोष्मवर्जितं यदक्षरं न क्षरते कदाचित्
॥ २५॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
००९ २०
॥ अमृतबिन्दूपनिषत्॥
aghoṣamavyañjanamasvaraṁ ca akaṇṭhatālvoṣṭhamanāsikaṁ ca |

arephajātamubhayoṣmavarjitaṁ yadakṣaraṁ na kṣarate kadācit || 25||

varṇa-kramāṅka muktikā-kramāṅka
009 20
|| amṛtabindūpaniṣat ||

यतो निर्विष्यस्यास्य मनसो मुक्तिरिष्यते।
अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा॥ ३॥
yato nirviṣyasyāsya manaso muktiriṣyate |
ato nirviṣayaṁ nityaṁ manaḥ kāryaṁ mumukṣuṇā || 3||

तदेव निष्कलं ब्रह्म निर्विकल्पं निरञ्जनम्।
तदब्रह्मामिति ज्ञात्वा ब्रह्म संपद्यते ध्रुवम्॥ ८॥
tadeva niṣkalaṁ brahma nirvikalpaṁ nirañjanam |
tadabrahmāmiti jñātvā brahma saṁpadyate dhruvam || 8||

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥ १०॥
na nirodho na cotpattirna baddho na ca sādhakaḥ |
na mumukṣurna vai mukta ityeṣā paramārthatā || 10||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०१० ७९
॥ अवधूतोपनिषत्॥
varṇa-kramāṅka muktikā-kramāṅka
010 79
|| avadhūtopaniṣat ||

अक्षरत्वाद्वरेण्यत्वाद्धूतसंसारबन्धनात्।
तत्त्वमस्यादिलक्ष्यत्वादवधूत इतीर्यते॥ १॥
akṣaratvādvareṇyatvāddhṛtasaṁsārabandhanāt |
tattvamasyādilakṣyatvādavadhūta itīryate || 1||

यो विलङ्घ्याश्रमान्वर्णानात्मन्येव स्थितः सदा।
अतिवर्णाश्रमी योगी अवधूतः स कथ्यते॥ २॥
yo vilaṅghyāśramānvarṇānātmanyeva sthitaḥ sadā |
ativarṇāśramī yogī avadhūtaḥ sa kathyate || 2||

यथा रविः सर्वरसान्प्रभुङ्क्ते
हुताशनश्चापि हि सर्वभक्षः।
तथैव योगी विषयान्प्रभुङ्क्ते
न लिप्यते पुण्यपापैश्च शुद्धः॥ ६॥
yathā raviḥ sarvarasānprabhuṅkte
hutāśanaścāpi hi sarvabhakṣaḥ |
tathaiva yogī viṣayānprabhuṅkte
na lipyate puṇyapāpaiśca śuddhaḥ || 6||

देवार्चनस्नानशौचभिक्षादौ वर्ततां वपुः।
तारं जपतु वाक्तद्वत्पठत्वाम्नायमस्तकम्॥ २४॥
devārcanasnānaśaucabhikṣādau vartatāṁ vapuḥ |
tāraṁ japatu vāktadvatpaṭhatvāmnāyamastakam || 24||

विष्णुं ध्यायतु धीर्यद्वा ब्रह्मानन्दे विलीयताम्।
साक्ष्यहं किञ्चिदप्यत्र न कुर्वे नापि कारये॥ २५॥
viṣṇuṁ dhyāyatu dhīryadvā brahmānande vilīyatām |
sākṣyahaṁ kiñcidapyatra na kurve nāpi kāraye || 25||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०११ ६८

॥ अव्यक्तोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

011 68

|| avyaktopaniṣat ||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०१२ ४२

॥ आत्मबोधोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

012 42

|| ātmabodhopaniṣat ||

सर्वभूतस्थमेकं नारायणं कारणपुरुषमकारणं परं ब्रह्मोम्।

sarvabhūtasthamekaṁ nārāyaṇaṁ kāraṇapuruṣamakāraṇaṁ paraṁ brahmom |

प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म।

prajñā pratiṣṭhā prajñānaṁ brahma |

न मे बन्धो न मे मुक्तिर्न मे शास्त्रं न मे गुरुः।
मायामात्रविकासत्वान्मायातीतोऽहमद्वयः॥ १९॥

na me bandho na me muktirna me śāstraṁ na me guruḥ |
māyāmātravikāsatvānmāyātīto'hamadvayaḥ || 19||

प्राणाश्चलन्तु तद्धर्मैः कामैर्वा हन्यतां मनः।
आनन्दबुद्धिपूर्णस्य मम दुःखं कथं भवेत्॥ २०॥
prāṇāścalantu taddharmaiḥ kāmairvā hanyatāṁ manaḥ |
ānandabuddhipūrṇasya mama duḥkhaṁ kathaṁ bhavet || 20||

आत्मानमञ्जसा वेद्मि क्वाप्यज्ञानं पलायितम्।
कर्तृत्वमद्य मे नष्टं कर्तव्यं वापि न क्वचित्॥ २१॥
ātmānamañjasā vedmi kvāpyajñānaṁ palāyitam |
kartṛtvamadya me naṣṭaṁ kartavyaṁ vāpi na kvacit || 21||

ब्राह्मण्यं कुलगोत्रे च नामसौन्दर्यजातयः।
स्थूलदेहगता एते स्थूलाद्भिन्नस्य मे नहि॥ २२॥
brāhmaṇyaṁ kulagotre ca nāmasaundaryajātayaḥ |
sthūladehagatā ete sthūlādbhinnasya me nahi || 22||

क्षुत्पिपासान्ध्यबाधिर्यकामक्रोधादयोऽखिलाः।
लिङ्गदेहगता एते ह्यलिङ्गस्य न सन्ति हि॥ २३॥
kṣutpipāsāndhyabādhiryakāmakrodhādayo'khilāḥ |
liṅgadehagatā ete hyaliṅgasya na santi hi || 23||

जडत्वप्रियमोदत्वधर्माः कारणदेहगाः।
न सन्ति मम नित्यस्य निर्विकारस्वरूपिणः॥ २४॥
jaḍatvapriyamodatvadharmāḥ kāraṇadehagāḥ |
na santi mama nityasya nirvikārasvarūpiṇaḥ || 24||

चिद्रूपत्वान्न मे जाड्यं सत्यत्वान्नानृतं मम।
आनन्दत्वान्न मे दुःखमज्ञानाद्भाति सत्यवत्॥ ३०॥
cidrūpatvānna me jāḍyaṁ satyatvānnānṛtaṁ mama |
ānandatvānna me duḥkhamajñānādbhāti satyavat || 30||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०१३ ७६

॥ आत्मोपनिषत्॥॥

varṇa-kramāṅka muktikā-kramāṅka

013 76

|| ātmopaniṣat || ||

निर्गुणः साक्षिभूतः शुद्धो निरवयवात्मा केवलः

nirguṇaḥ sākṣibhūtaḥ śuddho niravayavātmā kevalaḥ

ब्रह्मरूपतया ब्रह्म केवलं प्रतिभासते॥ १॥

brahmarūpatayā brahma kevalaṁ pratibhāsate || 1||

जगद्रूपतयाप्येतद्ब्रह्मैव प्रतिभासते।
विद्याविद्यादिभेदेन भावाभावादिभेदतः॥ २॥

jagadrūpatayāpyetadbrahmaiva pratibhāsate |
vidyāvidyādibhedena bhāvābhāvādibhedataḥ || 2||

गुरुशिष्यादिभेदेन ब्रह्मैव प्रतिभासते।
ब्रह्मैव केवलं शुद्धं विद्यते तत्त्वदर्शने॥ ३॥

guruśiṣyādibhedena brahmaiva pratibhāsate |
brahmaiva kevalaṁ śuddhaṁ vidyate tattvadarśane || 3||

निर्धनोऽपि सदा तुष्टोऽप्यसहायो महाबलः॥ १२॥

nirdhano'pi sadā tuṣṭo'pyasahāyo mahābalaḥ || 12||

नित्यतृप्तोऽप्यभुञ्जानोऽप्यसमः समदर्शनः।
कुर्वन्नपि न कुर्वाणश्चाभोक्ता फलभोग्यपि॥ १३॥

nityatṛpto'pyabhuñjāno'pyasamaḥ samadarśanaḥ |
kurvannapi na kurvāṇaścābhoktā phalabhogyapi || 13||

शरीर्यप्यशरीर्येष परिच्छिन्नोऽपि सर्वगः।
अशरीरं सदा सन्तमिदं ब्रह्मविदं क्वचित्॥ १४॥
śarīryapyaśarīryeṣa paricchinno'pi sarvagaḥ |
aśarīraṁ sadā santamidaṁ brahmavidaṁ kvacit || 14||

जीवन्नेव सदा मुक्तः कृतार्थो ब्रह्मवित्तमः॥ २०॥
उपाधिनाशाद्ब्रह्मैव सद्ब्रह्माप्येति निर्द्वयम्।
jīvanneva sadā muktaḥ kṛtārtho brahmavittamaḥ || 20||
upādhināśādbrahmaiva sadbrahmāpyeti nirdvayam |

घटे नष्टे यथा व्योम व्योमैव भवति स्वयम्॥ २२॥
तथैवोपाधिविलये ब्रह्मैव ब्रह्मवित्स्वयम्।
ghaṭe naṣṭe yathā vyoma vyomaiva bhavati svayam || 22||
tathaivopādhivilaye brahmaiva brahmavitsvayam |

क्षीरं क्षीरे यथा क्षिप्तं तैलं तैले जलं जले॥ २३॥
संयुक्तमेकतां याति तथात्मन्यात्मविन्मुनिः।
kṣīraṁ kṣīre yathā kṣiptaṁ tailaṁ taile jalaṁ jale || 23||
saṁyuktamekatāṁ yāti tathātmanyātmavinmuniḥ |

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥ ३१॥
na nirodho na cotpattirna baddho na ca sādhakaḥ |
na mumukṣurna vai mukta ityeṣā paramārthatā || 31||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०१४ १६

॥ आरुणिकोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

014 16

|| āruṇikopaniṣat ||

ब्रह्मचर्यमहिंसा
चापरिग्रहं च सत्यं च यत्नेन हे रक्षत हे रक्षत हे
रक्षत इति॥ ३॥

brahmacaryamahiṁsā
cāparigrahaṁ ca satyaṁ ca yatnena he rakṣata he rakṣata he
rakṣata iti || 3||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०१५ १

॥ ईशोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

015 1

|| īśopaniṣat ||

स पर्यगाच्छुक्रमकायमव्रण-
मस्नाविरं शुद्धमपापविद्धम्।
कविर्मनीषी परिभूः स्वयम्भू-
र्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः॥ ८॥

sa paryagācchukramakāyamavraṇa-
masnāviram śuddhamapāpaviddham |

kavirmanīṣī paribhūḥ svayambhū-
ryāthātathyato'rthān vyadadhācchāśvatībhyaḥ samābhyaḥ ||
8||

योऽसावसौ पुरुषः सोऽहमस्मि॥ १६॥
yo'sāvasau puruṣaḥ so'hamasmi || 16||

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०१६	६९

॥ एकाक्षरोपनिषत्॥
०

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०१७	८

॥ ऐतरेय उपनिषत्॥

varṇa-kramāṅka	muktikā-kramāṅka
016	69

|| ekākṣaropaniṣat ||
0

varṇa-kramāṅka	muktikā-kramāṅka
017	8

|| aitareya upaniṣat ||

आसीन्नान्यत्किञ्चन मिषत्। ॥ १॥
॥ इत्यैतरेयोपनिषदि प्रथमाध्याये प्रथमः खण्डः॥

āsīnnānyatkiñcana miṣat | || 1||

|| ityaitareyopaniṣadi prathamādhyāye prathamaḥ khaṇḍaḥ ||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०१८ ३

॥ कठोपनिषत् ॥

varṇa-kramāṅka muktikā-kramāṅka

018 3

|| kaṭhopaniṣat ||

यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि।
ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि॥ १३॥

yacchedvāṅmanasī prājñastadyacchejjñāna ātmani |
jñānamātmani mahati niyacchettadyacchecchānta ātmani || 13||

अशब्दमस्पर्शमरूपमव्ययं
तथाऽरसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं
निचाय्य तन्मृत्युमुखात् प्रमुच्यते॥ १५॥
इति काठकोपनिषदि प्रथमाध्याये तृतीया वल्ली॥

aśabdamasparśamarūpamavyayaṁ
tathā'rasaṁ nityamagandhavacca yat |
anādyanantaṁ mahataḥ paraṁ dhruvaṁ
nicāyya tanmṛtyumukhāt pramucyate || 15||
iti kāṭhakopaniṣadi prathamādhyāye tṛtīyā vallī ||

अर्त् ई

अन्तो ई

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥ १०॥

इति काठकोपनिषदि द्वितीयाध्याये प्रथमा वल्ली॥

art ī

anto ī

mṛtyoḥ sa mṛtyumāpnoti ya iha nāneva paśyati || 10||

iti kāṭhakopaniṣadi dvitīyādhyāye prathamā vallī ||

अर्त् ई

अन्तो ई

विमुक्तश्च विमुच्यते। ॥ १॥

art ī

anto ī

vimuktaśca vimucyate | || 1||

अर्त् ई

अन्तो ई

अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च।
यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति॥ ८॥

art ī

anto ī

avyaktāttu paraḥ puruṣo vyāpako'liṅga eva ca |
yaṁ jñātvā mucyate janturamṛtatvaṁ ca gacchati || 8||

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।
बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम्॥ १०॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०१९ ८३

॥ कठरुद्रोपनिषत् ॥

yadā pañcāvatiṣṭhante jñānāni manasā saha |
buddhiśca na viceṣṭate tāmāhuḥ paramāṁ gatim || 10||

varṇa-kramāṅka muktikā-kramāṅka

019 83

|| kaṭharudropaniṣat ||

सर्वान्तरेण पूर्णश्च ब्रह्म नान्येन केनचित्।
यदिदं ब्रह्मपुच्छाख्यं सत्यज्ञानद्वयात्मकम्॥ २२॥
sarvāntareṇa pūrṇaśca brahma nānyena kenacit |
yadidaṁ brahmapucchākhyaṁ satyajñānadvayātmakam || 22||

तदेवाभयमत्यन्तकल्याणं परमामृतम्।
सद्रूपं परमं ब्रह्म त्रिपरिच्छेदवर्जितम्॥ २७॥
tadevābhayamatyantakalyāṇaṁ paramāmṛtam |
sadrūpaṁ paramaṁ brahma triparicchedavarjitam || 27||

तद्ब्रह्मानन्दमद्वन्द्वं निर्गुणं सत्यचिद्घनम्।
विदित्वा स्वात्मरूपेण न बिभेति कुतश्चन॥ ३४॥
tadbrahmānandamadvandvaṁ nirguṇaṁ satyacidghanam |
viditvā svātmarūpeṇa na bibheti kutaścana || 34||

एवं यो वेद तत्त्वेन ब्रह्मभूयाय कल्पते।
सर्ववेदान्तसिद्धान्तसारं वच्मि यथार्थतः॥ ४२॥
evaṁ yo veda tattvena brahmabhūyāya kalpate |

sarvavedāntasiddhāntasāraṁ vacmi yathārthataḥ || 42||

स्वयं मृत्वा स्वयं भूत्वा स्वयमेवावशिष्यते॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०२० १०३

॥ कलिसन्तरण॥

०

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०२१ २८

॥ कालाग्निरुद्रोपनिषत्॥

०

svayaṁ mṛtvā svayaṁ bhūtvā svayamevāvaśiṣyate ||

varṇa-kramāṅka muktikā-kramāṅka

020 103

|| kalisantaraṇa ||

0

varṇa-kramāṅka muktikā-kramāṅka

021 28

|| kālāgnirudropaniṣat ||

0

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०२२ ७४

॥ कुण्डिकोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka
022 74
|| kuṇḍikopaniṣat ||

निष्क्रियोऽस्म्यविकारोऽस्मि निष्कलोऽस्मि निराकृतिः।
निर्विकल्पोऽस्मि नित्योऽस्मि निरालम्बोऽस्मि निर्द्वयः॥ २५॥
niṣkriyo'smyavikāro'smi niṣkalo'smi nirākṛtiḥ |
nirvikalpo'smi nityo'smi nirālambo'smi nirdvayaḥ || 25||

सर्वात्मकोऽहं सर्वोऽहं सर्वातीतोऽहमद्वयः।
केवलाखण्डबोधोऽहं स्वानन्दोऽहं निरन्तरः॥ २६॥
sarvātmako'haṁ sarvo'haṁ sarvātīto'hamadvayaḥ |
kevalākhaṇḍabodho'haṁ svānando'haṁ nirantaraḥ || 26||

गच्छंस्तिष्ठन्नुपविशञ्छयानो वान्यथापि वा।
यथेच्छया वसेद्विद्वानात्मारामः सदा मुनिः॥ २८॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०२३ ९६
॥ कृष्णोपनिषत्॥
०

gacchaṁstiṣṭhannupaviśañchayāno vānyathāpi vā |
yathecchayā vasedvidvānātmārāmaḥ sadā muniḥ || 28||

varṇa-kramāṅka muktikā-kramāṅka

023 96

|| kṛṣṇopaniṣat ||

0

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०२४ २

॥ केनोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

024 2

|| kenopaniṣat ||

श्रोत्रस्य श्रोत्रं मनसो मनो यद्
वाचो ह वाचं स उ प्राणस्य प्राणः।

śrotrasya śrotraṁ manaso mano yad
vāco ha vācaṁ sa u prāṇasya prāṇaḥ |

अन्यदेव तद्विदितादथो अविदितादधि।
इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे॥ ४॥

anyadeva tadviditādatho aviditādadhi |
iti śuśruma pūrveṣāṁ ye nastadvyācacakṣire || 4||

यद्वाचाऽनभ्युदितं येन वागभ्युद्यते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥ ५॥

yadvācā'nabhyuditaṁ yena vāgabhyudyate |
tadeva brahma tvaṁ viddhi nedaṁ yadidamupāsate || 5||

यन्मनसा न मनुते येनाहुर्मनो मतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥ ६॥

yanmanasā na manute yenāhurmano matam |
tadeva brahma tvaṁ viddhi nedaṁ yadidamupāsate || 6||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०२५ १२
॥ कैवल्योपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka
025 12
|| kaivalyopaniṣat ||

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः।
ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे॥ ४॥
vedāntavijñānasuniśrcitārthāḥ saṁnyāsayogādyatayaḥ śuddhasattvāḥ |
te brahmalokeṣu parāntakāle parāmṛtāḥ parimucyanti sarve || 4||

हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम्।
अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम्॥ ६॥
hṛtpuṇḍarīkaṁ virajaṁ viśuddhaṁ vicintya madhye viśadaṁ viśokam |
acintyamavyaktamanantarūpaṁ śivaṁ praśāntamamṛtaṁ brahmayonim || 6||

स एव सर्वं यद्भूतं यच्च भव्यं सनातनम्।
ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये॥ ९॥
sa eva sarvaṁ yadbhūtaṁ yacca bhavyaṁ sanātanam |

jñātvā taṁ mṛtyumatyeti nānyaḥ panthā vimuktaye || 9||

यत्परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत्।
सूक्ष्मात्सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत्॥ १६॥
yatparaṁ brahma sarvātmā viśvasyāyatanaṁ mahat |
sūkṣmātsūkṣmataraṁ nityaṁ tattvameva tvameva tat || 16||

त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः॥ १८॥
triṣu dhāmasu yadbhogyaṁ bhoktā bhogaśca yadbhavet |
tebhyo vilakṣaṇaḥ sākṣī cinmātro'haṁ sadāśivaḥ || 18||

मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम्॥ १९॥
॥ प्रथमः खण्डः॥ १॥
mayyeva sakalaṁ jātaṁ mayi sarvaṁ pratiṣṭhitam |
mayi sarvaṁ layaṁ yāti tadbrahmādvayamasmyaham || 19||
|| prathamaḥ khaṇḍaḥ || 1||

द्वितीयः खण्डः॥ २॥
dvitīyaḥ khaṇḍaḥ || 2||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०२६ २५
। कौषीतकिब्राह्मणोपनिषत्॥
varṇa-kramāṅka muktikā-kramāṅka
026 25
| kauṣītakibrāhmaṇopaniṣat ||

स एष विसुकृतो
विदुष्कृतो ब्रह्म विद्वान्ब्रह्मैवाभिप्रैति॥४॥
प्रथमोऽध्यायः॥ १॥

sa eṣa visukṛto
viduṣkṛto brahma vidvānbrahmaivābhipraiti ||4||
prathamo'dhyāyaḥ || 1||

इति चतुर्थोऽध्यायः॥ ४॥

iti caturtho'dhyāyaḥ || 4||

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०२७	३१

॥ क्षुरिकोपनिषत्॥

०

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०२८	८९

॥ गणपत्यथर्वशीर्षोपनिषत्॥

०

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०२९	१०२

॥ गरुडोपनिषत्॥

०

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०३० १७

॥ गर्भोपनिषत् १७॥

०

varṇa-kramāṅka muktikā-kramāṅka

027 31

|| kṣurikopaniṣat ||

0

varṇa-kramāṅka muktikā-kramāṅka

028 89

|| gaṇapatyatharvaśīrṣopaniṣat ||

0

varṇa-kramāṅka muktikā-kramāṅka

029 102

|| garuḍopaniṣat||

0

varṇa-kramāṅka muktikā-kramāṅka

030 17

|| garbhopaniṣat 17 ||

0

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०३१ ९५

॥ गोपालतापिन्युपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

031 95

|| gopālatāpinyupaniṣat ||

अक्षरोऽहमोङ्कारोऽयमजरोऽमरोऽभयोऽमृतो ब्रह्माभयं हि वै।

akṣaro'hamoṅkāro'yamajaro'maro'bhayo'mṛto brahmābhayaṁ hi vai |

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०३२ ९

॥ छान्दोग्योपनिषद् ॥

varṇa-kramāṅka muktikā-kramāṅka

032 9

|| chāndogyopaniṣad ||

सर्वमोङ्कार एवेदसर्वम्॥ २.२३.३॥

sarvamoṅkāra evedasarvam || 2.23.3||

सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत॥। ३.१४.१॥

sarvaṁ khalvidaṁ brahma tajjalāniti śānta upāsīta ||| 3.14.1||

गमयत्वहमेवेदसर्वमसानीति॥ ५.२.६॥

gamayatvahamevedasarvamasānīti || 5.2.6||

स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्॥ ६.१.४॥

syādvācārambhaṇaṁ vikāro nāmadheyaṁ mṛttiketyeva satyam|| 6.1.4||

स य एषोऽणिमैतदात्म्यमिदसर्वं तत्सत्यस
आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा
भगवान्विज्ञापयत्विति तथा सोम्येति होवाच॥ ६.८.७॥
sa ya eṣo'ṇimaitadātmyamidasarvaṁ tatsatyasa
ātmā tattvamasi śvetaketo iti bhūya eva mā
bhagavānvijñāpayatviti tathā somyeti hovāca || 6.8.7||

स वा एष एवं पश्यन्नेवं
मन्वान एवं विजानन्नतिवादी भवति तं
चेद्ब्रूयुरतिवाद्यसीत्यतिवाद्यस्मीति ब्रूयान्नापह्नुवीत॥ ७.१५.४॥
sa vā eṣa evaṁ paśyannevaṁ
manvāna evaṁ vijānannativādī bhavati taṁ
cedbrūyurativādyasītyativādyasmīti brūyānnāpahnuvīta || 7.15.4||

यो वै भूमा तत्सुखं॥ ७.२३.१॥
yo vai bhūmā tatsukhaṁ || 7.23.1||

यो वै भूमा तदमृतम्॥ ७.२४.१॥
yo vai bhūmā tadamṛtam || 7.24.1||

स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स
sa evādhastātsa upariṣṭātsa paścātsa purastātsa

एवाहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं
दक्षिणतोऽहमुत्तरतोऽहमेवेदसर्वमिति॥ ७.२५.१॥
evāhamevādhastādahamupariṣṭādahaṁ paścādahaṁ purastādahaṁ
dakṣiṇato'hamuttarato'hamevedasarvamiti || 7.25.1||

अथात आत्मादेश एवात्मैवाधस्तादात्मोपरिष्टादात्मा

पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत
आत्मैवेदसर्वमिति ॥ ७.२५.२॥
athāta ātmādeśa evātmaivādhastādātmopariṣṭādātmā
paścādātmā purastādātmā dakṣiṇata ātmottarata
ātmaivedasarvamiti || 7.25.2||

स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा
ज्ञातिभिर्वा नोपजनस्मरन्निदशरीरस यथा
प्रयोग्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे
प्राणो युक्तः॥ ८.१२.३॥
sa tatra paryeti jakṣatkrīḍanramamāṇaḥ strībhirvā yānairvā
jñātibhirvā nopajanasmarannidaśarīrasa yathā
prayogya ācaraṇe yukta evamevāyamasmiñcharīre
prāṇo yuktaḥ || 8.12.3||

आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा
तद्ब्रह्म तदमृतस आत्मा॥ ८.१४.१॥
ākāśo vai nāma nāmarūpayornirvahitā te yadantarā
tadbrahma tadamṛtasa ātmā || 8.14.1||

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०३३	१३

॥ जाबालोपनिषत्॥
०

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०३४	९०

॥ जाबालदर्शनोपनिषत्॥

३

varṇa-kramāṅka muktikā-kramāṅka
033 13
|| jābālopaniṣat ||
0

varṇa-kramāṅka muktikā-kramāṅka
034 90
|| jābāladarśanopaniṣat ||
3

अथातः संप्रवक्ष्यामि ध्यानं संसारनाशनम्।
ऋतं सत्यं परं ब्रह्म सर्वसंसारभेषजम्॥ १॥
इति नवमः खण्डः॥ ९॥
athātaḥ saṁpravakṣyāmi dhyānaṁ saṁsāranāśanam |
ṛtaṁ satyaṁ paraṁ brahma sarvasaṁsārabheṣajam || 1||
iti navamaḥ khaṇḍaḥ || 9||

यथा फेनतरङ्गादि समुद्रादुत्थितं पुनः॥ ६॥
समुद्रे लीयते तद्वज्जगन्मय्यनुलीयते।
तस्मान्मनः पृथङ् नास्ति जगन्माया च नास्ति हि॥ ७॥
इति दशमः खण्डः॥ १०॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०३५ १०४
॥ जाबाल्युपनिषत् ॥
०
yathā phenataraṅgādi samudrādutthitaṁ punaḥ || 6||

samudre līyate tadvajjaganmayyanulīyate |
tasmānmanaḥ pṛthaṅ nāsti jaganmāyā ca nāsti hi || 7||
iti daśamaḥ khaṇḍaḥ || 10||

varṇa-kramāṅka muktikā-kramāṅka
035 104
|| jābālyupaniṣat ||
0

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०३६ ९१
॥ तारसारोपनिषत्॥
varṇa-kramāṅka muktikā-kramāṅka
036 91
|| tārasāropaniṣat ||

ॐइत्येतदक्षरं परं ब्रह्म। ॥ १॥
omityetadakṣaraṁ paraṁ brahma | || 1||

कलातीता भगवती स्वयं सीतेति सञ्ज्ञिता।
तत्परः परमात्मा च श्रीरामः पुरुषोत्तमः॥ ४॥
kalātītā bhagavatī svayaṁ sīteti sañjñitā |
tatparaḥ paramātmā ca śrīrāmaḥ puruṣottamaḥ || 4||

परमपुरुषः पुराणपुरुषोत्तमो नित्यशुद्धबुद्धमुक्तसत्य-
परमानन्ताद्वयपरिपूर्णः परमात्मा ब्रह्मैवाहं रामोऽस्मि
भूर्भुवः सुवस्तस्मै नमोनमः॥ ८॥
paramapuruṣaḥ purāṇapuruṣottamo nityaśuddhabuddhamuktasatya-

paramānantādvayaparipūrṇaḥ paramātmā brahmaivāhaṁ rāmo'smi bhūrbhuvaḥ suvastasmai namonamaḥ || 8||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०३७ ६४

॥ तुरीयातीतोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

037 64

|| turīyātītopaniṣat ||

हरिः ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०३८ ३७

॥ तेजोबिन्दूपनिषत्॥

hariḥ om pūrṇamadaḥ pūrṇamidaṁ pūrṇātpūrṇamudacyate |
pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate ||

varṇa-kramāṅka muktikā-kramāṅka

038 37

|| tejobindūpaniṣat ||

न भयं न सुखं दुःखं तथा मानावमानयोः।
एतद्भावविनिर्मुक्तं तद्ग्राह्यं ब्रह्म तत्परम्॥ १४॥
na bhayaṁ na sukhaṁ duḥkhaṁ tathā mānāvamānayoḥ |
etadbhāvavinirmuktaṁ tadgrāhyaṁ brahma tatparam || 14||

दृष्टीं ज्ञानमयीं कृत्वा पश्येद्ब्रह्ममयं जगत्।
सा दृष्टिः परमोदारा न नासाग्रावलोकिनी॥ २९॥
dṛṣṭīṁ jñānamayīṁ kṛtvā paśyedbrahmamayaṁ jagat |
sā dṛṣṭiḥ paramodārā na nāsāgrāvalokinī || 29||

द्रष्टृदर्शनदृश्यानां विरामो यत्र वा भवेत्।
दृष्टिस्तत्रैव कर्तव्या न नासाग्रावलोकिनी॥ ३०॥
draṣṭṛdarśanadṛśyānāṁ virāmo yatra vā bhavet |
dṛṣṭistatraiva kartavyā na nāsāgrāvalokinī || 30||

निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः।
वृत्तिविस्मरणं सम्यक्समाधिरभिधीयते॥ ३७॥
nirvikāratayā vṛttyā brahmākāratayā punaḥ |
vṛttivismaraṇaṁ samyaksamādhirabhidhīyate || 37||

कुशला ब्रह्मवार्तायां वृत्तिहीनाः सुरागिणः।
तेऽप्यज्ञानतया नूनं पुनरायान्ति यान्ति च॥ ४६॥
kuśalā brahmavārtāyāṁ vṛttihīnāḥ surāgiṇaḥ |
te'pyajñānatayā nūnaṁ punarāyānti yānti ca || 46||

निमिषार्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना।
यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः॥ ४७॥
nimiṣārdhaṁ na tiṣṭhanti vṛttiṁ brahmamayīṁ vinā |
yathā tiṣṭhanti brahmādyāḥ sanakādyāḥ śukādayaḥ || 47||

भावितं तीव्रवेगेन यद्वस्तु निश्चयात्मकम्।
दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिन्तयेत्॥ ५०॥
bhāvitaṁ tīvravegena yadvastu niścayātmakam |
dṛśyaṁ hyadṛśyatāṁ nītvā brahmākāreṇa cintayet || 50||

इति प्रथमोऽध्यायः॥

iti prathamo'dhyāyaḥ ||

अखण्डैकरसा भूमिरखण्डैकरसं वियत्।
अखण्डैकरसं शास्त्रमखण्डैकरसा त्रयी॥ ३॥

akhaṇḍaikarasā bhūmirakhaṇḍaikarasaṁ viyat |
akhaṇḍaikarasaṁ śāstramakhaṇḍaikarasā trayī || 3||

अखण्डैकरसो ब्रह्मा अखण्डैकरसो हरिः।
अखण्डैकरसो रुद्र अखण्डैकरसोऽस्म्यहम्॥ ५॥

akhaṇḍaikaraso brahmā akhaṇḍaikaraso hariḥ |
akhaṇḍaikaraso rudra akhaṇḍaikaraso'smyaham || 5||

अखण्डैकरसो ह्यात्मा ह्यखण्डैकरसो गुरुः।
अखण्डैकरसं लक्ष्यमखण्डैकरसं महः॥ ६॥

akhaṇḍaikaraso hyātmā hyakhaṇḍaikaraso guruḥ |
akhaṇḍaikarasaṁ lakṣyamakhaṇḍaikarasaṁ mahaḥ || 6||

अखण्डैकरसो देह अखण्डैकरसं मनः।
अखण्डैकरसं चित्तमखण्डैकरसं सुखम्॥ ७॥

akhaṇḍaikaraso deha akhaṇḍaikarasaṁ manaḥ |
akhaṇḍaikarasaṁ cittamakhaṇḍaikarasaṁ sukham || 7||

अखण्डैकरसं गुह्यमखण्डैकरसादिकम्।
अखण्डैकरसो ज्ञाता ह्यखण्डैकरसा स्थितिः॥ १२॥

akhaṇḍaikarasaṁ guhyamakhaṇḍaikarasādikam |
akhaṇḍaikaraso jñātā hyakhaṇḍaikarasā sthitiḥ || 12||

अखण्डैकरसा माता अखण्डैकररसः पिता।
अखण्डैकरसो भ्राता अखण्डैकरसः पतिः॥ १३॥
akhaṇḍaikarasā mātā akhaṇḍaikararasaḥ pitā |
akhaṇḍaikaraso bhrātā akhaṇḍaikarasaḥ patiḥ || 13||

अखण्डैकरसं सूत्रमखण्डैकरसो विराट्।
अखण्डैकरसं गात्रमखण्डैकरसं शिरः॥ १४॥
akhaṇḍaikarasaṁ sūtramakhaṇḍaikaraso virāṭ |
akhaṇḍaikarasaṁ gātramakhaṇḍaikarasaṁ śiraḥ || 14||

अखैण्डैकरसं गोत्रमखण्डैकरसं गृहम्।
अखण्डैकरसं गोप्यमखण्डैकरसशशशी॥ १६॥
akhaiṇḍaikarasaṁ gotramakhaṇḍaikarasaṁ gṛham |
akhaṇḍaikarasaṁ gopyamakhaṇḍaikarasaśaśaśī || 16||

अखण्डैकरसास्तारा अखण्डैकरसो रविः।
अखण्डैकरसं क्षेत्रमखण्डैकरसा क्षमा॥ १७॥
akhaṇḍaikarasāstārā akhaṇḍaikaraso raviḥ |
akhaṇḍaikarasaṁ kṣetramakhaṇḍaikarasā kṣamā || 17||

अखण्डैकरसो बन्धुरखण्डैकरसः सखा।
अखण्डैकरसो राजा अखण्डैकरसं पुरम्॥ १९॥
akhaṇḍaikaraso bandhurakhaṇḍaikarasaḥ sakhā |
akhaṇḍaikaraso rājā akhaṇḍaikarasaṁ puram || 19||

अखण्डैकरसं राज्यमखण्डैकरसाः प्रजाः।
अखण्डैकरसं तारमखण्डैकरसो जपः॥ २०॥
akhaṇḍaikarasaṁ rājyamakhaṇḍaikarasāḥ prajāḥ |
akhaṇḍaikarasaṁ tāramakhaṇḍaikaraso japaḥ || 20||

अखण्डैकरसं सर्वं चिन्मात्रमिति भावयेत्।
चिन्मात्रमेव चिन्मात्रमखण्डैकरसं परम्॥ २४॥
akhaṇḍaikarasaṁ sarvaṁ cinmātramiti bhāvayet |
cinmātrameva cinmātramakhaṇḍaikarasaṁ param || 24||

भववर्जितचिन्मात्रं सर्वं चिन्मात्रमेव हि।
इदं च सर्वं चिन्मात्रमयं चिन्मयमेव हि॥ २५॥
bhavavarjitacinmātraṁ sarvaṁ cinmātrameva hi |
idaṁ ca sarvaṁ cinmātramayaṁ cinmayameva hi || 25||

आत्मभावं च चिन्मात्रमखण्डैकरसं विदुः।
सर्वलोकं च चिन्मात्रं वत्ता मत्ता च चिन्मयम्॥ २६॥
ātmabhāvaṁ ca cinmātramakhaṇḍaikarasaṁ viduḥ |
sarvalokaṁ ca cinmātraṁ vattā mattā ca cinmayam || 26||

आकाशो भूर्जलं वायुरग्निर्ब्रह्मा हरिः शिवः।
यत्किञ्चिद्यन्न किञ्चिच्च सर्वं चिन्मात्रमेव हि॥ २७॥
ākāśo bhūrjalaṁ vāyuragnirbrahmā hariḥ śivaḥ |
yatkiñcidyanna kiñcicca sarvaṁ cinmātrameva hi || 27||

अखण्डैकरसं सर्वं यद्यच्चिन्मात्रमेव हि।
भूतं भव्यं भविष्यच्च सर्वं चिन्मात्रमेव हि॥ २८॥
akhaṇḍaikarasaṁ sarvaṁ yadyaccinmātrameva hi |
bhūtaṁ bhavyaṁ bhaviṣyacca sarvaṁ cinmātrameva hi || 28||

द्रव्यं कालं च चिन्मात्रं ज्ञानं ज्ञेयं चिदेव हि।
ज्ञाता चिन्मात्ररूपश्च सर्वं चिन्मयमेव हि॥ २९॥
dravyaṁ kālaṁ ca cinmātraṁ jñānaṁ jñeyaṁ cideva hi |

jñātā cinmātrarūpaśca sarvaṁ cinmayameva hi || 29||

आदिरन्तश्च चिन्मात्रं गुरुशिष्यादि चिन्मयम्।
दृग्दृश्यं यदि चिन्मात्रमस्ति चेच्चिन्मयं सदा॥ ३१॥
ādirantaśca cinmātraṁ guruśiṣyādi cinmayam |
dṛgdṛśyaṁ yadi cinmātramasti ceccinmayaṁ sadā || 31||

सर्वाश्चर्यं हि चिन्मात्रं देहं चिन्मात्रमेव हि।
लिङ्गं च कारणं चैव चिन्मात्रान्न हि विद्यते॥ ३२॥
sarvāścaryaṁ hi cinmātraṁ dehaṁ cinmātrameva hi |
liṅgaṁ ca kāraṇaṁ caiva cinmātrānna hi vidyate || 32||

अहं त्वं चैव चिन्मात्रं मूर्तामूर्तादिचिन्मयम्।
पुण्यं पापं च चिन्मात्रं जीवश्चिन्मात्रविग्रहः॥ ३३॥
ahaṁ tvaṁ caiva cinmātraṁ mūrtāmūrtādicinmayam |
puṇyaṁ pāpaṁ ca cinmātraṁ jīvaścinmātravigrahaḥ || 33||

चिन्मात्रान्नास्ति दिक्पालाश्चिन्मात्राद्व्यावहारिकम्।
चिन्मात्रात्परमं ब्रह्म चिन्मात्रान्नास्ति कोऽपि हि॥ ३५॥
cinmātrānnāsti dikpālāścinmātrādvyāvahārikam |
cinmātrātparamaṁ brahma cinmātrānnāsti ko'pi hi || 35||

चिन्मात्रान्नास्ति वैराग्यं सर्वं चिन्मात्रमेव हि।
यच्च यावच्च चिन्मात्रं यच्च यावच्च दृश्यते॥ ३८॥
cinmātrānnāsti vairāgyaṁ sarvaṁ cinmātrameva hi |
yacca yāvacca cinmātraṁ yacca yāvacca dṛśyate || 38||

यच्च यावच्च दूरस्थं सर्वं चिन्मात्रमेव हि।
यच्च यावच्च भूतादि यच्च यावच्च लक्ष्यते॥ ३९॥

yacca yāvacca dūrasthaṁ sarvaṁ cinmātrameva hi |
yacca yāvacca bhūtādi yacca yāvacca lakṣyate || 39||

यच्च यावच्च वेदान्ताः सर्वं चिन्मात्रमेव हि।
चिन्मात्रान्नास्ति गमनं चिन्मात्रान्नास्ति मोक्षकम्॥ ४०॥
yacca yāvacca vedāntāḥ sarvaṁ cinmātrameva hi |
cinmātrānnāsti gamanaṁ cinmātrānnāsti mokṣakam || 40||

चिन्मात्रान्नास्ति लक्ष्यं च सर्वं चिन्मात्रमेव हि।
अखण्डैकरसं ब्रह्म चिन्मात्रान्न हि विद्यते॥ ४१॥
cinmātrānnāsti lakṣyaṁ ca sarvaṁ cinmātrameva hi |
akhaṇḍaikarasaṁ brahma cinmātrānna hi vidyate || 41||

इति द्वितीयोऽध्यायः॥ २॥
iti dvitīyo'dhyāyaḥ || 2||

परब्रह्मस्वरूपोऽहं परमानन्दमस्म्यहम्।
केवलं ज्ञानरूपोऽहं केवलं परमोऽस्म्यहम्॥ १॥
parabrahmasvarūpo'haṁ paramānandamasmyaham |
kevalaṁ jñānarūpo'haṁ kevalaṁ paramo'smyaham || 1||

केवलं शान्तरूपोऽहं केवलं चिन्मयोऽस्म्यहम्।
केवलं नित्यरूपोऽहं केवलं शाश्वतोऽस्म्यहम्॥ २॥
kevalaṁ śāntarūpo'haṁ kevalaṁ cinmayo'smyaham |
kevalaṁ nityarūpo'haṁ kevalaṁ śāśvato'smyaham || 2||

केवलं सत्त्वरूपोऽहमहं त्यक्त्वाहमस्म्यहम्।
सर्वहीनस्वरूपोऽहं चिदाकाशमयोऽस्म्यहम्॥ ३॥
kevalaṁ sattvarūpo'hamahaṁ tyaktvāhamasmyaham |

sarvahīnasvarūpo'haṁ cidākāśamayo'smyaham || 3||

केवलं तुर्यरूपोऽस्मि तुर्यातीतोऽस्मि केवलः।
सदा चैतन्यरूपोऽस्मि चिदानन्दमयोऽस्म्यहम्॥ ४॥
kevalaṁ turyarūpo'smi turyātīto'smi kevalaḥ |
sadā caitanyarūpo'smi cidānandamayo'smyaham || 4||

केवलाकाररूपोऽस्मि शुद्धरूपोऽस्म्यहं सदा।
केवलं ज्ञानरूपोऽस्मि केवलं प्रियमस्म्यहम्॥ ५॥
kevalākārarūpo'smi śuddharūpo'smyahaṁ sadā |
kevalaṁ jñānarūpo'smi kevalaṁ priyamasmyaham || 5||

निर्विकल्पस्वरूपोऽस्मि निरीहोऽस्मि निरामयः।
सदाऽसङ्गस्वरूपोऽस्मि निर्विकारोऽहमव्ययः॥ ६॥
nirvikalpasvarūpo'smi nirīho'smi nirāmayaḥ |
sadā'saṅgasvarūpo'smi nirvikāro'hamavyayaḥ || 6||

सदैकरसरूपोऽस्मि सदा चिन्मात्रविग्रहः।
अपरिच्छिन्नरूपोऽस्मि ह्यखण्डानन्दरूपवान्॥ ७॥
sadaikarasarūpo'smi sadā cinmātravigrahaḥ |
aparicchinnarūpo'smi hyakhaṇḍānandarūpavān || 7||

आत्मानन्दस्वरूपोऽहं सत्यानन्दोऽस्म्यहं सदा।
आत्मारामस्वरूपोऽस्मि ह्ययमात्मा सदाशिवः॥ ९॥
ātmānandasvarūpo'haṁ satyānando'smyahaṁ sadā |
ātmārāmasvarūpo'smi hyayamātmā sadāśivaḥ || 9||

आत्मप्रकाशरूपोऽस्मि ह्यात्मज्योतिरसोऽस्म्यहम्।
आदिमध्यान्तहीनोऽस्मि ह्याकाशसदृशोऽस्म्यहम्॥ १०॥

ātmaprakāśarūpo'smi hyātmajyotiraso'smyaham |
ādimadhyāntahīno'smi hyākāśasadṛśo'smyaham || 10||

नित्यशुद्धचिदानन्दसत्तामात्रोऽहमव्ययः।
नित्यबुद्धविशुद्धैकसच्चिदानन्दमस्म्यहम्॥ ११॥
nityaśuddhacidānandasattāmātro'hamavyayaḥ |
nityabuddhaviśuddhaikasaccidānandamasmyaham || 11||

भूमानन्दस्वरूपोऽस्मि भाषाहीनोऽस्म्यहं सदा।
सर्वाधिष्ठानरूपोऽस्मि सर्वदा चिद्घनोऽस्म्यहम्॥ १३॥
bhūmānandasvarūpo'smi bhāṣāhīno'smyahaṁ sadā |
sarvādhiṣṭhānarūpo'smi sarvadā cidghano'smyaham || 13||

देहभावविहीनोऽस्मि चिन्ताहीनोऽस्मि सर्वदा।
चित्तवृत्तिविहीनोऽहं चिदात्मैकरसोऽस्म्यहम्॥ १४॥
dehabhāvavihīno'smi cintāhīno'smi sarvadā |
cittavṛttivihīno'haṁ cidātmaikaraso'smyaham || 14||

अहं ब्रह्मैव सर्वं स्यादहं चैतन्यमेव हि।
अहमेवाहमेवास्मि भूमाकाशस्वरूपवान्॥ १६॥
ahaṁ brahmaiva sarvaṁ syādahaṁ caitanyameva hi |
ahamevāhamevāsmi bhūmākāśasvarūpavān || 16||

अहमेव महानात्मा ह्यहमेव परात्परः।
अहमन्यवदाभामि ह्यहमेव शरीरवत्॥ १७॥
ahameva mahānātmā hyahameva parātparaḥ |
ahamanyavadābhāmi hyahameva śarīravat || 17||

अहं शिष्यवदाभामि ह्ययं लोकत्रयाश्रयः।

अहं कालत्रयातीत अहं वेदैरुपासितः॥ १८॥
ahaṁ śiṣyavadābhāmi hyayaṁ lokatrayāśrayaḥ |
ahaṁ kālatrayātīta ahaṁ vedairupāsitaḥ || 18||

अहं शास्त्रेण निर्णीत अहं चित्ते व्यवस्थितः।
मत्यक्तं नास्ति किञ्चिद्वा मत्यक्तं पृथिवी च वा॥ १९॥
ahaṁ śāstreṇa nirṇīta ahaṁ citte vyavasthitaḥ |
mattyaktaṁ nāsti kiñcidvā mattyaktaṁ pṛthivī ca vā || 19||

मयातिरिक्तं यद्यद्वा तत्तन्नास्तीति निश्चिनु।
अहं ब्रह्मास्मि सिद्धोऽस्मि नित्यशुद्धोऽस्म्यहं सदा॥ २०॥
mayātiriktaṁ yadyadvā tattannāstīti niścinu |
ahaṁ brahmāsmi siddho'smi nityaśuddho'smyahaṁ sadā || 20||

चिद्रूपमात्रं ब्रह्मैव सच्चिदानन्दमद्वयम्।
आनन्दघन एवाहमहं ब्रह्मास्मि केवलम्॥ २६॥
cidrūpamātraṁ brahmaiva saccidānandamadvayam |
ānandaghana evāhamahaṁ brahmāsmi kevalam || 26||

अहमेव हृदाकाशश्चिदादित्यस्वरूपवान्।
आत्मनात्मनि तृप्तोऽस्मि ह्यरूपोऽस्म्यहमव्ययः॥ २८॥
ahameva hṛdākāśaścidādityasvarūpavān |
ātmanātmani tṛpto'smi hyarūpo'smyahamavyayaḥ || 28||

एकसङ्ख्याविहीनोऽस्मि नित्यमुक्तस्वरूपवान्।
आकाशादपि सूक्ष्मोऽहमाद्यन्ताभाववानहम्॥ २९॥
ekasaṅkhyāvihīno'smi nityamuktasvarūpavān |
ākāśādapi sūkṣmo'hamādyantābhāvavānaham || 29||

सर्वप्रकाशरूपोऽहं परावरसुखोऽस्म्यहम्।
सत्तामात्रस्वरूपोऽहं शुद्धमोक्षस्वरूपवान्॥ ३०॥
sarvaprakāśarūpo'haṁ parāvarasukho'smyaham |
sattāmātrasvarūpo'haṁ śuddhamokṣasvarūpavān || 30||

सत्यानन्दस्वरूपोऽहं ज्ञानानन्दघनोऽस्म्यहम्।
विज्ञानमात्ररूपोऽहं सच्चिदानन्दलक्षणः॥ ३१॥
satyānandasvarūpo'haṁ jñānānandaghano'smyaham |
vijñānamātrarūpo'haṁ saccidānandalakṣaṇaḥ || 31||

नामरूपविमुक्तोऽहमहमानन्दविग्रहः।
इन्द्रियाभावरूपोऽहं सर्वभावस्वरूपकः॥ ३६॥
nāmarūpavimukto'hamahamānandavigrahaḥ |
indriyābhāvarūpo'haṁ sarvabhāvasvarūpakaḥ || 36||

बन्धमुक्तिविहीनोऽहं शाश्वतानन्दविग्रहः।
आदिचैतन्यमात्रोऽहमखण्डैकरसोऽस्म्यहम्॥ ३७॥
bandhamuktivihīno'haṁ śāśvatānandavigrahaḥ |
ādicaitanyamātro'hamakhaṇḍaikaraso'smyaham || 37||

वाङ्मनोऽगोचरश्चाहं सर्वत्र सुखवानहम्।
सर्वत्र पूर्णरूपोऽहं भूमानन्दमयोऽस्म्यहम्॥ ३८॥
vāṅmano'gocaraścāhaṁ sarvatra sukhavānaham |
sarvatra pūrṇarūpo'haṁ bhūmānandamayo'smyaham || 38||

सर्वत्र तृप्तिरूपोऽहं परामृतरसोऽस्म्यहम्।
एकमेवाद्वितीयं सद्ब्रह्मैवाहं न संशयः॥ ३९॥
sarvatra tṛptirūpo'haṁ parāmṛtaraso'smyaham |
ekamevādvitīyaṁ sadbrahmaivāhaṁ na saṁśayaḥ || 39||

अहं ब्रह्मास्मि मन्त्रोऽयं देहदोषं विनाशयेत्।
अहं ब्रह्मास्मि मन्त्रोऽयं जन्मपापं विनाशयेत्॥ ६१॥
ahaṁ brahmāsmi mantro'yaṁ dehadoṣaṁ vināśayet |
ahaṁ brahmāsmi mantro'yaṁ janmapāpaṁ vināśayet || 61||

अहं ब्रह्मास्मि मन्त्रोऽयं भेदबुद्धिं विनाशयेत्।
अहं ब्रह्मास्मि मन्त्रोऽयं चिन्तादुःखं विनाशयेत्॥ ६३॥
ahaṁ brahmāsmi mantro'yaṁ bhedabuddhiṁ vināśayet |
ahaṁ brahmāsmi mantro'yaṁ cintāduḥkhaṁ vināśayet || 63||

अहं ब्रह्मास्मि मन्त्रोऽयं कोटिदोषं विनाशयेत्।
अहं ब्रह्मास्मि मन्त्रोऽयं सर्वतन्त्रं विनाशयेत्॥ ६८॥
ahaṁ brahmāsmi mantro'yaṁ koṭidoṣaṁ vināśayet |
ahaṁ brahmāsmi mantro'yaṁ sarvatantraṁ vināśayet || 68||

अहं ब्रह्मास्मि मन्त्रोऽयं ज्ञानानन्दं प्रयच्छति।
सप्तकोटिमहामन्त्रं जन्मकोटिशतप्रदम्॥ ७३॥
ahaṁ brahmāsmi mantro'yaṁ jñānānandaṁ prayacchati |
saptakoṭimahāmantraṁ janmakoṭiśatapradam || 73||

सर्वमन्त्रान्समुत्सृज्य एतं मन्त्रं समभ्यसेत्।
सद्यो मोक्षमवाप्नोति नात्र सन्देहमण्वपि॥ ७४॥
इति तृतीयोध्यायः॥ ३॥
sarvamantrānsamutsṛjya etaṁ mantraṁ samabhyaset |
sadyo mokṣamavāpnoti nātra sandehamaṇvapi || 74||
iti tṛtīyodhyāyaḥ || 3||

चिदात्माहं परात्माहं निर्गुणोऽहं परात्परः।

आत्ममात्रेण यस्तिष्ठेत्स जीवन्मुक्त उच्यते॥ १॥

cidātmāhaṁ parātmāhaṁ nirguṇo'haṁ parātparaḥ |
ātmamātreṇa yastiṣṭhetsa jīvanmukta ucyate || 1||

देहत्रयातिरिक्तोऽहं शुद्धचैतन्यमस्म्यहम्।
ब्रह्माहमिति यस्यान्तः स जीवनमुक्त उच्यते॥ २॥

dehatrayātirikto'haṁ śuddhacaitanyamasmyaham |
brahmāhamiti yasyāntaḥ sa jīvanamukta ucyate || 2||

यस्य देहादिकं नास्ति यस्य ब्रह्मेति निश्चयः।
परमानन्दपूर्णो यः स जीवन्मुक्त उच्यते॥ ३॥

yasya dehādikaṁ nāsti yasya brahmeti niścayaḥ |
paramānandapūrṇo yaḥ sa jīvanmukta ucyate || 3||

सर्वत्र पूर्णरूपात्मा सर्वत्रात्मावशेषकः।
आनन्दरतिरव्यक्तः परिपूर्णश्चिदात्मकः॥ ५॥

sarvatra pūrṇarūpātmā sarvatrātmāvaśeṣakaḥ |
ānandaratiravyaktaḥ paripūrṇaścidātmakaḥ || 5||

शुद्धचैतन्यरूपात्मा सर्वसङ्गविवर्जितः।
नित्यानन्दः प्रसन्नात्मा ह्यन्यचिन्ताविवर्जितः॥ ६

śuddhacaitanyarūpātmā sarvasaṅgavivarjitaḥ |
nityānandaḥ prasannātmā hyanyacintāvivarjitaḥ || 6

किञ्चिदस्तित्वहीनो यः स जीवन्मुक्त उच्यते।
न मे चित्तं न मे बुद्धिर्नाहङ्कारो न चेन्द्रियम्॥ ७॥

kiñcidastitvahīno yaḥ sa jīvanmukta ucyate |
na me cittaṁ na me buddhirnāhaṅkāro na cendriyam || 7||

न मे जरा न मे बाल्यं न मे यौवनमण्वपि।
अहं ब्रह्मास्म्यहं ब्रह्मास्म्यहं ब्रह्मेति निश्चयः॥ २९॥
na me jarā na me bālyaṁ na me yauvanamaṇvapi |
ahaṁ brahmāsmyahaṁ brahmāsmyahaṁ brahmeti niścayaḥ || 29||

चिदहं चिदहं चेति स जीवन्मुक्त उच्यते।
ब्रह्मैवाहं चिदेवाहं परो वाहं न संशयः॥ ३०॥
cidahaṁ cidahaṁ ceti sa jīvanmukta ucyate |
brahmaivāhaṁ cidevāhaṁ paro vāhaṁ na saṁśayaḥ || 30||

ब्रह्मभूतः प्रशान्तात्मा ब्रह्मानन्दमयः सुखी।
स्वच्छरूपो महामौनी वैदेही मुक्त एव सः॥ ३३॥
brahmabhūtaḥ praśāntātmā brahmānandamayaḥ sukhī |
svaccharūpo mahāmaunī vaidehī mukta eva saḥ || 33||

आनन्दात्मा प्रियो ह्यात्मा मोक्षात्मा बन्धवर्जितः।
ब्रह्मैवाहं चिदेवाहमेवं वापि न चिन्त्यते॥ ३६॥
ānandātmā priyo hyātmā mokṣātmā bandhavarjitaḥ |
brahmaivāhaṁ cidevāhamevaṁ vāpi na cintyate || 36||

चिन्मात्रेणैव यस्तिष्ठेद्वैदेही मुक्त एव सः॥३७॥
cinmātreṇaiva yastiṣṭhedvaidehī mukta eva saḥ ||37||

किञ्चित्क्वचित्कदाचिच्च आत्मानं न स्पृशत्यसौ।
तूष्णीमेव स्थितस्तूष्णीं तूष्णीं सत्यं न किञ्चन॥ ४०॥
kiñcitkvacitkadācicca ātmānaṁ na spṛśatyasau |
tūṣṇīmeva sthitastūṣṇīṁ tūṣṇīṁ satyaṁ na kiñcana || 40||

परमात्मा गुणातीतः सर्वात्मा भूतभावनः।
कालभेदं वस्तुभेदं देशभेदं स्वभेदकम्॥ ४१॥
paramātmā guṇātītaḥ sarvātmā bhūtabhāvanaḥ |
kālabhedaṁ vastubhedaṁ deśabhedaṁ svabhedakam || 41||

किञ्चिद्भेदं न तस्यास्ति किञ्चिद्वापि न विद्यते।
अहं त्वं तदिदं सोऽयं कालात्मा कालहीनकः॥ ४२॥
kiñcidbhedaṁ na tasyāsti kiñcidvāpi na vidyate |
ahaṁ tvaṁ tadidaṁ so'yaṁ kālātmā kālahīnakaḥ || 42||

शून्यात्मा सूक्ष्मरूपात्मा विश्वात्मा विश्वहीनकः।
देवात्मादेवहीनात्मा मेयात्मा मेयवर्जितः॥ ४३॥
śūnyātmā sūkṣmarūpātmā viśvātmā viśvahīnakaḥ |
devātmādevahīnātmā meyātmā meyavarjitaḥ || 43||

केवलः परमात्माहं केवलो ज्ञानविग्रहः।
सत्तामात्रस्वरूपात्मा नान्यत्किञ्चिज्जगद्भयम्॥ ४५॥
kevalaḥ paramātmāhaṁ kevalo jñānavigrahaḥ |
sattāmātrasvarūpātmā nānyatkiñcijjagadbhayam || 45||

जीवेश्वरेति वा क्वेति वेदशास्त्राणि क्वाहं त्विति।
इदं चैतन्यमेवेति अहं चैतन्यमित्यपि॥ ४६॥
jīveśvareti vā kveti vedaśāstrāṇi kvāhaṁ tviti |
idaṁ caitanyameveti ahaṁ caitanyamityapi || 46||

इति निश्चयशून्यो यो वैदेही मुक्त एव सः।
चैतन्यमात्रसंसिद्धः स्वात्मारामः सुखासनः॥ ४७॥
iti niścayaśūnyo yo vaidehī mukta eva saḥ |
caitanyamātrasaṁsiddhaḥ svātmārāmaḥ sukhāsanaḥ || 47||

अपरिच्छिन्नरूपात्मा अणुस्थूलादिवर्जितः।
तुर्यतुर्या परानन्दो वैदेही मुक्त एव सः॥ ४८॥
aparicchinnarūpātmā aṇusthūlādivarjitaḥ |
turyaturyā parānando vaidehī mukta eva saḥ || 48||

नामरूपविहीनात्मा परसंवित्सुखात्मकः।
तुरीयातीतरूपात्मा शुभाशुभविवर्जितः॥ ४९॥
nāmarūpavihīnātmā parasaṁvitsukhātmakaḥ |
turīyātītarūpātmā śubhāśubhavivarjitaḥ || 49||

साक्ष्यसाक्षित्वहीनात्मा किञ्चित्किञ्चिन्न किञ्चन।
यस्य प्रपञ्चभानं न ब्रह्माकारमपीह न॥ ५१॥
sākṣyasākṣitvahīnātmā kiñcitkiñcinna kiñcana |
yasya prapañcabhānaṁ na brahmākāramapīha na || 51||

अतीतातीतभावो यो वैदेही मुक्त एव सः।
चित्तवृत्तेरतीतो यश्चित्तवृत्त्यवभासकः॥ ५३॥
atītātītabhāvo yo vaidehī mukta eva saḥ |
cittavṛtteratīto yaścittavṛttyavabhāsakaḥ || 53||

सर्ववृत्तिविहीनात्मा वैदेही मुक्त एव सः।
तस्मिन्काले विदेहीति देहस्मरणवर्जितः॥ ५४॥
sarvavṛttivihīnātmā vaidehī mukta eva saḥ |
tasminkāle videhīti dehasmaraṇavarjitaḥ || 54||

सर्वमात्माहमात्मास्मि परमात्मा परात्मकः।
नित्यानन्द स्वरूपात्मा वैदेही मुक्त एव सः॥ ६२॥
sarvamātmāhamātmāsmi paramātmā parātmakaḥ |

nityānanda svarūpātmā vaidehī mukta eva saḥ || 62||

जीवात्मा परमात्मेति चिन्तासर्वस्ववर्जितः।
मुक्तामुक्तस्वरूपात्मा मुक्तामुक्तविवर्जितः॥ ६५॥
jīvātmā paramātmeti cintāsarvasvavarjitaḥ |
muktāmuktasvarūpātmā muktāmuktavivarjitaḥ || 65||

बन्धमोक्षस्वरूपात्मा बन्धमोक्षविवर्जितः।
द्वैताद्वैतस्वरूपात्मा द्वैताद्वैतविवर्जितः॥ ६६॥
bandhamokṣasvarūpātmā bandhamokṣavivarjitaḥ |
dvaitādvaitasvarūpātmā dvaitādvaitavivarjitaḥ || 66||

सर्वसङ्कल्पहीनात्मा वैदेही मुक्त एव सः।
निष्कलात्मा निर्मलात्मा बुद्धात्मापुरुषात्मकः॥ ६८॥
sarvasaṅkalpahīnātmā vaidehī mukta eva saḥ |
niṣkalātmā nirmalātmā buddhātmāpuruṣātmakaḥ || 68||

आनन्दकोशहीनात्मा पञ्चकोशविवर्जितः।
निर्विकल्पस्वरूपात्मा सविकल्पविवर्जितः॥ ७५॥
ānandakośahīnātmā pañcakośavivarjitaḥ |
nirvikalpasvarūpātmā savikalpavivarjitaḥ || 75||

दृश्यानुविद्धहीनात्मा शब्दविद्धविवर्जितः।
सदा समाधिशून्यात्मा आदिमध्यान्तवर्जितः॥ ७६॥
dṛśyānuviddhahīnātmā śabdaviddhavivarjitaḥ |
sadā samādhiśūnyātmā ādimadhyāntavarjitaḥ || 76||

प्रज्ञानवाक्यहीनात्मा अहंब्रह्मास्मिवर्जितः।
तत्त्वमस्यादिहीनात्मा अयमात्मेत्यभावकः॥ ७७॥

prajñānavākyahīnātmā ahaṁbrahmāsmivarjitaḥ |
tattvamasyādihīnātmā ayamātmetyabhāvakaḥ || 77||

ओङ्कारवाच्यहीनात्मा सर्ववाच्यविवर्जितः।
अवस्थात्रयहीनात्मा अक्षरात्मा चिदात्मकः॥ ७८॥
oṅkāravācyahīnātmā sarvavācyavivarjitaḥ |
avasthātrayahīnātmā akṣarātmā cidātmakaḥ || 78||

आत्मज्ञेयादिहीनात्मा यत्किञ्चिदिदमात्मकः।
भावाभावविहीनात्मा वैदेही मुक्त एव सः॥ ७९॥
ātmajñeyādihīnātmā yatkiñcididamātmakaḥ |
bhāvābhāvavihīnātmā vaidehī mukta eva saḥ || 79||

इति चतुर्थोऽध्यायः॥ ४॥
iti caturtho'dhyāyaḥ || 4||

सर्ववाचोऽवधिर्ब्रह्म सर्वचिन्तावधिर्गुरुः।
सर्वकारणकार्यात्मा कार्यकारणवर्जितः॥ १॥
sarvavāco'vadhirbrahma sarvacintāvadhirguruḥ |
sarvakāraṇakāryātmā kāryakāraṇavarjitaḥ || 1||

सर्वसङ्कल्परहितः सर्वनादमयः शिवः।
सर्ववर्जितचिन्मात्रः सर्वानन्दमयः परः॥ २॥
sarvasaṅkalparahitaḥ sarvanādamayaḥ śivaḥ |
sarvavarjitacinmātraḥ sarvānandamayaḥ paraḥ || 2||

सर्वतेजःप्रकाशात्मा नादानन्दमयात्मकः।
सर्वानुभवनिर्मुक्तः सर्वध्यानविवर्जितः॥ ३॥
sarvatejaḥprakāśātmā nādānandamayātmakaḥ |

sarvānubhavanirmuktaḥ sarvadhyānavivarjitaḥ || 3||

सर्वनादकलातीत एष आत्माहमव्ययः।
आत्मानात्मविवेकादिभेदाभेदविवर्जितः॥ ४॥
sarvanādakalātīta eṣa ātmāhamavyayaḥ |
ātmānātmavivekādibhedābhedavivarjitaḥ || 4||

शान्ताशान्तादिहीनात्मा नादान्तर्ज्योतिरूपकः।
महावाक्यार्थतो दूरो ब्रह्मास्मीत्यतिदूरतः॥ ५॥
śāntāśāntādihīnātmā nādāntarjyotirūpakaḥ |
mahāvākyārthato dūro brahmāsmītyatidūrataḥ || 5||

तच्छब्दवर्ज्यस्त्वंशब्दहीनो वाक्यार्थवर्जितः।
क्षराक्षरविहीनो यो नादान्तर्ज्योतिरेव सः॥ ६॥
tacchabdavarjyastvaṁśabdahīno vākyārthavarjitaḥ |
kṣarākṣaravihīno yo nādāntarjyotireva saḥ || 6||

अखण्डैकरसो वाहमानन्दोऽस्मीति वर्जितः।
सर्वातीतस्वभावात्मा नादान्तर्ज्योतिरेव सः॥ ७॥
akhaṇḍaikaraso vāhamānando'smīti varjitaḥ |
sarvātītasvabhāvātmā nādāntarjyotireva saḥ || 7||

आत्मेति शब्दहीनो य आत्मशब्दार्थवर्जितः।
सच्चिदानन्दहीनो य एषैवात्मा सनातनः॥ ८॥
ātmeti śabdahīno ya ātmaśabdārthavarjitaḥ |
saccidānandahīno ya eṣaivātmā sanātanaḥ || 8||

स निर्देष्टुमशक्यो यो वेदवाक्यैरगम्यतः।
यस्य किञ्चिद्बहिर्नास्ति किञ्चिदन्तः कियन्न च॥ ९॥

sa nirdeṣṭumaśakyo yo vedavākyairagamyataḥ |
yasya kiñcidbahirnāsti kiñcidantaḥ kiyanna ca || 9||

यस्य लिङ्गं प्रपञ्चं वा ब्रह्मैवात्मा न संशयः।
नास्ति यस्य शरीरं वा जीवो वा भूतभौतिकः॥ १०॥
yasya liṅgaṁ prapañcaṁ vā brahmaivātmā na saṁśayaḥ |
nāsti yasya śarīraṁ vā jīvo vā bhūtabhautikaḥ || 10||

द्रष्टृदर्शनदृश्यं वा ईषन्मात्रं कलात्मकम्।
अनात्मेति प्रसङ्गो वा ह्यनात्मेति मनोऽपि वा॥ १५॥
draṣṭṛdarśanadṛśyaṁ vā īṣanmātraṁ kalātmakam |
anātmeti prasaṅgo vā hyanātmeti mano'pi vā || 15||

अनात्मेति जगद्वापि नास्ति नास्ति निश्चिनु।
सर्वसङ्कल्पशून्यत्वात्सर्वकार्यविवर्जनात्॥ १६॥
anātmeti jagadvāpi nāsti nāsti niścinu |
sarvasaṅkalpaśūnyatvātsarvakāryavivarjanāt || 16||

केवलं ब्रह्ममात्रत्वान्नास्त्यनात्मेति निश्चिनु।
देहत्रयविहीनत्वात्कालत्रयविवर्जनात्॥ १७॥
kevalaṁ brahmamātratvānnāstyanātmeti niścinu |
dehatrayavihīnatvātkālatrayavivarjanāt || 17||

जीवत्रयगुणाभावात्तापत्रयविवर्जनात्।
लोकत्रयविहीनत्वात्सर्वमात्मेति शासनात्॥ १८॥
jīvatrayaguṇābhāvāttāpatrayavivarjanāt |
lokatrayavihīnatvātsarvamātmeti śāsanāt || 18||

चित्ताभाच्चिन्तनीयं देहाभावाज्जरा न च।

पादाभावाद्गतिर्नास्ति हस्ताभावात्क्रिया न च॥ १९॥
cittābhāccintanīyaṁ dehābhāvājjarā na ca |
pādābhāvādgatirnāsti hastābhāvātkriyā na ca || 19||

मृत्युर्नास्ति जनाभावाद्बुद्ध्यभावात्सुखादिकम्।
धर्मो नास्ति शुचिर्नास्ति सत्यं नास्ति भयं न च॥ २०॥
mṛtyurnāsti janābhāvādbuddhyabhāvātsukhādikam |
dharmo nāsti śucirnāsti satyaṁ nāsti bhayaṁ na ca || 20||

परंब्रह्माहमस्मीति स्मरणस्य मनो न हि।
ब्रह्ममात्रं जगदिदं ब्रह्ममात्रं त्वमप्यहम्॥ ३०॥
paraṁbrahmāhamasmīti smaraṇasya mano na hi |
brahmamātraṁ jagadidaṁ brahmamātraṁ tvamapyaham || 30||

चिन्मात्रं केवलं चाहं नास्त्यनात्म्येति निश्चिनु।
इदं प्रपञ्चं नास्त्येव नोत्पन्नं नो स्थितं क्वचित्॥ ३१॥
cinmātraṁ kevalaṁ cāhaṁ nāstyanātmyeti niścinu |
idaṁ prapañcaṁ nāstyeva notpannaṁ no sthitaṁ kvacit || 31||

चित्तं प्रपञ्चमित्याहुर्नास्ति नास्त्येव सर्वदा।
न प्रपञ्चं न चित्तादि नाहङ्कारो न जीवकः॥ ३२॥
cittaṁ prapañcamityāhurnāsti nāstyeva sarvadā |
na prapañcaṁ na cittādi nāhaṅkāro na jīvakaḥ || 32||

मायाकार्यादिकं नास्ति माया नास्ति भयं नहि।
कर्ता नास्ति क्रिया नास्ति श्रवणं मननं नहि॥ ३३॥
māyākāryādikaṁ nāsti māyā nāsti bhayaṁ nahi |
kartā nāsti kriyā nāsti śravaṇaṁ mananaṁ nahi || 33||

अहोरात्रादिकं नास्ति स्नानध्यानादिकं नहि।
भ्रान्तिरभ्रान्तिर्नास्त्येव नास्त्यनात्मेति निश्चिनु॥ ४२॥
ahorātrādikaṁ nāsti snānadhyānādikaṁ nahi |
bhrāntirabhrāntirnāstyeva nāstyanātmeti niścinu || 42||

मह्यं तुभ्यं मयेत्यादि तत्सर्वं वितथं भवेत्।
रक्षको विष्णुरित्यादि ब्रह्मा सृष्टेस्तु कारणम्॥ ५१॥
mahyaṁ tubhyaṁ mayetyādi tatsarvaṁ vitathaṁ bhavet |
rakṣako viṣṇurityādi brahmā sṛṣṭestu kāraṇam || 51||

संहारे रुद्र इत्येवं सर्वं मिथ्येति निश्चिनु।
स्नानं जपस्तपो होमः स्वाध्यायो देवपूजनम्॥ ५२॥
saṁhāre rudra ityevaṁ sarvaṁ mithyeti niścinu |
snānaṁ japastapo homaḥ svādhyāyo devapūjanam || 52||

त्वं ब्रह्मासि ॥ ५९॥
tvaṁ brahmāsi || 59||

इदं प्रपञ्चं यत्किञ्चिद्यद्यज्जगति विद्यते।
दृश्यरूपं च दृग्रूपं सर्वं शशविषाणवत्॥ ७५॥
idaṁ prapañcaṁ yatkiñcidyadyajjagati vidyate |
dṛśyarūpaṁ ca dṛgrūpaṁ sarvaṁ śaśaviṣāṇavat || 75||

सङ्कल्पमेव यत्किञ्चित्तत्तन्नास्तीति निश्चिनु।
नास्ति नास्ति जगत्सर्वं गुरुशिष्यादिकं नहीत्युपनिषत्॥ १०५॥
saṅkalpameva yatkiñcittattannāstīti niścinu |
nāsti nāsti jagatsarvaṁ guruśiṣyādikaṁ nahītyupaniṣat || 105||

इति पञ्चमोऽध्यायः॥ ५॥

iti pañcamo'dhyāyaḥ || 5||

न त्वं नाहं न चान्यद्वा सर्वं ब्रह्मैव केवलम्।
न वाक्यं न पदं वेदं नाक्षरं न जडं क्वचित्॥ ४॥
na tvaṁ nāhaṁ na cānyadvā sarvaṁ brahmaiva kevalam |
na vākyaṁ na padaṁ vedaṁ nākṣaraṁ na jaḍaṁ kvacit || 4||

इदं ब्रह्म परं ब्रह्म सत्यं ब्रह्म प्रभुर्हि सः।
कालो ब्रह्म कला ब्रह्म सुखं ब्रह्म स्वयंप्रभम्॥ ३५॥
idaṁ brahma paraṁ brahma satyaṁ brahma prabhurhi saḥ |
kālo brahma kalā brahma sukhaṁ brahma svayaṁprabham ||
35||

एकं ब्रह्म द्वयं ब्रह्म मोहो ब्रह्म शमादिकम्।
दोषो ब्रह्म गुणो ब्रह्म दमः शान्तं विभुः प्रभुः॥ ३६॥
ekaṁ brahma dvayaṁ brahma moho brahma śamādikam |
doṣo brahma guṇo brahma damaḥ śāntaṁ vibhuḥ prabhuḥ ||
36||

लोको ब्रह्म गुरुर्ब्रह्म शिष्यो ब्रह्म सदाशिवः।
पूर्वं ब्रह्म परं ब्रह्म शुद्धं ब्रह्म शुभाशुभम्॥ ३७॥
loko brahma gururbrahma śiṣyo brahma sadāśivaḥ |
pūrvaṁ brahma paraṁ brahma śuddhaṁ brahma śubhāśubham ||
37||

जीव एव सदा ब्रह्म सच्चिदानन्दमस्म्यहम्।
सर्वं ब्रह्ममयं प्रोक्तं सर्वं ब्रह्ममयं जगत्॥ ३८॥
jīva eva sadā brahma saccidānandamasmyaham |
sarvaṁ brahmamayaṁ proktaṁ sarvaṁ brahmamayaṁ jagat ||

38||

स्वयं ब्रह्म न सन्देहः स्वस्मादन्यन्न किञ्चन।
सर्वमात्मैव शुद्धात्मा सर्वं चिन्मात्रमद्वयम्॥ ३९॥
svayaṁ brahma na sandehaḥ svasmādanyanna kiñcana |
sarvamātmaiva śuddhātmā sarvaṁ cinmātramadvayam || 39||

ब्रह्मैव सर्वं चिन्मात्रं ब्रह्ममात्रं जगत्त्रयम्।
आनन्दं परमानन्दमन्यत्किञ्चिन्न किञ्चन॥ ४२॥
brahmaiva sarvaṁ cinmātraṁ brahmamātraṁ jagattrayam |
ānandaṁ paramānandamanyatkiñcinna kiñcana || 42||

अहमेव गुणातीत अहमेव परात्परः।
अहमेव परं ब्रह्म अहमेव गुरोर्गुरुः॥ ४४॥
ahameva guṇātīta ahameva parātparaḥ |
ahameva paraṁ brahma ahameva gurorguruḥ || 44||

आत्मनोऽन्या गतिर्नास्ति सर्वमात्ममयं जगत्।
आत्मनोऽन्यन्नहि क्वापि आत्मनोऽन्यत्तृणं नहि॥ ४६॥
ātmano'nyā gatirnāsti sarvamātmamayaṁ jagat |
ātmano'nyannahi kvāpi ātmano'nyattṛṇaṁ nahi || 46||

आत्मनोऽन्यत्तुषं नास्ति सर्वमात्ममयं जगत्।
ब्रह्ममात्रमिदं सर्वं ब्रह्ममात्रमसन्न हि॥ ४७॥
ātmano'nyattuṣaṁ nāsti sarvamātmamayaṁ jagat |
brahmamātramidaṁ sarvaṁ brahmamātramasanna hi || 47||

ब्रह्ममात्रं श्रुतं सर्वं स्वयं ब्रह्मैव केवलम्।
ब्रह्ममात्रं वृतं सर्वं ब्रह्ममात्रं रसं सुखम्॥ ४८॥

brahmamātraṁ śrutaṁ sarvaṁ svayaṁ brahmaiva kevalam |
brahmamātraṁ vṛtaṁ sarvaṁ brahmamātraṁ rasaṁ sukham || 48||

ब्रह्ममात्रं चिदाकाशं सच्चिदानन्दमव्ययम्।
ब्रह्मणोऽन्यतरन्नास्ति ब्रह्मणोऽन्यज्जगन्न च॥ ४९॥
brahmamātraṁ cidākāśaṁ saccidānandamavyayam |
brahmaṇo'nyatarannāsti brahmaṇo'nyajjaganna ca || 49||

ब्रह्मणोऽन्यदहं नास्ति ब्रह्मणोऽन्यत्फलं नहि।
ब्रह्मणोऽन्यत्तृणं नास्ति ब्रह्मणोऽन्यत्पदं नहि॥ ५०॥
brahmaṇo'nyadaha nāsti brahmaṇo'nyatphalaṁ nahi |
brahmaṇo'nyattṛṇaṁ nāsti brahmaṇo'nyatpadaṁ nahi || 50||

ब्रह्मणोऽन्यद्गुरुर्नास्ति ब्रह्मणोऽन्यमसद्वपुः।
ब्रह्मणोऽन्यन्न चाहन्ता त्वत्तेदन्ते नहि क्वचित्॥ ५१॥
brahmaṇo'nyadgururnāsti brahmaṇo'nyamasadvapuḥ |
brahmaṇo'nyanna cāhantā tvattedante nahi kvacit || 51||

सच्चिदानन्दमात्रोऽहमनुत्पन्नमिदं जगत्।
आत्मैवाहं परं सत्यं नान्याः संसारदृष्टयः॥ ५८॥
saccidānandamātro'hamanutpannamidaṁ jagat |
ātmaivāhaṁ paraṁ satyaṁ nānyāḥ saṁsāradṛṣṭayaḥ || 58||

योगानन्दस्वरूपोऽहं मुख्यानन्दमहोदयः।
सर्वज्ञानप्रकाशोऽस्मि मुख्यविज्ञानविग्रहः॥ ६८॥
yogānandasvarūpo'haṁ mukhyānandamahodayaḥ |
sarvajñānaprakāśo'smi mukhyavijñānavigrahaḥ || 68||

तुर्यातुर्यप्रकाशोऽस्मि तुर्यातुर्यादिवर्जितः।
चिदक्षरोऽहं सत्योऽहं वासुदेवोऽजरोऽमरः॥ ६९॥
turyāturyaprakāśo'smi turyāturyādivarjitaḥ |
cidakṣaro'haṁ satyo'haṁ vāsudevo'jaro'maraḥ || 69||

अहं ब्रह्म चिदाकाशं नित्यं ब्रह्म निरञ्जनम्।
शुद्धं बुद्धं सदामुक्तमनामकमरूपकम्॥ ७०॥
ahaṁ brahma cidākāśaṁ nityaṁ brahma nirañjanam |
śuddhaṁ buddhaṁ sadāmuktamanāmakamarūpakam || 70||

मत्तोऽन्यदस्ति चेन्मिथ्या यथा मरुमरीचिका।
वन्ध्याकुमारवचने भीतिश्चेदस्ति किञ्चन॥ ७३॥
matto'nyadasti cenmithyā yathā marumarīcikā |
vandhyākumāravacane bhītiścedasti kiñcana || 73||

शशशृङ्गेण नागेन्द्रो मृतश्चेज्जगदस्ति तत्।
मृगतृष्णाजलं पीत्वा तृप्तश्चेदस्त्विदं जगत्॥ ७४॥
śaśaśṛṅgeṇa nāgendro mṛtaścejjagadasti tat |
mṛgatṛṣṇājalaṁ pītvā tṛptaścedastvidaṁ jagat || 74||

नरशृङ्गेण नष्टश्चेत्कश्चिदस्त्विदमेव हि।
गन्धर्वनगरे सत्ये जगद्भवति सर्वदा॥ ७५॥
naraśṛṅgeṇa naṣṭaścetkaścidastvidameva hi |
gandharvanagare satye jagadbhavati sarvadā || 75||

गगने नीलिमासत्ये जगत्सत्यं भविष्यति।
शुक्तिकारजतं सत्यं भूषणं चेज्जगद्भवेत्॥ ७६॥
gagane nīlimāsatye jagatsatyaṁ bhaviṣyati |
śuktikārajataṁ satyaṁ bhūṣaṇaṁ cejjagadbhavet || 76||

मासात्पूर्वं मृतो मर्त्यो ह्यागतश्चेज्जगद्भवेत् ।
तक्रं क्षीरस्वरूपं चेत्क्वचिन्नित्यं जगद्भवेत्॥ ८०॥
māsātpūrvaṁ mṛto martyo hyāgataścejjagadbhavet |
takraṁ kṣīrasvarūpaṁ cetkvacinnityaṁ jagadbhavet || 80||

गोस्तनादुद्भवं क्षीरं पुनरारोपणे जगत्।
भूरजोऽब्धौ समुत्पन्ने जगद्भवतु सर्वदा॥ ८१॥
gostanādudbhavaṁ kṣīraṁ punarāropaṇe jagat |
bhūrajo'bdhau samutpanne jagadbhavatu sarvadā || 81||

ज्वालावह्निः शीतलश्चेदस्तिरूपमिदं जगत्।
ज्वालाग्निमण्डले पद्मवृद्धिश्चेज्जगदस्त्विदम्॥ ८४॥
jvālāvahniḥ śītalaścedastirūpamidaṁ jagat |
jvālāgnimaṇḍale padmavṛddhiścejjagadastvidam || 84||

ज्ञानिनो हृदयं मूढैर्ज्ञातं चेत्कल्पनं तदा।
श्वानेन सागरे पीते निःशेषेण मनो भवेत्॥ ९६॥
jñānino hṛdayaṁ mūḍhairjñātaṁ cetkalpanaṁ tadā |
śvānena sāgare pīte niḥśeṣeṇa mano bhavet || 96||

अजकुक्षौ जगन्नास्ति ह्यात्मकुक्षौ जगन्नहि।
सर्वदाऽभेदकलने द्वैताद्वैतं न विद्यते॥ ९९॥
ajakukṣau jagannāsti hyātmakukṣau jagannahi |
sarvadā'bhedakalane dvaitādvaitaṁ na vidyate || 99||

मायाकार्यमिदं भेदमस्ति चेद्ब्रह्मभावनम्।
देहोऽहमिति दुःखं चेद्ब्रह्माहमिति निश्चयः॥ १००॥
māyākāryamidaṁ bhedamasti cedbrahmabhāvanam |

deho'hamiti duḥkhaṁ cedbrahmāhamiti niścayaḥ || 100||

हृदयग्रन्थिरस्तित्वे छिद्यते ब्रह्मचक्रकम्।
संशये समनुप्राप्ते ब्रह्मनिश्चयमाश्रयेत्॥ १०१॥
hṛdayagranthirastitve chidyate brahmacakrakam |
saṁśaye samanuprāpte brahmaniścayamāśrayet || 101||

अनात्मरूपचोरश्चेदात्मरत्नस्य रक्षणम्।
नित्यानन्दमयं ब्रह्म केवलं सर्वदा स्वयम्॥ १०२॥
anātmarūpacoraścedātmaratnasya rakṣaṇam |
nityānandamayaṁ brahma kevalaṁ sarvadā svayam || 102||

अहं ब्रह्मेति निश्चित्य अहंभावं परित्यज।
सर्वमेव लयं याति सुप्तहस्तस्थपुष्पवत्॥ १०४॥
ahaṁ brahmeti niścitya ahaṁbhāvaṁ parityaja |
sarvameva layaṁ yāti suptahastasthapuṣpavat || 104||

न देहो न च कर्माणि सर्वं ब्रह्मैव केवलम्।
न भूतं न च कार्यं च न चावस्थाचतुष्टयम्॥ १०५॥
na deho na ca karmāṇi sarvaṁ brahmaiva kevalam |
na bhūtaṁ na ca kāryaṁ ca na cāvasthācatuṣṭayam || 105||

लक्षणात्रयविज्ञानं सर्वं ब्रह्मैव केवलम्।
सर्वव्यापारमुत्सृज्य ह्यहं ब्रह्मेति भावय॥ १०६॥
lakṣaṇātrayavijñānaṁ sarvaṁ brahmaiva kevalam |
sarvavyāpāramutsṛjya hyahaṁ brahmeti bhāvaya || 106||

इति तेजोबिन्दूपनिषत्समाप्ता॥
iti tejobindūpaniṣatsamāptā ||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०३९ ७

॥ तैत्तिरीयोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

039 7

|| taittirīyopaniṣat ||

॥ इति शीक्षावल्ली समाप्ता॥

|| iti śīkṣāvallī samāptā ||

ॐ ब्रह्मविदाप्नोति परम्। तदेषाऽभ्युक्ता।

om brahmavidāpnoti param | tadeṣā'bhyuktā |

तदप्येष श्लोको भवति॥ १॥ इति प्रथमोऽनुवाकः॥

tadapyeṣa śloko bhavati || 1|| iti prathamo'nuvākaḥ ||

स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः।

sa yaścāyaṁ puruṣe | yaścāsāvāditye | sa ekaḥ |

॥ इति ब्रह्मानन्दवल्ली समाप्ता॥

|| iti brahmānandavallī samāptā ||

स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः॥ ४॥

sa yaścāyaṁ puruṣe | yaścāsāvāditye | sa ekaḥ || 4||

अहमन्नमहमन्नमहमन्नम्।

अहमन्नादो३ऽहमन्नादो३।आहमन्नादः।

इति दशमोऽनुवाकः॥

ahamannamahamannamahamannam |
ahamannādo3'hamannādo3|āhamannādaḥ |
iti daśamo'nuvākaḥ ||

॥ इति भृगुवल्ली समाप्ता॥
|| iti bhṛguvallī samāptā ||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०४० ५३
॥ त्रिपाद्विभूतिमहानारायणोपनिषत् ॥

varṇa-kramāṅka muktikā-kramāṅka
040 53
|| tripādvibhūtimahānārāyaṇopaniṣat ||

त्वमेव सर्वशक्तिः।
tvameva sarvaśaktiḥ |

सर्वकालाबाधितं ब्रह्म।
sarvakālābādhitaṁ brahma |

सगुणनिर्गुणस्वरूपं ब्रह्म।
saguṇanirguṇasvarūpaṁ brahma |

आदिमध्यान्तशून्यं ब्रह्म।
ādimadhyāntaśūnyaṁ brahma |

मायातीतं गुणातीतं ब्रह्म।
māyātītaṁ guṇātītaṁ brahma |

अनन्तमप्रमेयाखण्डपरिपूर्णं ब्रह्म।
anantamaprameyākhaṇḍaparipūrṇaṁ brahma |

अद्वितीयपरमानन्दशुद्धबुद्धमुक्तसत्यस्वरूपव्यापकाभिन्नापरिच्छिन्नं ब्रह्म।
advitīyaparamānandaśuddhabuddhamuktasatyasvarūpavyāpakābhinnāparicchinaṁ brahma |

सच्चिदानन्दस्वप्रकाशं ब्रह्म।
saccidānandasvaprakāśaṁ brahma |

मनोवाचामगोचरं ब्रह्म।
manovācāmagocaraṁ brahma |

देशतः कालतो वस्तुतः परिच्छेदरहितं ब्रह्म।
deśataḥ kālato vastutaḥ paricchedarahitaṁ brahma |

तुरीयं निराकारमेकं ब्रह्म।
turīyaṁ nirākāramekaṁ brahma |

अद्वैतमनिर्वाच्यं ब्रह्म।
advaitamanirvācyaṁ brahma |

आद्वैतपरमानन्दो विभुर्नित्यो निष्कलङ्को निर्विकल्पो निरञ्जनो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चिदिति य एवं वेद स पुरुषस्तदीयोपासनया तस्य सायुज्यमेतीत्यसंशयमित्युपनिषत्॥
इत्याथर्वणमहानारायणोपनिषदि पादचतुष्टयस्वरूपनिरूपणं

नाम प्रथमोऽध्यायः॥ १॥
ādvaitaparamānando vibhurnityo niṣkalaṅko nirvikalpo nirañjano nirākhyātaḥ śuddho deva eko nārāyaṇo na dvitīyo'sti kaściditi ya evaṁ veda sa puruṣastadīyopāsanayā tasya sāyujyametītyasaṁśayamityupaniṣat ||
ityātharvaṇamahānārāyaṇopaniṣadi pādacatuṣṭayasvarūpanirūpaṇaṁ nāma prathamo'dhyāyaḥ || 1||

एकमेवाद्वितीयं ब्रह्म।
ekamevādvitīyaṁ brahma |

नेह नानास्ति किञ्चन।
neha nānāsti kiñcana |

मूलाविद्याप्रलयस्वरूपणं नाम तृतीयोऽध्यायः॥ ३॥
mūlāvidyāpralayasvarūpaṇaṁ nāma tṛtīyo'dhyāyaḥ || 3||

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
परमतत्त्वस्वरूपनिरूपणं नाम चतुर्थोऽध्यायः॥ ४॥
पूर्वकाण्डः समाप्तः॥
kāryopādhirayaṁ jīvaḥ kāraṇopādhirīśvaraḥ |
paramatattvasvarūpanirūpaṇaṁ nāma caturtho'dhyāyaḥ || 4||
pūrvakāṇḍaḥ samāptaḥ ||

आवयोरन्तरं न विद्यते त्वमेवाहमहमेवत्वम्
इत्यभिधायेत्युक्त्वादिनारायणस्तिरोदधे तदेत्युपनिषत्॥
āvayorantaraṁ na vidyate tvamevāhamahamevatvam
ityabhidhāyetyuktvādinārāyaṇastirodadhe tadetyupaniṣat ||

इत्याथर्वणमहानारायणोपनिषदि परममोक्षमार्गस्वरूपनिरूपणं
नाम षष्ठोध्यायः॥ ६॥
ityātharvaṇamahānārāyaṇopaniṣadi
paramamokṣamārgasvarūpanirūpaṇaṁ
nāma ṣaṣṭhodhyāyaḥ || 6||

अखिलप्रमाणातीतं मनोवाचामगोचरं
akhilapramāṇātītaṁ manovācāmagocaraṁ

चित्स्वरूपं निरञ्जनं परब्रह्मस्वरूपं परब्रह्मणः परमरहस्यकैवल्यं महायन्त्रमय
परमवैकुण्ठनारायणयन्त्रं विजयते।
citsvarūpaṁ nirañjanaṁ parabrahmasvarūpaṁ parabrahmaṇaḥ
paramarahasyakaivalyaṁ mahāyantramaya
paramavaikuṇṭhanārāyaṇayantraṁ vijayate |

मत्स्वरूपमेव सर्वं मद्व्यतिरिक्तमणुमात्रं न विद्यते।
पुनः पितामहः परिपृच्छति।
matsvarūpameva sarvaṁ madvyatiriktamaṇumātraṁ na vidyate |
punaḥ pitāmahaḥ paripṛcchati |

परमानन्दलक्षणाखण्डामिततेजोराश्याकारं विभाव्योपासकः स्वयं शुद्ध-
बोधानन्दमयामृतनिरतिशयानन्दतेजोराश्याकारो भूत्वा महावाक्यार्थमनुस्मरन् ब्रह्माहमस्मि
अहमस्मि ब्रह्माहमस्मि योऽहमस्मि ब्रह्माहमस्मि अहमेवाहं मां
जुहोमि स्वाहा।
paramānandalakṣaṇākhaṇḍāmitatejorāśyākāraṁ vibhāvyopāsakaḥ
svayaṁ śuddha-
bodhānandamayāmṛtaniratiśayānandatejorāśyākāro bhūtvā
mahāvākyārthamanusmaran brahmāhamasmi ahamasmi

brahmāhamasmi yo'hamasmi brahmāhamasmi ahamevāhaṁ māṁ juhomi svāhā |

सच्चिदात्मकोऽहमजोऽहं परिपूर्णोऽहमस्मीति
saccidātmako'hamajo'haṁ paripūrṇo'hamasmīti

वाचामगोचरनिराकारपरब्रह्मस्वरूपोऽहमेव।
vācāmagocaranirākāraparabrahmasvarūpo'hameva |

परमसायुज्यमुक्तिस्वरूपनिरूपणं नामाष्टमोऽध्यायः॥ ८॥
इति त्रिपाद्विभूतिमहानारायणोपनिषत्समाप्ता॥
paramasāyujyamuktisvarūpanirūpaṇaṁ nāmāṣṭamo'dhyāyaḥ || 8||
iti tripādvibhūtimahānārāyaṇopaniṣatsamāptā ||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०४१ ८२
॥ त्रिपुरोपनिषत्॥
०

varṇa-kramāṅka muktikā-kramāṅka
041 82
|| tripuropaniṣat ||
0

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०४२ ८०
॥ त्रिपुरातापिन्युपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

042 80

|| tripurātāpinyupaniṣat ||

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धनं विषयासक्तं मुक्त्यै निर्विषयं मनः॥ ३॥
mana eva manuṣyāṇāṁ kāraṇaṁ bandhamokṣayoḥ |
bandhanaṁ viṣayāsaktaṁ muktyai nirviṣayaṁ manaḥ || 3||

तदेव निष्कलं ब्रह्म निर्विकल्पं निरञ्जनम्।
तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म संपद्यते क्रमात्॥ ८॥
tadeva niṣkalaṁ brahma nirvikalpaṁ nirañjanam |
tadbrahmāhamiti jñātvā brahma saṁpadyate kramāt || 8||

इति पञ्चमोपनिषत्॥ ५॥
iti pañcamopaniṣat || 5||

॥ इति श्रीत्रिपुरातापिन्युपनिषत्समाप्ता॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०४३ ४४

॥ त्रिशिखिब्राह्मणोपनिषत्॥

|| iti śrītripurātāpinyupaniṣatsamāptā ||

varṇa-kramāṅka muktikā-kramāṅka

043 44

|| triśikhibrāhmaṇopaniṣat ||

ध्यानस्य विस्मृतिः सम्यक्समाधिरभिधीयते।
अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम्॥ ३२॥
dhyānasya vismṛtiḥ samyaksamādhirabhidhīyate |
ahiṁsā satyamasteyaṁ brahmacaryaṁ dayārjavam || 32||

यमैश्च नियमैश्चैव आसनैश्च सुसंयतः।
नाडीशुद्धिं च कृत्वादौ प्राणायामं समाचरेत्॥ ५३॥
yamaiśca niyamaiścaiva āsanaiśca susaṁyataḥ |
nāḍīśuddhiṁ ca kṛtvādau prāṇāyāmaṁ samācaret || 53||

जीवात्मनः परस्यापि यद्येवमुभयोरपि।
अहमेव परंब्रह्म ब्रह्माहमिति संस्थितिः॥ १६०॥
jīvātmanaḥ parasyāpi yadyevamubhayorapi |
ahameva paraṁbrahma brahmāhamiti saṁsthitiḥ || 160||

समाधिः स तु विज्ञेयः सर्ववृत्तिविवर्जितः।
ब्रह्म सम्पद्यते योगी न भूयः संसृतिं व्रजेत्॥ १६१॥
samādhiḥ sa tu vijñeyaḥ sarvavṛttivivarjitaḥ |
brahma sampadyate yogī na bhūyaḥ saṁsṛtiṁ vrajet || 161||

इति त्रिशिखिब्राह्मणोपनिषत्समाप्ता॥

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०४४	४९

॥ दक्षिणामूर्त्युपनिषत्॥
०

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०४५	१०१

॥ दत्तात्रेयोपनिषत्॥

०

iti triśikhibrāhmaṇopaniṣatsamāptā ||

varṇa-kramāṅka muktikā-kramāṅka

044 49

|| dakṣiṇāmūrtyupaniṣat ||

0

varṇa-kramāṅka muktikā-kramāṅka

045 101

|| dattātreyopaniṣat ||

0

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०४६ ८१

॥ देवी उपनिषत्॥

०

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०४७ ३९

॥ ध्यानबिन्दूपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

046 81

|| devī upaniṣat ||

0

varṇa-kramāṅka muktikā-kramāṅka

047 39

|| dhyānabindūpaniṣat ||

वृक्षं तु सकलं विद्याच्छाया तस्यैव निष्कला।
सकले निष्कले भावे सर्वत्रात्मा व्यवस्थितः॥ ८॥
vṛkṣaṁ tu sakalaṁ vidyācchāyā tasyaiva niṣkalā |
sakale niṣkale bhāve sarvatrātmā vyavasthitaḥ || 8||

उकारः सात्त्विकः शुक्लो मकारः कृष्णतामसः।
अष्टाङ्गं च चतुष्पादं त्रिस्थानं पञ्चदैवतम्॥ १३॥
ukāraḥ sāttvikaḥ śuklo makāraḥ kṛṣṇatāmasaḥ |
aṣṭāṅgaṁ ca catuṣpādaṁ tristhānaṁ pañcadaivatam || 13||

ओङ्कारं यो न जानाति ब्रह्मणो न भवेत्तु सः।
प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते॥ १४॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०४८ ३८

॥ नादबिन्दूपनिषत्॥

ऋग्वेदीय योगोपनिषत्

oṅkāraṁ yo na jānāti brahmaṇo na bhavettu saḥ |
praṇavo dhanuḥ śaro hyātmā brahma tallakṣyamucyate || 14||

varṇa-kramāṅka muktikā-kramāṅka

048 38

|| nādabindūpaniṣat ||

(ṛgvedīya yogopaniṣat)

ततः परतरं शुद्धं व्यापकं निर्मलं शिवम्।
सदोदितं परं ब्रह्म ज्योतिषामुदयो यतः॥ १७॥
tataḥ parataraṁ śuddhaṁ vyāpakaṁ nirmalaṁ śivam |
sadoditaṁ paraṁ brahma jyotiṣāmudayo yataḥ || 17||

निःशब्दं तत्परं ब्रह्म परमात्मा समीर्यते।
नादो यावन्मनस्तावन्नादान्तेऽपि मनोन्मनी॥ ४८॥
niḥśabdaṁ tatparaṁ brahma paramātmā samīryate |
nādo yāvanmanastāvannādānte'pi manonmanī || 48||

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०४९	४३

॥ नारदपरिव्राजकोपनिषत्॥

varṇa-kramāṅka	muktikā-kramāṅka
049	43

|| nāradaparivrājakopaniṣat ||

अहमेवाक्षरं ब्रह्म वासुदेवाख्यमद्वयम्।
इति भावो ध्रुवो यस्य तदा भवति भैक्षभुक्॥ २०॥
ahamevākṣaraṁ brahma vāsudevākhyamadvayam |
iti bhāvo dhruvo yasya tadā bhavati bhaikṣabhuk || 20||

श्रुत्वा स्पृष्ट्वा च भुक्त्वा च दृष्ट्वा घ्रात्वा च यो नरः।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः॥ ३८॥
śrutvā spṛṣṭvā ca bhuktvā ca dṛṣṭvā ghrātvā ca yo naraḥ |
na hṛṣyati glāyati vā sa vijñeyo jitendriyaḥ || 38||

अध्यात्मरतिरासीनो निरपेक्षो निराशिषः।
आत्मनैव सहायेन सुखार्थी विचरेदिह॥ ४४॥
adhyātmaratirāsīno nirapekṣo nirāśiṣaḥ |
ātmanaiva sahāyena sukhārthī vicarediha || 44||

प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम्।
विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातनम्॥ ५१॥
priyeṣu sveṣu sukṛtamapriyeṣu ca duṣkṛtam |
visṛjya dhyānayogena brahmāpyeti sanātanam || 51||

अनेन विधिना सर्वांस्त्यक्त्वा सङ्गाञ्शनैः शनैः।
सर्वद्वन्द्वैर्विनिर्मुक्तो ब्रह्मण्येवावतिष्ठते॥ ५२॥
anena vidhinā sarvāṁstyaktvā saṅgāñśanaiḥ śanaiḥ |
sarvadvandvairvinirmukto brahmaṇyevāvatiṣṭhate || 52||

कपालं वृक्षमूलानि कुचेलान्यसहायता।
समता चैव सर्वस्मिन्नैतन्मुक्तस्य लक्षणम्॥ ५४॥
kapālaṁ vṛkṣamūlāni kucelānyasahāyatā |
samatā caiva sarvasminnaitanmuktasya lakṣaṇam || 54||

एकाकी निःस्पृहस्तिष्ठेन हि केन सहालपेत्।
दद्यान्नारायणेत्येव प्रतिवाक्यं सदा यतिः॥ ५९॥
ekākī niḥspṛhastiṣṭhena hi kena sahālapet |
dadyānnārāyaṇetyeva prativākyaṁ sadā yatiḥ || 59||

पूर्णानन्दैकबोधस्तद्ब्रह्माहमस्मीति
ब्रह्मप्रणवमनुस्मरन्भ्रमरकीटन्यायेन शरीरत्रयमुत्सृज्य
संन्यासेनैव देहत्यागं करोति स कृतकृत्यो भवतीत्युपनिषत्॥

pūrṇānandaikabodhastadbrahmāhamasmīti
brahmapraṇavamanusmaranbhramarakīṭanyāyena
śarīratrayamutsṛjya
saṁnyāsenaiva dehatyāgaṁ karoti sa kṛtakṛtyo bhavatītyupaniṣat ||

इति तृतीयोपदेशः॥ ३॥
iti tṛtīyopadeśaḥ || 3||

मुनिः कौपीनवासाः स्यान्नग्नो वा ध्यानतत्परः।
एवं ज्ञानपरो योगी ब्रह्मभूयाय कल्पते॥ ३२॥
muniḥ kaupīnavāsāḥ syānnagno vā dhyānatatparaḥ |
evaṁ jñānaparo yogī brahmabhūyāya kalpate || 32||

सन्दिग्धः सर्वभूतानां वर्णाश्रमविवर्जितः।
अन्धवज्जडवच्चापि मूकवच्च महीं चरेत्॥ ३६॥
sandigdhaḥ sarvabhūtānāṁ varṇāśramavivarjitaḥ |
andhavajjaḍavaccāpi mūkavacca mahīṁ caret || 36||

इति चतुर्थोपदेशः॥ ४॥
iti caturthopadeśaḥ || 4||

तदेवं ज्ञात्वा स्वरूपानुसन्धानं विनान्यथाचारपरो
न भवेत्तदाचारवशात्तत्तल्लोकप्राप्तिर्ज्ञान-
वैराग्यसंपन्नस्य स्वस्मिन्नेव मुक्तिरिति न सर्वत्राचारप्रसक्ति-
स्तदाचारः।
tadevaṁ jñātvā svarūpānusandhānaṁ vinānyathācāraparo
na bhavettadācāravaśāttattallokaprāptirjñāna-
vairāgyasaṁpannasya svasminneva muktiriti na

sarvatrācāraprasakti-
stadācāraḥ |

तुरीयमक्षरमिति ज्ञात्वा जागरिते सुषुप्त्यवस्थापन्न
इव यद्यच्छ्रुतं यद्यदृष्टं तत्सत्सर्वमविज्ञातमिव
यो वसेत्तस्य स्वप्नावस्थायामपि तादृगवस्था भवति।
turīyamakṣaramiti jñātvā jāgarite suṣuptyavasthāpanna
iva yadyacchṛtaṁ yadyadṛṣṭaṁ tatsatsarvamavijñātamiva
yo vasettasya svapnāvasthāyāmapi tādṛgavasthā bhavati |

काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः।
स याति नरकान्घोरान्महारौरवसञ्ज्ञितान्॥ २॥
kāṣṭhadaṇḍo dhṛto yena sarvāśī jñānavarjitaḥ |
sa yāti narakānghorānmahārauravasañjñitān || 2||

स्वप्नेऽपि यो युक्तः स्याज्जाग्रतीव विशेषतः।
ईदृक्चेष्टः स्मृतः श्रेष्ठो वरिष्ठो ब्रह्मवादिनाम्॥ ५॥
svapne'pi yo yuktaḥ syājjāgratīva viśeṣataḥ |
īdṛkceṣṭaḥ smṛtaḥ śreṣṭho variṣṭho brahmavādinām || 5||

निर्मानश्चानहङ्कारो निर्द्वन्द्वश्छिन्नसंशयः।
नैव क्रुध्यति न द्वेष्टि नानृतं भाषते गिरा॥ १७॥
nirmānaścānahaṅkāro nirdvandvaśchinnasaṁśayaḥ |
naiva krudhyati na dveṣṭi nānṛtaṁ bhāṣate girā || 17||

एकश्चरेन्महीमेतां निःसङ्गः संयतेन्द्रियः।
आत्मक्रीड आत्मरतिरात्मवान्समदर्शनः॥ २५॥
ekaścarenmahīmetāṁ niḥsaṅgaḥ saṁyatendriyaḥ |
ātmakrīḍa ātmaratirātmavānsamadarśanaḥ || 25||

इति पञ्चमोपदेशः॥ ५॥
iti pañcamopadeśaḥ || 5||

भिक्षुश्चतुर्दशकरणानां न तत्रावकाशं दद्यादविच्छिन्नज्ञानाद्वैराग्यसंपत्तिमनुभूय
मत्तो न कश्चिन्नान्यो व्यतिरिक्त इत्यात्मन्यालोच्य
सर्वतः स्वरूपमेव पश्यञ्जीवन्मुक्तिमवाप्य प्रारब्ध-
प्रतिभासनाशपर्यन्तं चतुर्विधं स्वरूपं ज्ञात्वा
देहपतनपर्यन्तं स्वरूपानुसन्धानेन वसेत्।
bhikṣuścaturdaśakaraṇānāṁ na tatrāvakāśaṁ
dadyādavicchinnajñānādvairāgyasaṁpattimanubhūya
matto na kaścinnānyo vyatirikta ityātmanyālocya
sarvataḥ svarūpameva paśyañjīvanmuktimavāpya prārabdha-
pratibhāsanāśaparyantaṁ caturvidhaṁ svarūpaṁ jñātvā
dehapatanaparyantaṁ svarūpānusandhānena vaset |

इति सप्तमोपदेशः॥ ७॥
iti saptamopadeśaḥ || 7||

अन्योसावन्योहमस्मीति ये विदुस्ते पशवो न स्वभाव-
पशवस्तमेवं ज्ञात्वा विद्वान्मृत्युमुखात्प्रमुच्यते
नान्यः पन्था विद्यतेऽयनाय।
anyosāvanyohamasmīti ye viduste paśavo na svabhāva-
paśavastamevaṁ jñātvā vidvānmṛtyumukhātpramucyate
nānyaḥ panthā vidyate'yanāya |

एतज्ज्ञेयं नित्यमेवात्मसंस्थं
नातः परं वेदितव्यं हि किञ्चित्।
भोक्ता भोग्यं प्रेरितारं च मत्वा

सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्॥ ११॥
etajjñeyaṁ nityamevātmasaṁsthaṁ
nātaḥ paraṁ veditavyaṁ hi kiñcit |
bhoktā bhogyaṁ preritāraṁ ca matvā
sarvaṁ proktaṁ trividhaṁ brahmametat || 11||

इति नवमोपदेशः॥ ९॥
॥ इति नारदपरिव्राजकोपनिषत्समाप्ता॥
वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०५० ३४
॥ निरालम्बोपनिषत्॥
iti navamopadeśaḥ || 9||
|| iti nāradaparivrājakopaniṣatsamāptā ||
varṇa-kramāṅka muktikā-kramāṅka
050 34
|| nirālambopaniṣat ||

स होवाच महदहङ्कारपृथिव्यप्तेजोवाय्वाकाशत्वेन
बृहद्रूपेणाण्डकोशेन कर्मज्ञानार्थरूपतया
भासमानमद्वितीयमखिलोपाधिविनिर्मुक्तं
तत्सकलशक्त्युपबृंहितमनाद्यनन्तं
परमात्मेति च देहादेः परतरत्वद्ब्राह्मैव परमात्मा
स ब्रह्मा स विष्णुः स इन्द्रः स शमनः स सूर्यः
स चन्द्रस्ते सुरास्ते असुरास्ते पिशाचास्ते मनुष्यास्ताः
स्त्रियस्ते पश्वादयस्तत्स्थावरं ते ब्राह्मणादयः।
sa hovāca mahadahaṅkārapṛthivyaptejovāyvākāśatvena
bṛhadrūpeṇāṇḍakośena karmajñānārtharūpatayā
bhāsamānamadvitīyamakhilopādhivinirmuktaṁ
tatsakalaśaktyupabṛṁhitamanādyanantaṁ

paramātmeti ca dehādeḥ parataratvadbrāhmaiva paramātmā sa brahmā sa viṣṇuḥ sa indraḥ sa śamanaḥ sa sūryaḥ sa candraste surāste asurāste piśācāste manuṣyāstāḥ striyaste paśvādayastatsthāvaraṁ te brāhmaṇādayaḥ |

कर्तृत्वाद्यहङ्कारसङ्कल्पो बन्धः।
kartṛtvādyahaṅkārasaṅkalpo bandhaḥ |

अणिमाद्यष्टैश्वर्याशासिद्धसङ्कल्पो बन्धः।
aṇimādyaṣṭaiśvaryāśāsiddhasaṅkalpo bandhaḥ |

देवमनुष्याद्युपासनाकामसङ्कल्पो बन्धः।
devamanuṣyādyupāsanākāmasaṅkalpo bandhaḥ |

यमाद्यष्टाङ्गयोगसङ्कल्पो बन्धः।
yamādyaṣṭāṅgayogasaṅkalpo bandhaḥ |

केवलमोक्षापेक्षासङ्कल्पो बन्धः।
kevalamokṣāpekṣāsaṅkalpo bandhaḥ |

सङ्कल्पमात्रसंभवो बन्धः।
saṅkalpamātrasaṁbhavo bandhaḥ |

मोक्ष इति च नित्यानित्यवस्तुविचारादनित्यसंसारसुख-
दुःखविषयसमस्तक्षेत्रममताबन्धक्षयो मोक्षः।
mokṣa iti ca nityānityavastuvicārādanityasaṁsārasukha-
duḥkhaviṣayasamastakṣetramamatābandhakṣayo mokṣaḥ |

मूढ इति च कर्तृत्वाद्यहङ्कारभावारूढो मूढः।
mūḍha iti ca kartṛtvādyahaṅkārabhāvārūḍho mūḍhaḥ |

संन्यासीति च सर्वधर्मान्परित्यज्य निर्ममो
निरहङ्कारो भूत्वा ब्रह्मेष्टं शरणमुपगम्य
तत्त्वमसि अहं ब्रह्मास्मि सर्वं खल्विदं ब्रह्म
नेह नानास्ति किञ्चनेत्यादिमहावाक्यार्था-
नुभवज्ञानाद्ब्रह्मैवाहमस्मीति निश्चित्य
निर्विकल्पसमाधिना स्वतन्त्रो यतिश्चरति स संन्यासी
स मुक्तः स पूज्यः स योगी स परमहंसः सोऽवधूतः
स ब्राह्मण इति।
saṁnyāsīti ca sarvadharmānparityajya nirmamo
nirahaṅkāro bhūtvā brahmeṣṭaṁ śaraṇamupagamya
tattvamasi ahaṁ brahmāsmi sarvaṁ khalvidaṁ brahma
neha nānāsti kiñcanetyādimahāvākyārthā-
nubhavajñānādbrahmaivāhamasmīti niścitya
nirvikalpasamādhinā svatantro yatiścarati sa saṁnyāsī
sa muktaḥ sa pūjyaḥ sa yogī sa paramahaṁsaḥ so'vadhūtaḥ
sa brāhmaṇa iti |

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०५१	४७

॥ निर्वाणोपनिषत्॥
ऋग्वेदीय संन्यासोपनिषत्
०

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०५२	२७

॥ नृसिंहतापिन्युपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

051 47

|| nirvāṇopaniṣat ||

(ṛgvedīya saṁnyāsopaniṣat)

0

varṇa-kramāṅka muktikā-kramāṅka

052 27

|| nṛsiṁhatāpinyupaniṣat ||

अथ षोडशारं षोडशपत्रं चक्रं भवति षोडशकालो वै पुरुषः
पुरुष एवेदं सर्वं पुरुषेण संमितं भवति
षोडशकालो वै पुरुषः पुरुष एवेदं सर्वं
पुरुषेण संमितं भवति मायया बहिर्वेष्टितं
भवति।
इति नृसिंहपूर्वतापिन्युपनिषत्॥

atha ṣoḍaśāraṁ ṣoḍaśapatraṁ cakraṁ bhavati ṣoḍaśakālo vai puruṣaḥ
puruṣa evedaṁ sarvaṁ puruṣeṇa saṁmitaṁ bhavati
ṣoḍaśakālo vai puruṣaḥ puruṣa evedaṁ sarvaṁ
puruṣeṇa saṁmitaṁ bhavati māyayā bahirveṣṭitaṁ
bhavati |
iti nṛsiṁhapūrvatāpinyupaniṣat ||

॥ नृसिंहोत्तरतापिन्युपनिषत्॥

|| nṛsiṁhottaratāpinyupaniṣat ||

चिदेकरसो ह्ययमा

cidekaraso hyayamā

चक्षुषो द्रष्टा श्रोत्रस्य द्रष्टा वाचो द्रष्टा
मनसो द्रष्टा बुद्धेर्द्रष्टा प्राणस्य द्रष्टा तमसो द्रष्टा
सर्वस्य द्रष्टा
cakṣuṣo draṣṭā śrotrasya draṣṭā vāco draṣṭā
manaso draṣṭā buddherdraṣṭā prāṇasya draṣṭā tamaso draṣṭā
sarvasya draṣṭā

ओतो ह्ययमात्मा
oto hyayamātmā

नैव तत्र काचन भिदास्त्य्
naiva tatra kācana bhidāsty

सदोज्ज्वलोऽविद्यातत्कार्यहीनः स्वात्मबन्धहरः सर्वदा
द्वैतरहित आनन्दरूपः सर्वाधिष्ठानः सन्मात्रो
निरस्ताविद्यातमोमोहोऽहमेवेति तस्मादेवमेवेममात्मानं
परं ब्रह्मानुसन्दध्यादेष वीरो नृसिंह एवेति॥
इति द्वितीयः खण्डः॥ २॥
sadojjvalo'vidyātatkāryahīnaḥ svātmabandhaharaḥ sarvadā
dvaitarahita ānandarūpaḥ sarvādhiṣṭhānaḥ sanmātro
nirastāvidyātamomoho'hameveti tasmādevamevemamātmānaṁ
paraṁ brahmānusandadhyādeṣa vīro nṛsiṁha eveti ||
iti dvitīyaḥ khaṇḍaḥ || 2||

इदं सर्वं यदयमात्मा
इति पञ्चमः खण्डः॥ ५॥
idaṁ sarvaṁ yadayamātmā

iti pañcamaḥ khaṇḍaḥ || 5||

ते देवाः पुत्रैषणायाश्च
वित्तैषणायाश्च लोकैषणायाश्च ससाधनेभ्यो
व्युत्थाय निराकारा निष्परिग्रहा अशिखा अयज्ञोपवीता
अन्धा बधिरा मुग्धाः क्लीबा मूका उन्मत्त इव
परिवर्तमानाः शान्ता दान्ता उपरतास्तितिक्षवः
समाहिता आत्मरतय आत्मक्रीडा आत्ममिथुना
आत्मानन्दाः प्रणवमेव परं ब्रह्मात्मप्रकाशं
शून्यं जानन्तस्तत्रैव परिसमाप्तास्
te devāḥ putraiṣaṇāyāśca
vittaiṣaṇāyāśca lokaiṣaṇāyāśca sasādhanebhyo
vyutthāya nirākārā niṣparigrahā aśikhā ayajñopavītā
andhā badhirā mugdhāḥ klībā mūkā unmatta iva
parivartamānāḥ śāntā dāntā uparatāstitikṣavaḥ
samāhitā ātmaratayа ātmakrīḍā ātmamithunā
ātmānandāḥ praṇavameva paraṁ brahmātmaprakāśaṁ
śūnyaṁ jānantastatraiva parisamāptās

सच्चिदानन्दरूपमिदं सर्वं
saccidānandarūpamidaṁ sarvaṁ

सन्नशरीरोऽनिन्द्रियोऽप्राणोऽतमाः
सच्चिदानन्दमात्रः स स्वराड् भवति
इति सप्तमः खण्डः॥ ७॥
sannaśarīro'nindriyo'prāṇo'tamāḥ
saccidānandamātraḥ sa svarāḍ bhavati
iti saptamaḥ khaṇḍaḥ || 7||

अनुज्ञाता ह्ययमात्म
anujñātā hyayamātma

अनुज्ञैकरसो ह्ययमात्मा
anujñaikaraso hyayamātmā

अविकल्पो ह्ययमात्मा।
avikalpo hyayamātmā|

नात्र काचन भिदास्ति नैव तत्र काचन
nātra kācana bhidāsti naiva tatra kācana

भिदास्त्यत्र हि भिदामिव मन्यमानः शतधा सहस्रधा भिन्नो
मृत्योः स मृत्युमाप्नोति तदेतदद्वयं स्वप्रकाशं
महानन्दमात्मावैतदमृतमभयमेतद्ब्रह्माभयं
वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेदेति
रहस्यम्॥
इत्यष्टमः खण्डः॥ ८॥
bhidāstyatra hi bhidāmiva manyamānaḥ śatadhā sahasradhā bhinno
mṛtyoḥ sa mṛtyumāpnoti tadetadadvayaṁ svaprakāśaṁ
mahānandamātmāivaitadamṛtamabhayametadbrahmābhayaṁ
vai brahmābhayaṁ hi vai brahma bhavati ya evaṁ vedeti
rahasyam ||
ityaṣṭamaḥ khaṇḍaḥ || 8||

सर्वत्र न ह्यस्ति द्वैतसिद्धिर्
sarvatra na hyasti dvaitasiddhir

सन्मात्रो नित्यः शुद्धो बुद्धः
sanmātro nityaḥ śuddho buddhaḥ

सत्यो मुक्तो निरञ्जनो विभुरद्वयानन्दः परः
satyo mukto nirañjano vibhuradvayānandaḥ paraḥ

सत्तामात्रं हीदं सर्वं सदेव पुरस्तात्सिद्धं हि ब्रह्म
sattāmātraṁ hīdaṁ sarvaṁ sadeva purastātsiddhaṁ hi brahma

अदृष्टोऽव्यवहार्योऽप्यल्पो
adṛṣṭo'vyavahāryo'pyalpo

नित्यं शुद्धं बुद्धं मुक्तं सत्यं
सूक्ष्मं परिपूर्णमद्वयं सदानन्दचिन्मात्र-
मात्मैवाव्यवहार्यं
nityaṁ śuddhaṁ buddhaṁ muktaṁ satyaṁ
sūkṣmaṁ paripūrṇamadvayaṁ sadānandacinmātra-
mātmaivāvyavahāryaṁ

सत्यमात्मा ब्रह्मैव ब्रह्मात्मैवात्र ह्येव न विचिकित्स्यमित्यों
satyamātmā brahmaiva brahmātmaivātra hyeva na vicikitsyamityoṁ

एतद्ध्यशब्दमस्पर्शमरूपमरसमगन्धमवक्तव्यमन-
दातव्यमगन्तव्यमविसर्जयितव्यमनानन्दयितव्य-
ममन्तव्यमबोद्धव्यममनहङ्कर्तयितव्यम-
चेतयितव्यमप्राणयितव्यमनपानयितव्यम-
व्यानयितव्यमनुदानयितव्यमसमानयितव्यम-
etaddhyaśabdamasparśamarūpamarasamagandhamavaktavyamana-
dātavyamagantavyamavisarjayitavyamanānandayitavya-

mamantavyamaboddhavyamamanahaṅkartayitavyama-
cetayitavyamaprāṇayitavyamanapānayitavyama-
vyānayitavyamanudānayitavyamasamānayitavyama-

इति नवमः खण्डः॥ ९॥
iti navamaḥ khaṇḍaḥ || 9||

इति नृसिंहोत्तरतापिन्युपनिषत्समाप्ता॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०५३ ९३
॥ पञ्चब्रह्मोपनिषत्॥
०

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०५४ ७८
॥ परब्रह्मोपनिषत्॥
iti nṛsiṁhottaratāpinyupaniṣatsamāptā ||

varṇa-kramāṅka muktikā-kramāṅka
053 93
|| pañcabrahmopaniṣat ||
0

varṇa-kramāṅka muktikā-kramāṅka
054 78
|| parabrahmopaniṣat ||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०५५ १९

॥ परमहंसोपनिषत्

varṇa-kramāṅka muktikā-kramāṅka

055 19

|| paramahaṁsopaniṣat

शन्तमचलमद्वयानन्दविज्ञानघन एवास्मि।

śantamacalamadvayānandavijñānaghana evāsmi |

आशाम्बरो न नमर्कारो न स्वधाकारो न निन्दा न स्तुतिर्यादृच्छिको

āśāmbaro na namarkāro na svadhākāro na nindā na stutiryādṛcchiko

यत्पूर्णानन्दैकबोधस्तदब्रह्माहमस्मीति
कृतकृत्यो भवति कृतकृत्यो भवति॥ ४॥

yatpūrṇānandaikabodhastadabrahmāhamasmīti
kṛtakṛtyo bhavati kṛtakṛtyo bhavati || 4||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०५६ ६६

॥ परमहंस-परिव्राजक उपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

056 66

|| paramahaṁsa-parivrājaka upaniṣat ||

ब्रह्मैवाहममीत्यनवरतं
ब्रह्मप्रणवानुसन्धानेन यः कृतकृत्यो भवति स ह
परमहंसपरिव्राडित्युपनिषत्॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०५७ ७७
॥ पाशुपतब्रह्मोपनिषत्॥
brahmaivāhamamītyanavaratam̐
brahmapraṇavānusandhānena yaḥ kṛtakṛtyo bhavati sa ha
paramahaṁsaparivrāḍityupaniṣat ||

varṇa-kramāṅka muktikā-kramāṅka
057 77
|| pāśupatabrahmopaniṣat ||

स एव विदितादन्यस्तथैवाविदितादपि।
अन्येषामिन्द्रियाणां तु कल्पितानामपीश्वरः॥ १३॥
sa eva viditādanyastathaivāviditādapi |
anyeṣāmindriyāṇāṁ tu kalpitānāmapīśvaraḥ || 13||

तदा दुःखादिभेदोऽयमाभासोऽपि न भासते।
जगज्जीवादिरूपेण पश्यन्नपि परात्मवित्॥ २४॥
tadā duḥkhādibhedo'yamābhāso'pi na bhāsate |
jagajjīvādirūpeṇa paśyannapi parātmavit || 24||

न तत्पश्यति चिद्रूपं ब्रह्मवस्त्वेव पश्यति।
धर्मधर्मित्ववार्ता च भेदे सति हि भिद्यते॥ २५॥

na tatpaśyati cidrūpaṁ brahmavastveva paśyati |
dharmadharmitvavārtā ca bhede sati hi bhidyate || 25||

ब्रह्मैव विद्यते साक्षाद्वस्तुतोऽवस्तुतोऽपि च।
तथैव ब्रह्मविज्ज्ञानी किं गृह्णाति जहाति किम्॥ २७॥
brahmaiva vidyate sākṣādvastuto'vastuto'pi ca |
tathaiva brahmavijjñānī kiṁ gṛhṇāti jahāti kim || 27||

ब्रह्मैवेदममृतं तत्पुरस्ताद्-
 ब्रह्मानन्दं परमं चैव पश्चात्।
ब्रह्मानन्दं परमं दक्षिणे च
 ब्रह्मानन्दं परमं चोत्तरे च ॥ ३०॥
brahmaivedamamṛtaṁ tatpurastād-
 brahmānandaṁ paramaṁ caiva paścāt |
brahmānandaṁ paramaṁ dakṣiṇe ca
 brahmānandaṁ paramaṁ cottare ca || 30||

न सम्यग्ज्ञानिनस्तद्वत्स्वरूपं सकलं खलु।
अहमन्नं सदान्नाद इति हि ब्रह्मवेदनम्॥ ३८॥
na samyagjñāninastadvatsvarūpaṁ sakalaṁ khalu |
ahamannaṁ sadānnāda iti hi brahmavedanam || 38||

ब्रह्मविद्ग्रसति ज्ञानात्सर्वं ब्रह्मात्मनैव तु।
ब्रह्मक्षत्रादिकं सर्वं यस्य स्यादोदनं सदा॥ ३९॥
brahmavidgrasati jñānātsarvaṁ brahmātmanaiva tu |
brahmakṣatrādikaṁ sarvaṁ yasya syādodanaṁ sadā || 39||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०५८ ५९

॥ पैङ्गलोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

058 59

|| paiṅgalopaniṣat ||

सदेव सोम्येदमग्र आसीत्।
तन्नित्यमुक्तमविक्रियं सत्यज्ञानानन्दं परिपूर्णं
सनातनमेकमेवाद्वितीयं ब्रह्म।
इति प्रथमोऽध्यायः॥ १॥
sadeva somyedamagra āsīt |
tannityamuktamavikriyaṁ satyajñānānandaṁ paripūrṇaṁ
sanātanamekamevādvitīyaṁ brahma |
iti prathamo'dhyāyaḥ || 1||

जीवभावजगद्भावबाधे प्रत्यगभिन्नं ब्रह्मैवावशिष्यत
इति द्वितीयोऽध्यायः॥ २॥
jīvabhāvajagadbhāvabādhe pratyagabhinnaṁ brahmaivāvaśiṣyata
iti dvitīyo'dhyāyaḥ || 2||

तत्त्वमसि त्वं तदसि
tattvamasi tvaṁ tadasi

अहं ब्रह्मास्मीत्यनुसन्धानं कुर्यात्।
ahaṁ brahmāsmītyanusandhānaṁ kuryāt |

तत्त्वंपदलक्ष्यं प्रत्यगभिन्नं ब्रह्म।
tattvaṁpadalakṣyaṁ pratyagabhinnaṁ brahma |

ध्यातृध्याने विहाय निवातस्थितदीपवद्ध्येयैकगोचरं
चित्तं समाधिर्भवति।
dhyātṛdhyāne vihāya nivātasthitadīpavaddhyeyaikagocaraṁ
cittaṁ samādhirbhavati |

ब्रह्माण्डतद्गतलोकान्कार्यरूपांश्च
कारणत्वं प्रापयित्वा ततः सूक्ष्माङ्गं कर्मेन्द्रियाणि
प्राणांश्च ज्ञानेन्द्रियाण्यन्तःकरणचतुष्टयं
चैकीकृत्य सर्वाणि भौतिकानि कारणे भूतपञ्चके संयोज्य
भूमिं जले जलं वह्नौ वह्निं वायौ वायुमाकाशे
चाकाशमहङ्कारे चाहङ्कारं महति महदव्यक्तेऽव्यक्तं
पुरुषे क्रमेण विलीयते।
brahmāṇḍatadgatalokānkāryarūpāṁśca
kāraṇatvaṁ prāpayitvā tataḥ sūkṣmāṅgaṁ karmendriyāṇi
prāṇāṁśca jñānendriyāṇyantaḥkaraṇacatuṣṭayaṁ
caikīkṛtya sarvāṇi bhautikāni kāraṇe bhūtapañcake saṁyojya
bhūmiṁ jale jalaṁ vahnau vahniṁ vāyau vāyumākāśe
cākāśamahaṅkāre cāhaṅkāraṁ mahati mahadavyakte'vyaktaṁ
puruṣe krameṇa vilīyate |

ब्राह्मणः समाहितो भूत्वा तत्त्वंपदैक्यमेव सदा कुर्यात्।
brāhmaṇaḥ samāhito bhūtvā tattvaṁpadaikyameva sadā kuryāt |

जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव॥ ३॥
jīvanmuktapadaṁ tyaktvā svadehe kālasātkṛte |

viśatyadehamuktatvaṁ pavano'spandatāmiva || 3||

अशब्दमस्पर्शमरूपमव्ययं
तथा रसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं
तदेव शिष्यत्यमलं निरामयम्॥ ४॥
तृतीयोऽध्यायः॥ ३॥
aśabdamasparśamarūpamavyayaṁ
tathā rasaṁ nityamagandhavacca yat |
anādyanantaṁ mahataḥ paraṁ dhruvaṁ
tadeva śiṣyatyamalaṁ nirāmayam || 4||
tṛtīyo'dhyāyaḥ || 3||

प्राप्ते ज्ञानेन विज्ञाने ज्ञेये परमात्मनि हृदि
संस्थिते देहे लब्धशान्तिपदं गते तदा
प्रभामनोबुद्धिशून्यं भवति।
घटाकाशमिवात्मानं विलयं वेत्ति तत्त्वतः।
स गच्छति निरालम्बं ज्ञानालोकं समन्ततः॥ १४॥
prāpte jñānena vijñāne jñeye paramātmani hṛdi
saṁsthite dehe labdhaśāntipadaṁ gate tadā
prabhāmanobuddhiśūnyaṁ bhavati |
ghaṭākāśamivātmānaṁ vilayaṁ vetti tattvataḥ |
sa gacchati nirālambaṁ jñānālokaṁ samantataḥ || 14||

विज्ञेयोऽक्षरतन्मात्रो जीवितं वापि चञ्चलम्।
विहाय शास्त्रजालानि यत्सत्यं तदुपासताम्॥ १७॥
vijñeyo'kṣaratanmātro jīvitaṁ vāpi cañcalam |
vihāya śāstrajālāni yatsatyaṁ tadupāsatām || 17||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०५९ ४

॥ प्रश्नोपनिषत् ॥

varṇa-kramāṅka muktikā-kramāṅka

059 4

|| praśnopaniṣat ||

एषोऽकलोऽमृतो भवति तदेष श्लोकः॥ ५॥

eṣo'kalo'mṛto bhavati tadeṣa ślokaḥ || 5||

भावभावकलाविनिर्मुक्ता चिद्विद्याऽद्वितीयब्रह्मसंवित्तिः
सच्चिदानन्दलहरी महात्रिपुरसुन्दरी बहिरन्तरनुप्रविश्य
स्वयमेकैव विभाति।
bhāvabhāvakalāvinirmuktā cidvidyā'dvitīyabrahmasaṁvittiḥ
saccidānandalaharī mahātripurasundarī bahirantaranupraviśya
svayamekaiva vibhāti |

अखण्डार्थं परं ब्रह्म॥ ५॥

akhaṇḍārthaṁ paraṁ brahma || 5||

पञ्चरूपपरित्यागादर्वरूपप्रहाणतः।
अधिष्ठानं परं तत्त्वमेकं सच्छिष्यते महत्॥ इति॥ ६॥
pañcarūpaparityāgādarvarūpaprahāṇataḥ |
adhiṣṭhānaṁ paraṁ tattvamekaṁ sacchiṣyate mahat || iti || 6||

योऽहमस्मीति वा सोहमस्मीति वा योऽसौ सोऽहमस्मीति॥ ८॥

yo'hamasmīti vā sohamasmīti vā yo'sau so'hamasmīti || 8||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०६२ २६

॥ बृहज्जाबालोपनिषत्

०

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०६३ १०

॥ बृहदारण्यकोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

062 26

|| bṛhajjābālopaniṣat

0

varṇa-kramāṅka muktikā-kramāṅka

063 10

|| bṛhadāraṇyakopaniṣat ||

मन्त्र १० ई।इव्।१०

mantra 10 ī|iv|10

ब्रह्म वा इदमग्र आसीत्

ष् ब्रह्म वै इदम् अग्रे आसीत्

तदात्मानमेवावेद्

अहं ब्रह्मास्मीति।

अहं मनुरभव॰ सूर्यश्चेति।

य एवं वेदाहं ब्रह्मास्मीति

ष् तद् इदम् अपि एतर्हि यस् एवम् वेद अहम् ब्रह्म अस्मि इति
स इद॰ सर्वं भवति
ष् स इदम् सर्वम् भवति
अथ योऽन्यां देवतामुपास्ते
ष् अथ यस् अन्याम् देवताम् उपास्ते
ऽन्योऽसाव्
ष् अन्यस् असौ
अन्योऽहमस्मीति
ष् अन्यस् अहम् अस्मि इति
न स वेद।
ष् न स वेद
यथा पशुरेव॰ स देवानाम्।
brahma vā idamagra āsīt
ṣ brahma vai idam agre āsīt
tadātmānamevāved
ahaṁ brahmāsmīti |
ahaṁ manurabhavaṁ sūryaśceti |
ya evaṁ vedāhaṁ brahmāsmīti
ṣ tad idam api etarhi yas evam veda aham brahma asmi iti
sa ida sarvaṁ bhavati
ṣ sa idam sarvam bhavati
atha yo'nyāṁ devatāmupāste
ṣ atha yas anyām devatām upāste
'nyo'sāv
ṣ anyas asau
anyo'hamasmīti

ṣ anyas aham asmi iti

na sa veda |

ṣ na sa veda

yathā paśurevasa devānām |

मन्त्र ६ ई।ई।६

mantra 6 īī|īi|6

नेति नेति

ष् न इति न इति

न ह्येतस्मादिति नेत्यन्यत् परमस्त्य्

ष् न हि एतस्माद् इति न इति अन्यद् परम् अस्ति

अथ नामधेयꣳ सत्यस्य सत्यमिति

ष् अथ नामधेयम् सत्यस्य सत्यम् इति

प्राणा वै सत्यम्

ष् प्राणास् वै सत्यम्

तेषामेष सत्यम्॥ ६॥ इति तृतीयं ब्राह्मणम्॥

ष् तेषाम् एष सत्यम्

neti neti

ṣ na iti na iti

na hyetasmāditi netyanyat paramasty

ṣ na hi etasmād iti na iti anyad param asti

atha nāmadheyasatyasya satyamiti

ṣ atha nāmadheyam satyasya satyam iti

prāṇā vai satyam

ṣ prāṇās vai satyam

teṣāmeṣa satyam || 6 || iti tṛtīyaṁ brāhmaṇam ||

ṣ teṣām eṣa satyam

मन्त्र ५ ई।इव्।५
आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो।
ष् आत्मा वै अरे द्रष्टव्यस् श्रोतव्यस् मन्तव्यस्
निदिध्यासितव्यस्

mantra 5 īī|iv|5
ātmā vā are draṣṭavyaḥ śrotavyo mantavyo nididhyāsitavyo |
ṣ ātmā vai are draṣṭavyas śrotavyas mantavyas
nididhyāsitavyas

मन्त्र ४ ई।व्।४
आत्मा इदम् अमृतम्
इदं ब्रह्मेद॰ सर्वम्॥ ४॥
ष् इदम् ब्रह्म इदम् सर्वम्

mantra 4 īī|v|4
ātmā idam amṛtam
idaṁ brahmeda sarvam || 4 ||
ṣ idam brahma idam sarvam

मन्त्र १९ ई।व्।१९
तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्
ष् तद् एतद् ब्रह्म अपूर्वम् अनपरम् अनन्तरम् अबाह्यम्

mantra 19 īī|v|19
tadetadbrahmāpūrvamanaparamanantaramabāhyam
ṣ tad etad brahma apūrvam anaparam anantaram abāhyam

अयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम्॥ १९॥ इति पञ्चमं
ब्राह्मणम्॥

ष् अयम् आत्मा ब्रह्म सर्वानुभूस्

ayamātmā brahma sarvānubhūrityanuśāsanam || 19 || iti pañcamaṁ brāhmaṇam ||

ṣ ayam ātmā brahma sarvānubhūs

मन्त्र ८ ई।वी।८

mantra 8 ııı|vıi|8

ष् ब्राह्मणास् अभिवदन्ति

अस्थूलमनण्व्

ष् अस्थूलम् अनणु

अह्रस्वमदीर्घम्

ष् अह्रस्वम् अदीर्घम्

अलोहितमस्नेहम्

ष् अलोहितम् अस्नेहम्

अच्छायमतमो

ष् अच्छायम् अतमस्

ऽवाय्वनाकाशम्

ष् अवायु अनाकाशम्

असङ्गम्

ष् असङ्गम्

अचक्षुष्कम्

ष् अचक्षुष्कम्

अश्रोत्रम्

ष् अश्रोत्रम्

अवाग्

ष् अवाग्

अमनो

ṣ brāhmaṇās abhivadanti
asthūlamanaṇv
ṣ asthūlam anaṇu
ahrasvamadīrgham
ṣ ahrasvam adīrgham
alohitamasneham
ṣ alohitam asneham
acchāyamatamo
ṣ acchāyam atamas
'vāyvanākāśam
ṣ avāyu anākāśam
asaṅgam
ṣ asaṅgam
acakṣuṣkam
ṣ acakṣuṣkam
aśrotram
ṣ aśrotram
avāg
ṣ avāg
amano
ष् अमनस्
ऽतेजस्कम्
ष् अतेजस्कम्
अप्राणम्
ष् अप्राणम्
अमुखम्
ष् अमुखम्
अमात्रम्

ष्अमात्रम्
अनन्तरम्
ष्अनन्तरम्
अबाह्यं
ष् अबाह्यम्
न तदश्नाति किं चन
ष् न तद् अश्नोतिक् अश्नाति कम् चन क् किम् चन
न तदश्नाति कश्चन।
ष् न तद् अश्नोति क् अश्नाति कस् चन
ṣ amanas
'tejaskam
ṣ atejaskam
aprāṇam
ṣ aprāṇam
amukham
ṣ amukham
amātram
ṣamātram
anantaram
ṣanantaram
abāhyaṁ
ṣ abāhyam
na tadaśnāti kiṁ cana
ṣ na tad aśnotik aśnāti kam cana k kim cana
na tadaśnāti kaścana |
ṣ na tad aśnoti k aśnāti kas cana

स एष

ष् सस् एष

नेति

ष् न इति

नेत्यात्माऽगृह्यो

ष् न इति आत्मा अगृह्यस्

न हि गृह्यते

ष् न हि गृह्यते

ऽशीर्यो

ष् अशीर्यस्

न हि शीर्यते

ष् न हि शीर्यते

ऽसङ्गो न हि सज्यते

ष् असङ्गस् असितस् न सज्यते

ऽसितो न व्यथते

ष् असितस् न व्यथते

न रिष्यत्य्

ष् न रिष्यति

एतान्यष्टावायतनान्य्

mantra 26 iii|ikṣ|26

sa eṣa

ṣ sas eṣa

neti

ṣ na iti

netyātmā'gṛhyo

ṣ na iti ātmā agṛhyas

na hi gṛhyate

ṣ na hi gṛhyate

'śīryo

ṣ aśīryas

na hi śīryate

ṣ na hi śīryate

'saṅgo na hi sajyate

ṣ asaṅgas asitas na sajyate

'sito na vyathate

ṣ asitas na vyathate

na riṣyaty

ṣ na riṣyati

etānyaṣṭāvāyatanāny

ष् एतानि अष्टौ आयतनानि

अष्टौ लोका

ष् अष्टौ लोकास्

अष्टौ देवा

ष् क् अद्द्। अष्टौ देवास्

अष्टौ पुरुषाः।

ṣ etāni aṣṭau āyatanāni

aṣṭau lokā

ṣ aṣṭau lokās

aṣṭau devā

ṣ k add| aṣṭau devās

aṣṭau puruṣāḥ |

मन्त्र २८ ई।इक्ष्।२८

विज्ञानमानन्दं ब्रह्म

ष् विज्ञानम् आनन्दम्

mantra 28 īīī|ikṣ|28

vijñānamānandaṁ brahma

ṣ vijñānam ānandam

मन्त्र ४ ई।ई।४

अभयं वै

ष् अभयम् वै

जनक

ष् जनक

प्राप्तोऽसीति

mantra 4 ī|ī|4

abhayaṁ vai

ṣ abhayam vai

janaka

ṣ janaka

prāpto'sīti

मन्त्र २३ ई।ई।२३

mantra 23 ī|īi|23

न तु तद्द्वितीयमस्ति

ष् न तु तद् द्वितीयम् अस्ति

na tu taddvitīyamasti

ṣ na tu tad dvitīyam asti

मन्त्र ६ ई।इव्।६

mantra 6 ī|iv|6

ऽथाकामयमानो योऽकामो निष्काम भवति आप्तकाम

आत्मकामो न तस्य प्राणा उत्क्रामन्ति

ष् अथ अकामयमानस् यस् अकामस् निष्कामस् आत्मकामस्

आप्तकामस् भवतिक् अप्तकामस् आत्मकामस् न तस्माद्

'thākāmayamāno yo'kāmo niṣkāma bhavati āptakāma

ātmakāmo na tasya prāṇā utkrāmanti

ṣ atha akāmayamānas yas akāmas niṣkāmas ātmakāmas

āptakāmas bhavatik aptakāmas ātmakāmas na tasmād

मन्त्र ७ ई।इव्।७

तद्यथाऽहिनिर्व्लयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेद॰

शरीर॰ शेते

ष् तद् यथा अहिनिर्व्लयनी वल्मीके मृता प्रत्यस्ता शयीत

एवम् एव इदम् शरीरम् शेते

ऽथायमशरीरोऽमृतः प्राणो

ब्रह्मैव तेज एव

ष् अथ अयम् अनस्थिकस् अशरीरस् प्राज्ञस् आत्माक्

अयम् अशरीरस् अमृतस् प्राणस् ब्रह्म एव लोकस्

क्

तेजस् एव

mantra *7* ī|iv|*7*

tadyathā'hinirvlayanī valmīke mṛtā pratyastā śayītaivameveda

śarīraṃśete

ṣ tad yathā ahinirvlayanī valmīke mṛtā pratyastā śayīta

evam eva idam śarīram śete

'thāyamaśarīro'mṛtaḥ prāṇo

brahmaiva teja eva

ṣ atha ayam anasthikas aśarīras prājñas ātmāk

ayam aśarīras amṛtas prāṇas brahma eva lokas

k

tejas eva

मन्त्र २० ई।इव्।२०
mantra 20 ī|iv|20

विरजः पर आकाशाद्
 ष् विरजस् परस् आकाशाद्
अज आत्मा महान्ध्रुवः॥ २०॥
 ष् अजस् आत्मा महान् ध्रुवः
virajaḥ para ākāśād
 ṣ virajas paras ākāśād
aja ātmā mahāndhruvaḥ || 20 ||
 ṣ ajas ātmā mahān dhruvaḥ

मन्त्र १३ ई।व्।१३
mantra 13 ī|v|13

स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवै
 ष् स यथा सैन्धवघनस् अनन्तरस् अबाह्यस् कृत्स्नस्
 रसघनस् एव स्यात्क् ॐ।
sa yathā saindhavaghano'nantaro'bāhyaḥ kṛtsno rasaghana evai
 ṣ sa yathā saindhavaghanas anantaras abāhyas kṛtsnas
 rasaghanas eva syātk om|

वं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो
vaṁ vā are'yamātmānantaro'bāhyaḥ kṛtsnaḥ prajñānaghana evaitebhyo

तृतीयं ब्राह्मणम्।   ।ई।१
एतद्ब्रह्मैतत्सर्वं।
 ष् एतद् ब्रह्म एतद् सर्वम्

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
        ०६४   ११
॥ ब्रह्मोपनिषत्॥
tṛtīyaṁ brāhmaṇam | |īi|1
etadbrahmaitatsarvaṁ |
 ṣ etad brahma etad sarvam

varṇa-kramāṅka muktikā-kramāṅka
        064   11
|| brahmopaniṣat ||

कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥
karmādhyakṣaḥ sarvabhūtādhivāsaḥ sākṣī cetā kevalo nirguṇaśca ||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
        ०६५   ४०
॥ ब्रह्मविद्योपनिषत् ॥

varṇa-kramāṅka muktikā-kramāṅka
        065   40
|| brahmavidyopaniṣat ||

यस्मिन्विलीयते शब्दस्तत्परं ब्रह्म गीयते।

धियं हि लीयते ब्रह्म सोऽमृतत्वाय कल्पते॥ १३॥
yasminvilīyate śabdastatparaṁ brahma gīyate |
dhiyaṁ hi līyate brahma so'mṛtatvāya kalpate || 13||

आत्मानमात्मना साक्षाद्ब्रह्म बुद्ध्वा सुनिश्चलम्।
देहजात्यादिसम्बन्धान्वर्णाश्रमसमन्वितान्॥ २९॥
ātmānamātmanā sākṣādbrahma buddhvā suniścalam |
dehajātyādisambandhānvarṇāśramasamanvitān || 29||

वेदशास्त्राणि चान्यानि पदपांसुमिव त्यजेत्।
गुरुभक्तिं सदा कुर्याच्छ्रेयसे भूयसे नरः॥ ३०॥
vedaśāstrāṇi cānyāni padapāṁsumiva tyajet |
gurubhaktiṁ sadā kuryācchreyase bhūyase naraḥ || 30||

गृहस्थो ब्रह्मचारी च वानप्रस्थश्च भिक्षुकः।
यत्र तत्र स्थितो ज्ञानी परमाक्षरवित्सदा॥ ४९॥
gṛhastho brahmacārī ca vānaprasthaśca bhikṣukaḥ |
yatra tatra sthito jñānī paramākṣaravitsadā || 49||

पूर्वभागे ह्यधोलिङ्गं शिखिन्यां चैव पश्चिमम्।
ज्योतिर्लिङ्गं भ्रुवोर्मध्ये नित्यं ध्यायेत्सदा यतिः॥ ८०॥
pūrvabhāge hyadholiṅgaṁ śikhinyāṁ caiva paścimam |
jyotirliṅgaṁ bhruvormadhye nityaṁ dhyāyetsadā yatiḥ || 80||

अन्तर्याम्यहमग्राह्योऽनिर्देश्योऽहमलक्षणः।
अगोत्रोऽहमगात्रोऽहमचक्षुष्कोऽस्म्यवागहम्॥ ८४॥
antaryāmyahamagrāhyo'nirdeśyo'hamalakṣaṇaḥ |
agotro'hamagātro'hamacakṣuṣko'smyavāgaham || 84||

अद्वैतोऽहं पूर्णोऽहमबाह्योऽहमनन्तरः।
अश्रोतोऽहमदीर्घोऽहमव्यक्तोऽहमनामयः॥ ८८॥
advaito'haṁ pūrṇo'hamabāhyo'hamanantaraḥ |
aśroto'hamadīrgho'hamavyakto'hamanāmayaḥ || 88||

अद्वयानन्दविज्ञानघनोऽस्म्यहमविक्रियः।
अनिच्छोऽहमलेपोऽहमकर्तास्म्यहमद्वयः॥ ८९॥
advayānandavijñānaghano'smyahamavikriyaḥ |
aniccho'hamalepo'hamakartāsmyahamadvayaḥ || 89||

अविद्याकार्यहीनोऽहमवाग्रसनगोचरः।
अनल्पोऽहमशोकोऽहमविकल्पोऽस्म्यविज्वलन्॥ ९०॥
avidyākāryahīno'hamavāgrasanagocaraḥ |
analpo'hamaśoko'hamavikalpo'smyavijvalan || 90||

आदिमध्यान्तहीनोऽहमाकाशसदृशोऽस्म्यहम्।
आत्मचैतन्यरूपोऽहमहमानन्दचिद्घनः॥ ९१॥
ādimadhyāntahīno'hamākāśasadṛśo'smyaham |
ātmacaitanyarūpo'hamahamānandacidghanaḥ || 91||

आनन्दामृतरूपोऽहमात्मसंस्थोहमन्तरः।
आत्मकामोहमाकाशात्परमात्मेश्वरोस्म्यहम्॥ ९२॥
ānandāmṛtarūpo'hamātmasaṁsthohamantaraḥ |
ātmakāmohamākāśātparamātmeśvarosmyaham || 92||

चिदानन्दोऽस्म्यहं चेता चिद्घनश्चिन्मयोऽस्म्यहम्।
ज्योतिर्मयोऽस्म्यहं ज्यायाञ्ज्योतिषां ज्योतिरस्म्यहम्॥ ९५॥
cidānando'smyahaṁ cetā cidghanaścinmayo'smyaham |
jyotirmayo'smyahaṁ jyāyāñjyotiṣāṁ jyotirasmyaham || 95||

नित्योऽहं निरवद्योऽहं निष्क्रियोऽस्मि निरञ्जनः।
निर्मलो निर्विकल्पोऽहं निराख्यातोऽस्मि निश्चलः॥ ९७॥
nityo'haṁ niravadyo'haṁ niṣkriyo'smi nirañjanaḥ |
nirmalo nirvikalpo'haṁ nirākhyāto'smi niścalaḥ || 97||

निर्विकारो नित्यपूतो निर्गुणो निःस्पृहोऽस्म्यहम्।
निरिन्द्रियो नियन्ताहं निरपेक्षोऽस्मि निष्कलः॥ ९८॥
nirvikāro nityapūto nirguṇo niḥspṛho'smyaham |
nirindriyo niyantāhaṁ nirapekṣo'smi niṣkalaḥ || 98||

पुरुषः परमात्माहं पुराणः परमोऽस्म्यहम्।
परावरोऽस्म्यहं प्राज्ञः प्रपञ्चोपशमोऽस्म्यहम्॥ ९९॥
puruṣaḥ paramātmāhaṁ purāṇaḥ paramo'smyaham |
parāvaro'smyahaṁ prājñaḥ prapañcopaśamo'smyaham || 99||

परामृतोऽस्म्यहं पूर्णः प्रभुरस्मि पुरातनः।
पूर्णानन्दैकबोधोऽहं प्रत्यगेकरसोऽस्म्यहम्॥ १००॥
parāmṛto'smyahaṁ pūrṇaḥ prabhurasmi purātanaḥ |
pūrṇānandaikabodho'haṁ pratyagekaraso'smyaham || 100||

प्रज्ञातोऽहं प्रशान्तोऽहं प्रकाशः परमेश्वरः।
एकधा चिन्त्यमानोऽहं द्वैताद्वैतविलक्षणः॥ १०१॥
prajñāto'haṁ praśānto'haṁ prakāśaḥ parameśvaraḥ |
ekadhā cintyamāno'haṁ dvaitādvaitavilakṣaṇaḥ || 101||

विश्वाधिकोऽहं विशदो विष्णुर्विश्वकृदस्म्यहम्।
शुद्धोऽस्मि शुक्रः शान्तोऽस्मि शाश्वतोऽस्मि शिवोऽस्म्यहम्॥ १०४॥
viśvādhiko'haṁ viśado viṣṇurviśvakṛdasmyaham |

śuddho'smi śukraḥ śānto'smi śāśvato'smi śivo'smyaham || 104||

सर्वभूतान्तरात्महमहमहमस्मि सनातनः।
अहं सकृद्विभातोऽस्मि स्वे महिम्नि सदा स्थितः॥ १०५॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०६६ ८७
॥ भस्मजाबालोपनिषत्॥
sarvabhūtāntarātmahamahamahamasmi sanātanaḥ |
ahaṁ sakṛdvibhāto'smi sve mahimni sadā sthitaḥ || 105||

varṇa-kramāṅka muktikā-kramāṅka
066 87
|| bhasmajābālopaniṣat ||

अद्वैतं चतुर्थं ब्रह्मविष्णुरुद्रातीतमेकमाशास्यं
advaitaṁ caturthaṁ brahmaviṣṇurudrātītamekamāśāsyaṁ

एकमद्वैतं निष्कलं निष्क्रियं शान्तं शिवमक्षरमव्ययं
हरिहरहिरण्यगर्भस्रष्टारमप्रमेयमनाद्यन्तं रुद्रसूक्तैरभिषिच्य
सितेन भस्मना श्रीफलदलैश्च त्रिशाखैरार्द्रैरनार्द्रैर्वा।
नैतत्र संस्पर्शः।
ekamadvaitaṁ niṣkalaṁ niṣkriyaṁ śāntaṁ śivamakṣaramavyayaṁ
hariharahiraṇyagarbhasraṣṭāramaprameyamanādyantaṁ
rudrasūktairabhiṣicya
sitena bhasmanā śrīphaladalaiśca triśākhairārdrairanārdrairvā |
naitatra saṁsparśaḥ |

अचक्षुर्विश्वतश्चक्षुरकर्णो विश्वतः कर्णोऽपादो
विश्वतःपादोऽपाणिर्विश्वतःपाणिराहमशिरा विश्वतःशिरा
विद्यामन्त्रैकसंश्रयो विद्यारूपो

acakṣurviśvataścakṣurakarṇo viśvataḥ karṇo'pādo
viśvataḥpādo'pāṇirviśvataḥpāṇirāhamaśirā viśvataḥśirā
vidyāmantraikasaṁśrayo vidyārūpo

अव्ययमनाद्यन्त-
मशेषवेदवेदान्तवेद्यमनिर्देश्यमनिरुक्तमप्रच्यवमाशास्यमद्वैतं
सर्वाधारमनाधारमनिरीक्ष्यम्

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०६७	८४

॥ अथ भावनोपनिषत्॥
०

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०६८	६०

॥ भिक्षुकोपनिषत् ६३॥
०

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०६९	४८

॥ मण्डलब्राह्मणोपनिषत्॥

avyayamanādyanta-
maśeṣavedavedāntavedyamanirdeśyamaniruktamapracyavamāśāsyam
advaitaṁ
sarvādhāramanādhāramanirīkṣyam

varṇa-kramāṅka muktikā-kramāṅka

067 84

|| atha bhāvanopaniṣat||

0

varṇa-kramāṅka muktikā-kramāṅka

068 60

|| bhikṣukopaniṣat 63 ||

0

varṇa-kramāṅka muktikā-kramāṅka

069 48

|| maṇḍalabrāhmaṇopaniṣat ||

भ्रूमध्ये सच्चिदानन्दतेजःकूटरूपं तारकं ब्रह्म॥। २॥

bhrūmadhye saccidānandatejaḥkūṭarūpaṁ tārakaṁ brahma ||| 2||

जीवः पञ्चविंशकः स्वकल्पितचतुर्विंशतितत्त्वं परित्यज्य॥ ४॥

इति प्रथमं ब्राह्मणम्॥

jīvaḥ pañcaviṁśakaḥ svakalpitacaturviṁśatitattvaṁ parityajya || 4||

iti prathamaṁ brāhmaṇam ||

प्राणापानयोरैक्यं कृत्वा धृतकुम्भको नासाग्र-

दर्शनदृढभावनया द्विकराङ्गुलिभिः षण्मुखी-

करणेन प्रणवध्वनिं निशम्य मनस्तत्र लीनं भवति।

prāṇāpānayoraikyaṁ kṛtvā dhṛtakumbhako nāsāgra-

darśanadṛḍhabhāvanayā dvikarāṅgulibhiḥ ṣaṇmukhī-

karaṇena praṇavadhvaniṁ niśamya manastatra līnaṁ bhavati |

सकृद्विभातसदानन्दानुभवैकगोचरो ब्रह्मवित्तदेव भवति।॥ ३॥
sakṛdvibhātasadānandānubhavaikagocaro brahmavittadeva bhavati
| || 3||

शुद्धाद्वैतब्रह्माहम्॥ ५॥
इति द्वितीयं ब्राह्मणम्॥ २॥
śuddhādvaitabrahmāham || 5||
iti dvitīyaṁ brāhmaṇam || 2||

अद्वन्द्वः सदाचञ्चलगात्रः
परमशान्तिं स्वीकृत्य मनः प्रचारशून्यं परमात्मनि लीनं भवति।
पयस्रावानन्तरं धेनुस्तनक्षीरमिव सर्वेन्द्रियवर्गे परिनष्टे
मनोनाशं
advandvaḥ sadācañcalagātraḥ
paramaśāntiṁ svīkṛtya manaḥ pracāraśūnyaṁ paramātmani līnaṁ bhavati |
payasrāvānantaraṁ dhenustanakṣīramiva sarvendriyavarge parinaṣṭe manonāśaṁ

तदनु नित्यशुद्धः
परमात्माहमेवेति तत्त्वमसीत्युपदेशेन त्वमेवाहमहमेव
त्वमिति तारकयोगमार्गेणाखण्डानन्दपूर्णः कृतार्थो भवति॥ १॥
tadanu nityaśuddhaḥ
paramātmāhameveti tattvamasītyupadeśena tvamevāhamahameva
tvamiti tārakayogamārgeṇākhaṇḍānandapūrṇaḥ kṛtārtho bhavati || 1||

परिपूर्णपराकाशमग्नमनाः प्राप्तोन्मन्यवस्थः

संन्यस्तसर्वेन्द्रियवर्गः अनेकजन्मार्जितपुण्यपुञ्जपक्व-
कैवल्यफलोऽखण्डानन्दनिरस्तसर्वक्लेशकश्मलो ब्रह्माहमस्मीति
कृतकृत्यो भवति।॥ ३॥
paripūrṇaparākāśamagnamanāḥ prāptonmanyavasthaḥ
saṁnyastasarvendriyavargaḥ anekajanmārjitapuṇyapuñjapakva-
kaivalyaphalo'khaṇḍānandanirastasarvakleśakaśmalo
brahmāhamasmīti
kṛtakṛtyo bhavati | || 3||

अनिर्वचनीयज्योतिः सर्वव्यापकं निरतिशयानन्दलक्षणं
परमाकाशम्।॥ ४॥
anirvacanīyajyotiḥ sarvavyāpakaṁ niratiśayānandalakṣaṇaṁ
paramākāśam | || 4||

स तज्ज्ञो बालोन्मत्तपिशाचवज्जडवृत्त्या लोकमाचरेत्
sa tajjño bālonmattapiśācavajjaḍavṛttyā lokamācaret

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०७० ६१
॥ महोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka
070 61
|| mahopaniṣat ||

रातेर्दातुः परायणम्।
सर्वसङ्कल्पसंन्यासश्चेतसा यत्परिग्रहः॥ ९॥

rāterdātuḥ parāyaṇam |
sarvasaṅkalpasaṁnyāsaścetasā yatparigrahaḥ || 9||

केवलं सुसमः स्वच्छो मौनी मुदितमानसः।
संपूर्ण इव शीतांशुरतिष्ठदमलः शुकः॥ २७॥
kevalaṁ susamaḥ svaccho maunī muditamānasaḥ |
saṁpūrṇa iva śītāṁśuratiṣṭhadamalaḥ śukaḥ || 27||

पदार्थभावनादार्ढ्यं बन्ध इत्यभिधीयते।
वासनातानवं ब्रह्मन्मोक्ष इत्यभिधीयते॥ ४१॥
padārthabhāvanādārḍhyaṁ bandha ityabhidhīyate |
vāsanātānavaṁ brahmanmokṣa ityabhidhīyate || 41||

आपतत्सु यथाकालं सुखदुःखेष्वनारतः।
न हृष्यति ग्लायति यः स जीवन्मुक्त उच्यते॥ ४३॥
āpatatsu yathākālaṁ sukhaduḥkheṣvanārataḥ |
na hṛṣyati glāyati yaḥ sa jīvanmukta ucyate || 43||

हर्षामर्षभयक्रोधकामकार्पण्यदृष्टिभिः।
न परामृश्यते योऽन्तः स जीवन्मुक्त उच्यते॥ ४४॥
harṣāmarṣabhayakrodhakāmakārpaṇyadṛṣṭibhiḥ |
na parāmṛśyate yo'ntaḥ sa jīvanmukta ucyate || 44||

अहङ्कारमयीं त्यक्त्वा वासनां लीलयैव यः।
तिष्ठति ध्येयसन्त्यागी स जीवन्मुक्त उच्यते॥ ४५॥
ahaṅkāramayīṁ tyaktvā vāsanāṁ līlayaiva yaḥ |
tiṣṭhati dhyeyasantyāgī sa jīvanmukta ucyate || 45||

अध्यात्मरतिरासीनः पूर्णः पावनमानसः।

प्राप्तानुत्तमविश्रान्तिर्न किञ्चिदिह वाञ्छति।
यो जीवति गतस्नेहः स जीवन्मुक्त उच्यते॥ ४७॥
adhyātmaratirāsīnaḥ pūrṇaḥ pāvanamānasaḥ |
prāptānuttamaviśrāntirna kiñcidiha vāñchati |
yo jīvati gatasnehaḥ sa jīvanmukta ucyate || 47||

मौनवान्निरहंभावो निर्मानो मुक्तमत्सरः।
यः करोति गतोद्वेगः स जीवन्मुक्त उच्यते॥ ५०॥
maunavānnirahaṁbhāvo nirmāno muktamatsaraḥ |
yaḥ karoti gatodvegaḥ sa jīvanmukta ucyate || 50||

यावती दृश्यकलना सकलेयं विलोक्यते।
सा येन सुष्ठु सन्त्यक्ता स जीवन्मुक्त उच्यते॥ ५३॥
yāvatī dṛśyakalanā sakaleyaṁ vilokyate |
sā yena suṣṭhu santyaktā sa jīvanmukta ucyate || 53||

उद्वेगानन्दरहितः समया स्वच्छया धिया।
न शोचते न चोदेति स जीवन्मुक्त उच्यते॥ ५७॥
udvegānandarahitaḥ samayā svacchayā dhiyā |
na śocate na codeti sa jīvanmukta ucyate || 57||

सर्वेच्छाः सकलाः शङ्काः सर्वेहाः सर्वनिश्चयाः।
धिया येन परित्यक्ताः स जीवन्मुक्त उच्यते॥ ५८॥
sarvecchāḥ sakalāḥ śaṅkāḥ sarvehāḥ sarvaniścayāḥ |
dhiyā yena parityaktāḥ sa jīvanmukta ucyate || 58||

जन्मस्थितिविनाशेषु सोदयास्तमयेषु च।
सममेव मनो यस्य स जीवन्मुक्त उच्यते॥ ५९॥
janmasthitivināśeṣu sodayāstamayeṣu ca |

samameva mano yasya sa jīvanmukta ucyate || 59||

शान्तसंसारकलनः कलावानपि निष्कलः।
यः सचित्तोऽपि निश्चित्तः स जीवन्मुक्त उच्यते॥ ६१॥
śāntasaṁsārakalanaḥ kalāvānapi niṣkalaḥ |
yaḥ sacitto'pi niścittaḥ sa jīvanmukta ucyate || 61||

यः समस्तार्थजालेषु व्यवहार्यपि निःस्पृहः।
परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उच्यते॥ ६२॥
yaḥ samastārthajāleṣu vyavahāryapi niḥspṛhaḥ |
parārtheṣviva pūrṇātmā sa jīvanmukta ucyate || 62||

जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव॥ ६३॥
jīvanmuktapadaṁ tyaktvā svadehe kālasātkṛte |
viśatyadehamuktatvaṁ pavano'spandatāmiva || 63||

ततः स्तिमितगंभीरं न तेजो न तमस्ततम्।
अनाख्यमनभिव्यक्तं सत्किञ्चिदवशिष्यते॥ ६५॥
tataḥ stimitagaṁbhīraṁ na tejo na tamastatam |
anākhyamanabhivyaktaṁ satkiñcidavaśiṣyate || 65||

न शून्यं नापि चाकारो न दृश्यं नापि दर्शनम्।
न च भूतपदार्थौघसदनन्ततया स्थितम्॥ ६६॥
na śūnyaṁ nāpi cākāro na dṛśyaṁ nāpi darśanam |
na ca bhūtapadārthaughasadanantatayā sthitam || 66||

चिन्मात्रं चैत्यरहितमनन्तमजरं शिवम्।
अनादिमध्यपर्यन्तं यदनादि निरामयम्॥ ६८॥

cinmātraṁ caityarahitamanantamajaraṁ śivam |
anādimadhyaparyantaṁ yadanādi nirāmayam || 68||

स्वयमेव त्वया ज्ञातं गुरुतश्च पुनः श्रुतम्।
स्वसङ्कल्पवशाद्बद्धो निःसङ्कल्पाद्विमुच्यते॥ ७०॥
svayameva tvayā jñātaṁ gurutaśca punaḥ śrutam |
svasaṅkalpavaśādbaddho niḥsaṅkalpādvimucyate || 70||

व्यपगतकलनाकलङ्कशुद्धः
 स्वयममलात्मनि पावने पदेऽसौ।
सलिलकण इवांबुधौ महात्मा
 विगलितवासनमेकतां जगाम॥ ७७॥
vyapagatakalanākalaṅkaśuddhaḥ
 svayamamalātmani pāvane pade'sau |
salilakaṇa ivāṁbudhau mahātmā
 vigalitavāsanamekatāṁ jagāma || 77||

इति महोपनिषत्। इति द्वितीयोऽध्यायः॥ २॥
iti mahopaniṣat | iti dvitīyo'dhyāyaḥ || 2||

यस्य स्त्री तस्य भोगेच्छा निःस्त्रीकस्य क्व भोगभूः।
स्त्रियं त्यक्त्वा जगत्यक्तं जगत्त्यक्त्वा सुखी भवेत्॥ ४८॥
yasya strī tasya bhogecchā niḥstrīkasya kva bhogabhūḥ |
striyaṁ tyaktvā jagattyaktaṁ jagattyaktvā sukhī bhavet || 48||

इति महोपनिषत्। इति तृतीयोऽध्यायः॥ ३॥
iti mahopaniṣat | iti tṛtīyo'dhyāyaḥ || 3||

सर्वं प्रशान्तमजमेकमनादिमध्य-
माभास्वरं स्वदनमात्रमचैत्यचिह्नम्।
सर्वं प्रशान्तमिति शब्दमयी च दृष्टि-
र्बाधार्थमेव हि मुधैव तदोमितीदम्॥ ९॥

sarvaṁ praśāntamajamekamanādimadhya-
māsvaraṁ svadanamātramacaityacihnam |
sarvaṁ praśāntamiti śabdamayī ca dṛṣṭi-
rbādhārthameva hi mudhaiva tadomitīdam || 9||

तत्त्वावबोध एवासौ वासनातृणपावकः।
प्रोक्तः समाधिशब्देन नतु तूष्णीमवस्थितिः॥ १२॥

tattvāvabodha evāsau vāsanātṛṇapāvakaḥ |
proktaḥ samādhiśabdena natu tūṣṇīmavasthitiḥ || 12||

तस्मान्नित्यमकर्ताहमिति भावनयेद्धया।
परमामृतनाम्नी सा समतैवावशिष्यते॥ १६॥

tasmānnityamakartāhamiti bhāvanayeddhayā |
paramāmṛtanāmnī sā samataivāvaśiṣyate || 16||

श्रुत्वा स्पृष्ट्वा च भुक्त्वा च दृष्ट्वा ज्ञात्वा शुभाशुभम्।
न हृष्यति ग्लायति यः स शान्त इति कथ्यते॥ ३२॥

śrutvā spṛṣṭvā ca bhuktvā ca dṛṣṭvā jñātvā śubhāśubham |
na hṛṣyati glāyati yaḥ sa śānta iti kathyate || 32||

सन्तोषामृतपानेन ये शान्तास्तृप्तिमागताः।
आत्मारामा महात्मानस्ते महापदमागताः॥ ३५॥

santoṣāmṛtapānena ye śāntāstṛptimāgatāḥ |
ātmārāmā mahātmānaste mahāpadamāgatāḥ || 35||

अप्राप्तं हि परित्यज्य संप्राप्ते समतां गतः।
अदृष्टखेदाखेदो यः सन्तुष्ट इति कथ्यते॥ ३६॥
aprāptaṁ hi parityajya saṁprāpte samatāṁ gataḥ |
adṛṣṭakhedākhedo yaḥ santuṣṭa iti kathyate || 36||

नाकृतेन कृतेनार्थो न श्रुतिस्मृतिविभ्रमैः।
निर्मन्दर इवाम्बोधिः स तिष्ठति यथास्थितः॥ ४१॥
nākṛtena kṛtenārtho na śrutismṛtivibhramaiḥ |
nirmandara ivāmbodhiḥ sa tiṣṭhati yathāsthitaḥ || 41||

द्रष्टा दृश्यवशाद्बद्धो दृश्याभावे विमुच्यते।
जगत्त्वमहमित्यादिसर्गात्मा दृश्यमुच्यते॥ ४८॥
draṣṭā dṛśyavaśādbaddho dṛśyābhāve vimucyate |
jagattvamahamityādisargātmā dṛśyamucyate || 48||

सङ्कल्पमनसी भिन्ने न कदाचन केनचित्।
सङ्कल्पजाते गलिते स्वरूपमवशिष्यते॥ ५३॥
saṅkalpamanasī bhinne na kadācana kenacit |
saṅkalpajāte galite svarūpamavaśiṣyate || 53||

महाप्रलयसंपत्तौ ह्यसत्तां समुपागते।
अशेषदृश्ये सर्गादौ शान्तमेवावशिष्यते॥ ५५॥
mahāpralayasaṁpattau hyasattāṁ samupāgate |
aśeṣadṛśye sargādau śāntamevāvaśiṣyate || 55||

अस्त्यनस्तमितो भास्वानजो देवो निरामयः।
सर्वदा सर्वकृत्सर्वः परमात्मेत्युदाहृतः॥ ५६॥
astyanastamito bhāsvānajo devo nirāmayaḥ |
sarvadā sarvakṛtsarvaḥ paramātmetyudāhṛtaḥ || 56||

चित्ताकाशं चिदाकाशमाकाशं च तृतीयकम्।
द्वाभ्यां शून्यतरं विद्धि चिदाकाशं महामुने॥ ५८॥
cittākāśaṁ cidākāśamākāśaṁ ca tṛtīyakam |
dvābhyāṁ śūnyataraṁ viddhi cidākāśaṁ mahāmune || 58||

दृश्यासंभवबोधेन रागद्वेषादितानवे।
रतिर्बलोदिता यासौ समाधिरभिधीयते॥ ६२॥
dṛśyāsaṁbhavabodhena rāgadveṣāditānave |
ratirbaloditā yāsau samādhirabhidhīyate || 62||

तद्ब्रह्मानन्दमद्वन्द्वं निर्गुणं सत्यचिद्घनम्।
विदित्वा स्वात्मनो रूपं न बिभेति कदाचन॥ ७०॥
tadbrahmānandamadvandvaṁ nirguṇaṁ satyacidghanam |
viditvā svātmano rūpaṁ na bibheti kadācana || 70||

प्रज्ञानमेव तद्ब्रह्म सत्यप्रज्ञानलक्षणम्।
एवं ब्रह्मपरिज्ञानादेव मर्त्योऽमृतो भवेत्॥ ८१॥
prajñānameva tadbrahma satyaprajñānalakṣaṇam |
evaṁ brahmaparijñānādeva martyā'mṛto bhavet || 81||

मरुभूमौ जलं सर्वं मरुभूमात्रमेव तत्।
जगत्त्रयमिदं सर्वं चिन्मात्रं स्वविचारतः॥ ८४॥
marubhūmau jalaṁ sarvaṁ marubhūmātrameva tat |
jagattrayamidaṁ sarvaṁ cinmātraṁ svavicārataḥ || 84||

मनोव्याधेश्चिकित्सार्थमुपायं कथयामि ते।
यद्यत्स्वाभिमतं वस्तु तत्त्यजन्मोक्षमश्नुते॥ ८८॥
manovyādheścikitsārthamupāyaṁ kathayāmi te |

yadyatsvābhimataṁ vastu tattyajanmokṣamaśnute || 88||

स्वायत्तमेकान्तहितं स्वेप्सिततत्यागवेदनम्।
यस्य दुष्करतां यातं धिक्तं पुरुषकीटकम्॥ ८९॥
svāyattamekāntahitaṁ svepsitatyāgavedanam |
yasya duṣkaratāṁ yātaṁ dhiktaṁ puruṣakīṭakam || 89||

असङ्कल्पनशस्त्रेण छिन्नं चित्तमिदं यदा।
सर्वं सर्वगतं शान्तं ब्रह्म संपद्यते तदा॥ ९१॥
asaṅkalpanaśastreṇa chinnaṁ cittamidaṁ yadā |
sarvaṁ sarvagataṁ śāntaṁ brahma saṁpadyate tadā || 91||

परं पौरुषमाश्रित्य नीत्वा चित्तमचित्तताम्।
ध्यानतो हृदयाकाशे चिति चिच्चक्रधारया॥ ९३॥
paraṁ pauruṣamāśritya nītvā cittamacittatām |
dhyānato hṛdayākāśe citi ciccakradhārayā || 93||

मनो मारय निःशङ्कं त्वां प्रबध्नन्ति नारयः॥ ९४॥
mano māraya niḥśaṅkaṁ tvāṁ prabadhnanti nārayaḥ || 94||

भोगैकवासनां त्यक्त्वा त्यज त्वं भेदवासनाम्।
भावाभावौ ततस्त्यक्त्या निर्विकल्पः सुखी भव॥ १०९॥
bhogaikavāsanāṁ tyaktvā tyaja tvaṁ bhedavāsanām |
bhāvābhāvau tatastyaktyā nirvikalpaḥ sukhī bhava || 109||

अनास्थैव हि निर्वाणं दुःखमास्थापरिग्रहः॥ १११॥
anāsthaiva hi nirvāṇaṁ duḥkhamāsthāparigrahaḥ || 111||

इच्छामात्रमविद्येयं तन्नाशो मोक्ष उच्यते।

स चासङ्कल्पमात्रेण सिद्धो भवति वै मुने॥ ११६॥
icchāmātramavidyeyaṁ tannāśo mokṣa ucyate |
sa cāsaṅkalpamātreṇa siddho bhavati vai mune || 116||

चैत्यानुपातरहितं सामान्येन च सर्वगम्।
यच्चित्तत्त्वमनाख्येयं स आत्मा परमेश्वरः॥ ११८॥
caityānupātarahitaṁ sāmānyena ca sarvagam |
yaccittattvamanākhyeyaṁ sa ātmā parameśvaraḥ || 118||

सर्वं च खल्विदं ब्रह्म नित्यचिद्घनमक्षतम्।
कल्पनान्या मनोनाम्नी विद्यते न हि काचन॥ ११९॥
sarvaṁ ca khalvidaṁ brahma nityacidghanamakṣatam |
kalpanānyā manonāmnī vidyate na hi kācana || 119||

इत्युपनिषत्॥ इति चतुर्थोऽध्यायः॥ ४॥
ityupaniṣat || iti caturtho'dhyāyaḥ || 4||

पदान्तराण्यसङ्ख्यानि प्रभवन्त्यन्यथैतयोः।
स्वरूपावस्थितिर्मुक्तिस्तद्भ्रंशोऽहन्त्ववेदनम्॥ २॥
padāntarāṇyasaṅkhyāni prabhavantyanyathaitayoḥ |
svarūpāvasthitirmuktistadbhraṁśo'hantvavedanam || 2||

संशान्तसर्वसङ्कल्पा या शिलावदवस्थितिः।
जाग्रन्निद्राविनिर्मुक्ता सा स्वरूपस्थितिः परा॥ ६॥
saṁśāntasarvasaṅkalpā yā śilāvadavasthitiḥ |
jāgrannidrāvinirmuktā sā svarūpasthitiḥ parā || 6||

सर्वं शान्तं निरालम्बं व्योमस्थं शाश्वतं शिवम्।
अनामयमनाभासमनामकमकारणम्॥ ४५॥

sarvaṁ śāntaṁ nirālambaṁ vyomasthaṁ śāśvataṁ śivam |
anāmayamanābhāsamanāmakamakāraṇam || 45||

न सन्नसन्न मध्यान्तं न सर्वं सर्वमेव च।
मनोवचोभिरग्राह्यं पूर्णात्पूर्णं सुखात्सुखम्॥ ४६॥
na sannasanna madhyāntaṁ na sarvaṁ sarvameva ca |
manovacobhiragrāhyaṁ pūrṇātpūrṇaṁ sukhātsukham || 46||

असंवेदनमाशान्तमात्मवेदनमाततम्।
सत्ता सर्वपदार्थानां नान्या संवेदनादृते॥ ४७॥
asaṁvedanamāśāntamātmavedanamātatam |
sattā sarvapadārthānāṁ nānyā saṁvedanādṛte || 47||

संबन्धे द्रष्टृदृश्यानां मध्ये दृष्टिर्हि यद्वपुः।
द्रष्टृदर्शनदृश्यादिवर्जितं तदिदं पदम्॥ ४८॥
saṁbandhe draṣṭṛdṛśyānāṁ madhye dṛṣṭirhi yadvapuḥ |
draṣṭṛdarśanadṛśyādivarjitaṁ tadidaṁ padam || 48||

सङ्कल्पसङ्क्षयद्गलिते तु चित्ते
    संसारमोहमिहिका गलिता भवन्ति।
स्वच्छं विभाति शरदीव खमागतायां
    चिन्मात्रमेकमजमाद्यमनन्तमन्तः॥ ५३॥
saṅkalpasaṅkṣayadgalite tu citte
    saṁsāramohamihikā galitā bhavanti |
svacchaṁ vibhāti śaradīva khamāgatāyāṁ
    cinmātramekamajamādyamanantamantaḥ || 53||

द्वितीयकारणाभावादनुत्पन्नमिदं जगत्।
ज्ञातं ज्ञातव्यमधुना दृष्टं द्रष्टव्यमद्भुतम्॥ ५८॥

dvitīyakāraṇābhāvādanutpannamidaṁ jagat |
jñātaṁ jñātavyamadhunā dṛṣṭaṁ draṣṭavyamadbhutam || 58||

विश्रान्तोऽस्मि चिरं श्रान्तश्चिन्मात्रान्नास्ति किञ्चन।
पश्य विश्रान्तसन्देहं विगताशेषकौतुकम्॥ ५९॥
viśrānto'smi ciraṁ śrāntaścinmātrānnāsti kiñcana |
paśya viśrāntasandehaṁ vigatāśeṣakautukam || 59||

भोगेच्छामात्रको बन्धस्तत्त्यागो मोक्ष उच्यते।
मनसोऽभ्युदयो नाशो मनोनाशो महोदयः॥ ९७॥
bhogecchāmātrako bandhastattyāgo mokṣa ucyate |
manaso'bhyudayo nāśo manonāśo mahodayaḥ || 97||

सर्वसङ्कल्परहिता सर्वसञ्ज्ञाविवर्जिता।
सैषा चिदविनाशात्मा स्वात्मेत्यादिकृताभिधा॥ १००॥
sarvasaṅkalparahitā sarvasañjñāvivarjitā |
saiṣā cidavināśātmā svātmetyādikṛtābhidhā || 100||

आकाशशतभागाण्छा ज्ञेषु निष्कलरूपिणी।
सकलामलसंसारस्वरूपैकात्मदर्शिनी॥ १०१॥
ākāśaśatabhāgāṇchā jñeṣu niṣkalarūpiṇī |
sakalāmalasaṁsārasvarūpaikātmadarśinī || 101||

नास्तमेति न चोदेति नोत्तिष्ठति न तिष्ठति।
न च याति न चायाति न च नेह न चेह चित्॥ १०२॥
nāstameti na codeti nottiṣṭhati na tiṣṭhati |
na ca yāti na cāyāti na ca neha na ceha cit || 102||

सैषा चिदमलाकारा निर्विकल्पा निरास्पदा॥ १०३॥

saiṣā cidamalākārā nirvikalpā nirāspadā || 103||

छित्त्वा स्वात्मनि तिष्ठ त्वं किमेतावति दुष्करम्।
यथैवेदं नभः शून्यं जगच्छून्यं तथैव हि॥ १८४॥
chittvā svātmani tiṣṭha tvaṁ kimetāvati duṣkaram |
yathaivedaṁ nabhaḥ śūnyaṁ jagacchūnyaṁ tathaiva hi || 184||

खेदोल्लासविलासेषु स्वात्मकर्तृतयैकया।
स्वसङ्कल्पे क्षयं याते समतैवावशिष्यते॥ ३॥
khedollāsavilāseṣu svātmakartṛtayaikayā |
svasaṅkalpe kṣayaṁ yāte samataivāvaśiṣyate || 3||

समता सर्वभावेषु यासौ सत्यपरा स्थितिः।
तस्यामवस्थितं चित्तं न भूयो जन्मभाग्भवेत्॥ ४॥
samatā sarvabhāveṣu yāsau satyaparā sthitiḥ |
tasyāmavasthitaṁ cittaṁ na bhūyo janmabhāgbhavet || 4||

न तदस्ति न यत्राहं न तदस्ति न तन्मयम्।
किमन्यदभिवाञ्छामि सर्वं सच्चिन्मयं ततम्॥ ११॥
na tadasti na yatrāhaṁ na tadasti na tanmayam |
kimanyadabhivāñchāmi sarvaṁ saccinmayaṁ tatam || 11||

समस्तं खल्विदं ब्रह्म सर्वमात्मेदमाततम्।
अहमन्य इदं चान्यदिति भ्रान्तिं त्यजानघ॥ १२॥
samastaṁ khalvidaṁ brahma sarvamātmedamātatam |
ahamanya idaṁ cānyaditi bhrāntiṁ tyajānagha || 12||

द्रष्टृदर्शनदृश्यानि त्यक्त्वा वासनया सह।
दर्शनप्रत्ययाभासमात्मानं समुपास्महे॥ १८॥

draṣṭṛdarśanadṛśyāni tyaktvā vāsanayā saha |
darśanapratyayābhāsamātmānaṁ samupāsmahe || 18||

अज्ञानोपहतो बाल्ये यौवने वनिताहृतः।
शेषे कलत्रचिन्तार्तः किं करोति नराधमः॥ २३॥
ajñānopahato bālye yauvane vanitāhataḥ |
śeṣe kalatracintārtaḥ kiṁ karoti narādhamaḥ || 23||

चिच्चैत्यकलितो बन्धस्तन्मुक्तौ मुक्तिरुच्यते।
चिदचैत्या किलात्मेति सर्वसिद्धान्तसंग्रहः॥ ७७॥
ciccaityakalito bandhastanmuktau muktirucyate |
cidacaityā kilātmeti sarvasiddhāntasaṁgrahaḥ || 77||

चिदहं चिदिमे लोकाश्चिदाशाश्चिदिमाः प्रजाः।
दृश्यदर्शननिर्मुक्तः केवलामलरूपवान्॥ ७९॥
cidahaṁ cidime lokāścidāśāścidimāḥ prajāḥ |
dṛśyadarśananirmuktaḥ kevalāmalarūpavān || 79||

नित्योदितो निराभासो द्रष्टा साक्षी चिदात्मकः॥ ८०॥
nityodito nirābhāso draṣṭā sākṣī cidātmakaḥ || 80||

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०७१	१८

॥ महानारायणोपनिषत्॥

०

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०७२	९२

॥ महावाक्योपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

071 18

|| mahānārāyaṇopaniṣat ||

0

varṇa-kramāṅka muktikā-kramāṅka

072 92

|| mahāvākyopaniṣat ||

सोऽहमर्कः परं ज्योतिरर्कज्योतिरहं शिवः।

so'hamarkaḥ paraṁ jyotirarkajyotirahaṁ śivaḥ |

आत्मज्योतिरहं शुक्रः सर्वज्योतिरसावदोम्।

ātmajyotirahaṁ śukraḥ sarvajyotirasāvadom |

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०७३ ६

॥ माण्डूक्योपनिषत् सहित कारिका॥

varṇa-kramāṅka muktikā-kramāṅka

073 6

|| māṇḍūkyopaniṣat sahita kārikā ||

निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः।
अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः॥ १०॥
nivṛtteḥ sarvaduḥkhānāmīśānaḥ prabhuravyayaḥ |
advaitaḥ sarvabhāvānāṁ devasturyo vibhuḥ smṛtaḥ || 10||

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः।

मायामात्रमिदं द्वैतमद्वैतं परमार्थतः॥ १७॥
prapañco yadi vidyeta nivarteta na saṁśayaḥ |
māyāmātramidaṁ dvaitamadvaitaṁ paramārthataḥ || 17||

विकल्पो विनिवर्तेत कल्पितो यदि केनचित्।
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते॥ १८॥
vikalpo vinivarteta kalpito yadi kenacit |
upadeśādayaṁ vādo jñāte dvaitaṁ na vidyate || 18||

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत
एवमोङ्कार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद॥ १२॥
amātraścaturtho'vyavahāryaḥ prapañcopaśamaḥ śivo'dvaita
evamoṅkāra ātmaiva saṁviśatyātmanā''tmānaṁ ya evaṁ veda ||
12||

प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः।
अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः॥ २६॥
praṇavo hyaparaṁ brahma praṇavaśca paraḥ smṛtaḥ |
apūrvo'nantaro'bāhyo'naparaḥ praṇavo'vyayaḥ || 26||

अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः।
ओङ्कारो विदितो येन स मुनिर्नेतरो जनः॥ २९॥
amātro'nantamātraśca dvaitasyopaśamaḥ śivaḥ |
oṅkāro vidito yena sa munirnetaro janaḥ || 29||

इति गौडपादीयकारिकासु वैतथ्याक्यं द्वितीयम्प्रकरणम्॥ २॥
iti gauḍapādīyakārikāsu vaitathyākyaṁ dvitīyamprakaraṇam || 2||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०७४ ३२

॥ मन्त्रिकोपनिषत्॥

०

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०७५ १०८

॥ मुक्तिकोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

074 32

|| mantrikopaniṣat ||

0

varṇa-kramāṅka muktikā-kramāṅka

075 108

|| muktikopaniṣat ||

प्रारब्धक्षयाद्देहत्रयभंगं प्राप्योपाधिविनिर्मुक्त-
घटाकाशवत्परिपूर्णता विदेहमुक्तिः।
prārabdhakṣayāddehatrayabhaṁgaṁ prāpyopādhivinirmukta-
ghaṭākāśavatparipūrṇatā videhamuktiḥ |

वासनां संपरित्यज्य मयि चिन्मात्र विग्रहे।
यस्तिष्ठति गतो व्यग्रः सोऽहं सच्चित्सुखात्मकः॥ १८॥
vāsanāṁ saṁparityajya mayi cinmātra vigrahe |
yastiṣṭhati gato vyagraḥ so'haṁ saccitsukhātmakaḥ || 18||

समाधिमथ कार्याणि मा करोतु करोतु वा।
हृदयेनात्तसर्वेहो मुक्त एवोत्तमाशयः॥ १९॥
samādhimatha kāryāṇi mā karotu karotu vā |
hṛdayenāttasarveho mukta evottamāśayaḥ || 19||

नैष्कर्म्येण न तस्यार्थस्तस्यार्थोऽस्ति न कर्मभिः।
न ससाधनजाप्याभ्यां यस्य निर्वासनं मनः॥ २०॥
naiṣkarmyeṇa na tasyārthastasyārtho'sti na karmabhiḥ |
na sasādhanajāpyābhyāṁ yasya nirvāsanaṁ manaḥ || 20||

सरूपोऽसौ मनोनाशो जीवन्मुक्तस्य विद्यते।
अरूपस्तु मनोनाशो वैदेही मुक्तिगो भवेत्॥ ३५॥
sarūpo'sau manonāśo jīvanmuktasya vidyate |
arūpastu manonāśo vaidehī muktigo bhavet || 35||

विनाप्यविकृतिं कृत्स्नां संभवव्यत्ययक्रमात्।
यशोऽरिष्टं च चिन्मात्रं चिदानन्दं विचिन्तय॥ ५०॥
vināpyavikṛtiṁ kṛtsnāṁ saṁbhavavyatyayakramāt |
yaśo'riṣṭaṁ ca cinmātraṁ cidānandaṁ vicintaya || 50||

ब्रह्माकारमनोवृत्तिप्रवाहोऽहङ्कृतं विना।
संप्रज्ञातसमाधिः स्याद्ध्यानाभ्यासप्रकर्षतः॥ ५३॥
brahmākāramanovṛttipravāho'haṅkṛtaṁ vinā |
saṁprajñātasamādhiḥ syāddhyānābhyāsaprakarṣataḥ || 53||

प्रशान्तवृत्तिकं चित्तं परमानन्ददायकम्।
असंप्रज्ञातनामायं समाधिर्योगिनां प्रियः॥ ५४॥
praśāntavṛttikaṁ cittaṁ paramānandadāyakam |
asaṁprajñātanāmāyaṁ samādhiryogināṁ priyaḥ || 54||

प्रभाशून्यं मनःशून्यं बुद्धिशून्यं चिदात्मकम्।
अतद्व्यावृत्तिरूपोऽसौ समाधिर्मुनिभावितः॥ ५५॥
prabhāśūnyaṁ manaḥśūnyaṁ buddhiśūnyaṁ cidātmakam |
atadvyāvṛttirūpo'sau samādhirmunibhāvitaḥ || 55||

ऊर्ध्वपूर्णमधःपूर्णं मध्यपूर्णं शिवात्मकम्।
साक्षाद्विधिमुखो ह्येष समाधिः पारमार्थिकः॥ ५६॥
ūrdhvapūrṇamadhaḥpūrṇaṁ madhyapūrṇaṁ śivātmakam |
sākṣādvidhimukho hyeṣa samādhiḥ pāramārthikaḥ || 56||

दर्शनादर्शने हित्वा स्वयं केवलरूपतः।
य आस्ते कपिशार्दूल ब्रह्म स ब्रह्मवित्स्वयम्॥ ६४॥
darśanādarśane hitvā svayaṁ kevalarūpataḥ |
ya āste kapiśārdūla brahma sa brahmavitsvayam || 64||

बद्धो हि वासनाबद्धो मोक्षः स्याद्वासनाक्षयः।
वासनां संपरित्यज्य मोक्षार्थित्वमपि त्यज॥ ६८॥
baddho hi vāsanābaddho mokṣaḥ syādvāsanākṣayaḥ |
vāsanāṁ saṁparityajya mokṣārthitvamapi tyaja || 68||

अशब्दमस्पर्शमरूपमव्ययं
    तथाऽरसं नित्यमगन्धवच्च यत्।
अनामगोत्रं मम रूपमीदृशं
    भजस्व नित्यं पवनात्मजार्तिहन्॥ ७२॥
aśabdamasparśamarūpamavyayaṁ
    tathā'rasaṁ nityamagandhavacca yat |
anāmagotraṁ mama rūpamīdṛśaṁ
    bhajasva nityaṁ pavanātmajārtihan || 72||

दृशिस्वरूपं गगनोपमं परं
        सकृद्विभातं त्वजमेकमक्षरम्।
अलेपकं सर्वगतं यदद्वयं
        तदेव चाहं सकलं विमुक्तॐ॥ ७३॥

dṛśisvarūpaṁ gaganopamaṁ paraṁ
        sakṛdvibhātaṁ tvajamekamakṣaram |
alepakaṁ sarvagataṁ yadadvayaṁ
        tadeva cāhaṁ sakalaṁ vimuktaom || 73||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०७७ ५७
॥ मुद्गलोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka
077 57
|| mudgalopaniṣat ||

तद्ब्रह्म तापत्रयातीतं षट्कोशविनिर्मुक्तं षडूर्मिवर्जितं
पञ्चकोशातीतं षड्भावविकारशून्यमेवमादिसर्वविलक्षणं

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०७६ ५
॥ मुण्डकोपनिषत् ॥

tadbrahma tāpatrayātītaṁ ṣaṭkośavinirmuktaṁ ṣaḍūrmivarjitaṁ
pañcakośātītaṁ ṣaḍbhāvavikāraśūnyamevamādisarvavilakṣaṇaṁ

varṇa-kramāṅka muktikā-kramāṅka
076 5

|| muṇḍakopaniṣat ||

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्ण-
मचक्षुःश्रोत्रं तदपाणिपादम्।
नित्यं विभुं सर्वगतं सुसूक्ष्मं
तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः॥ ६॥
yattadadreśyamagrāhyamagotramavarṇa-
macakṣuḥśrotraṁ tadapāṇipādam |
nityaṁ vibhuṁ sarvagataṁ susūkṣmaṁ
tadavyayaṁ yadbhūtayoniṁ paripaśyanti dhīrāḥ || 6||

दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः॥ २॥
divyo hyamūrtaḥ puruṣaḥ sa bāhyābhyantaro hyajaḥ |
aprāṇo hyamanāḥ śubhro hyakṣarāt parataḥ paraḥ || 2||

एतद्यो वेद निहितं गुहायां
सोऽविद्याग्रन्थिं विकिरतीह सोम्य॥ १०॥
etadyo veda nihitaṁ guhāyāṁ
so'vidyāgranthiṁ vikiratīha somya || 10||

परं विज्ञानाद्यद्वरिष्ठं प्रजानाम्॥ १॥
paraṁ vijñānādyadvariṣṭhaṁ prajānām || 1||

यदर्चिमद्यदणुभ्योऽणु च॥ २॥
yadarcimadyadaṇubhyo'ṇu ca || 2||

ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण।
अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्॥ ११॥
brahmaivedamamṛtaṁ purastād brahma paścād brahma dakṣiṇataścottareṇa |
adhaścordhvaṁ ca prasṛtaṁ brahmaivedaṁ viśvamidaṁ variṣṭham || 11||

यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति॥ ३॥
yadā paśyaḥ paśyate rukmavarṇaṁ
kartāramīśaṁ puruṣaṁ brahmayonim |
tadā vidvān puṇyapāpe vidhūya
nirañjanaḥ paramaṁ sāmyamupaiti || 3||

प्रणो ह्येष यः सर्वभूतैर्विभाति
विजानन् विद्वान् भवते नातिवादी।
आत्मक्रीड आत्मरतिः क्रियावा-
नेष ब्रह्मविदां वरिष्ठः॥ ४॥
praṇo hyeṣa yaḥ sarvabhūtairvibhāti
vijānan vidvān bhavate nātivādī |
ātmakrīḍa ātmaratiḥ kriyāvā-
neṣa brahmavidāṁ variṣṭhaḥ || 4||

बृहच्च तद् दिव्यमचिन्त्यरूपं
सूक्ष्माच्च तत् सूक्ष्मतरं विभाति।
दूरात् सुदूरे तदिहान्तिके च

पश्यन्त्विहैव निहितं गुहायाम्॥ ७॥
bṛhacca tad divyamacintyarūpaṁ
sūkṣmācca tat sūkṣmataraṁ vibhāti |
dūrāt sudūre tadihāntike ca
paśyantvihaiva nihitaṁ guhāyām || 7||

वेदान्तविज्ञानसुनिश्चितार्थाः
संन्यासयोगाद् यतयः शुद्धसत्त्वाः।
ते ब्रह्मलोकेषु परान्तकाले
परामृताः परिमुच्यन्ति सर्वे॥ ६॥
vedāntavijñānasuniścitārthāḥ
saṁnyāsayogād yatayaḥ śuddhasattvāḥ |
te brahmalokeṣu parāntakāle
parāmṛtāḥ parimucyanti sarve || 6||

गताः कलाः पञ्चदश प्रतिष्ठा
देवाश्च सर्वे प्रतिदेवतासु।
कर्माणि विज्ञानमयश्च आत्मा
परेऽव्यये सर्वे एकीभवन्ति॥ ७॥
gatāḥ kalāḥ pañcadaśa pratiṣṭhā
devāśca sarve pratidevatāsu |
karmāṇi vijñānamayaśca ātmā
pare'vyaye sarve ekībhavanti || 7||

यथा नद्यः स्यन्दमानाः समुद्रेऽ
स्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान् नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति दिव्यम्॥ ८॥
yathā nadyaḥ syandamānāḥ samudre'

staṁ gacchanti nāmarūpe vihāya |
tathā vidvān nāmarūpādvimuktaḥ
parātparaṁ puruṣamupaiti divyam || 8||

स यो ह वै तत् परमं ब्रह्म वेद
ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति।
तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो
विमुक्तोऽमृतो भवति॥ ९॥
sa yo ha vai tat paramaṁ brahma veda
brahmaiva bhavati nāsyābrahmavitkule bhavati |
tarati śokaṁ tarati pāpmānaṁ guhāgranthibhyo
vimukto'mṛto bhavati || 9||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०७८ २४
॥ अथ मैत्रायण्युपनिषत्॥
varṇa-kramāṅka muktikā-kramāṅka
078 24
|| atha maitrāyaṇyupaniṣat ||

एष शुद्धः
पूतः शून्यः शान्तो प्राणोऽनीशत्माऽनन्तोऽक्षय्यः स्थिरः
शाश्वतोऽजः स्वतन्त्रः स्वे महिम्नि तिष्ठत्यनेनेदं॥ ४॥
eṣa śuddhaḥ
pūtaḥ śūnyaḥ śānto prāṇo'nīśatmā'nanto'kṣayyaḥ sthiraḥ
śāśvato'jaḥ svatantraḥ sve mahimni tiṣṭhatyanenedaṁ || 4||

चित्तमेव हि संसारस्तत्प्रयत्नेन शोधयेत्।
यच्चित्तस्तन्मयो भवति गुह्यमेतत्सनातनम्॥ ३॥

cittameva hi saṁsārastatprayatnena śodhayet |
yaccittastanmayo bhavati guhyametatsanātanam || 3||

अतः शुद्धः पूतः शून्यः शान्तोऽप्राणो निरात्माऽनन्तोऽक्षय्यः
स्थिरः शाश्वतोऽजः स्वतन्त्रः स्वे महिम्नि तिष्ठति अतः स्वे महिम्नि
तिष्ठमानम् दृष्ट्वाऽवृत्तचक्रमिव सञ्चारचक्रमालोकयति
ataḥ śuddhaḥ pūtaḥ śūnyaḥ śānto'prāṇo nirātmā'nanto'kṣayyaḥ
sthiraḥ śāśvato'jaḥ svatantraḥ sve mahimni tiṣṭhati ataḥ sve
mahimni
tiṣṭhamānam dṛṣṭvā'vṛttacakramiva sañcāracakramālokayati

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०७९ २९
॥ मैत्रेय्युपनिषत्॥
yadā pañcāvatiṣṭhante jñānāni manasā saha |

varṇa-kramāṅka muktikā-kramāṅka
079 29
|| maitreyyupaniṣat ||

अगोचरं मनोवाचामवधूतादिसंप्लवम्।
सत्तामात्रप्रकाशैकप्रकाशं भावनातिगम्॥ ९॥
agocaraṁ manovācāmavadhūtādisaṁplavam |
sattāmātraprakāśaikaprakāśaṁ bhāvanātigam || 9||

अहेयमनुपादेयमसामान्यविशेषणम्।

ध्रुवं स्तिमितगंभीरं न तेजो न तमस्ततम्।
निर्विकल्पं निराभासं निर्वाणमयसंविदम्॥ १०॥
aheyamanupādeyamasāmānyaviśeṣaṇam |
dhruvaṁ stimitagaṁbhīraṁ na tejo na tamastatam |
nirvikalpaṁ nirābhāsaṁ nirvāṇamayasaṁvidam || 10||

नित्यः शुद्धो बुद्धमुक्तस्वभावः
सत्यः सूक्ष्मः संविभुश्चाद्वितीयः।
आनन्दाब्धिर्यः परः सोऽह-
मस्मि प्रत्यग्धातुर्नात्र संशीतिरस्ति॥ ११॥
nityaḥ śuddho buddhamuktasvabhāvaḥ
satyaḥ sūkṣmaḥ saṁvibhuścādvitīyaḥ |
ānandābdhiryaḥ paraḥ so'ha-
masmi pratyagdhāturnātra saṁśītirasti || 11||

आनन्दमन्तर्निजमाश्रयं त-
माशापिशाचीमवमनयन्तम्।
आलोकयन्तं जगदिन्द्रजाल-
मापत्कथं मां प्रविशेदसङ्गम्॥ १२॥
ānandamantarnijamāśrayaṁ ta-
māśāpiśācīmavamanayantam |
ālokayantaṁ jagadindrajāla-
māpatkathaṁ māṁ praviśedasaṅgam || 12||

अनुभूतिं विना मूढो वृथा ब्रह्मणि मोदते।
प्रतिबिम्बितशाखाग्रफलास्वादनमोदवत्॥ २२॥
anubhūtiṁ vinā mūḍho vṛthā brahmaṇi modate |
pratibimbitaśākhāgraphalāsvādanamodavat || 22||

अन्तःपूर्णो बहिःपूर्णः पूर्णकुम्भ इवार्णवे।
अन्तःशून्यो बहिःशून्यः शून्यकुम्भ इवाम्बरे॥२७॥
antaḥpūrṇo bahiḥpūrṇaḥ pūrṇakumbha ivārṇave |
antaḥśūnyo bahiḥśūnyaḥ śūnyakumbha ivāmbare ||27||

मा भव ग्राह्यभावात्मा ग्राहकात्मा च मा भव।
भावनामखिलं त्यक्त्वा यच्छिष्टं तन्मयो भव॥ २८॥
mā bhava grāhyabhāvātmā grāhakātmā ca mā bhava |
bhāvanāmakhilaṁ tyaktvā yacchiṣṭaṁ tanmayo bhava || 28||

द्रष्टृदर्शनदृश्यानि त्यक्त्वा वासनया सह।
दर्शनप्रथमाभासमात्मानं केवलं भज॥ २९॥
संशान्तसर्वसङ्कल्पा या शिलावदवस्थितिः।
जाग्रन्निद्राविनिर्मुक्ता सा स्वरूपस्थितिः परा॥ ३०॥
draṣṭṛdarśanadṛśyāni tyaktvā vāsanayā saha |
darśanaprathamābhāsamātmānaṁ kevalaṁ bhaja || 29||
saṁśāntasarvasaṅkalpā yā śilāvadavasthitiḥ |
jāgrannidrāvinirmuktā sā svarūpasthitiḥ parā || 30||

इति द्वितीयोऽध्यायः॥ २॥
iti dvitīyo'dhyāyaḥ || 2||

मानावमानहीनोऽस्मि निर्गुणोऽस्मि शिवोऽस्म्यहम्।
द्वैताद्वैतविहीनोऽस्मि द्वन्द्वहीनोऽस्मि सोऽस्म्यहम्॥ ४॥
mānāvamānahīno'smi nirguṇo'smi śivo'smyaham |
dvaitādvaitavihīno'smi dvandvahīno'smi so'smyaham || 4||

भावाभावविहीनोऽस्मि भासाहीनोऽस्मि भास्म्यहम्।

शून्याशून्यप्रभावोऽस्मि शोभनाशोभनोऽस्म्यहम्॥ ५॥
bhāvābhāvavihīno'smi bhāsāhīno'smi bhāsmyaham |
śūnyāśūnyaprabhāvo'smi śobhanāśobhano'smyaham || 5||

एकसङ्ख्याविहीनोऽस्मि द्विसङ्ख्यावाहनं न च।
सदसद्भेदहीनोऽस्मि सङ्कल्प्स्रहितोस्म्यहम्॥ ७॥
ekasaṅkhyāvihīno'smi dvisaṅkhyāvāhanaṁ na ca |
sadasadbhedahīno'smi saṅkalpsrahitosmyaham || 7||

नानात्मभेदहीनोऽस्मि ह्यखण्डानन्दविग्रहः।
नाहमस्मि न चान्योऽस्मि देहादिरहितोऽस्म्यहम्॥ ८॥
nānātmabhedahīno'smi hyakhaṇḍānandavigrahaḥ |
nāhamasmi na cānyo'smi dehādirahito'smyaham || 8||

आश्रयाश्रयहीनोऽस्मि आधाररहितोऽस्म्यहम्।
बन्धमोक्षादिहीनोऽस्मि शुद्धब्रह्मास्मि सोऽस्म्यहम्॥ ९॥
āśrayāśrayahīno'smi ādhārarahito'smyaham |
bandhamokṣādihīno'smi śuddhabrahmāsmi so'smyaham || 9||

चित्तादिसर्वहीनोऽस्मि परमोऽस्मि परात्परः।
सदा विचाररूपोऽस्मि निर्विचारोऽस्मि सोऽस्म्यहम्॥ १०॥
cittādisarvahīno'smi paramo'smi parātparaḥ |
sadā vicārarūpo'smi nirvicāro'smi so'smyaham || 10||

अकारोकाररूपोऽस्मि मकरोऽस्मि सनातनः।
ध्यातृध्यानविहीनोऽस्मि ध्येयहीनोऽस्मि सोऽस्म्यहम्॥ ११॥
akārokārarūpo'smi makaro'smi sanātanaḥ |
dhyātṛdhyānavihīno'smi dhyeyahīno'smi so'smyaham || 11||

लक्ष्यालक्ष्यविहीनोऽस्मि लयहीनरसोऽस्म्यहम्।
मातृमानविहीनोऽस्मि मेयहीनः शिवोऽस्म्यहम्॥ १३॥
lakṣyālakṣyavihīno'smi layahīnaraso'smyaham |
mātṛmānavihīno'smi meyahīnaḥ śivo'smyaham || 13||

सर्वेन्द्रियविहीनोऽस्मि सर्वकर्मकृदप्यहम्।
सर्ववेदान्ततृप्तोऽस्मि सर्वदा सुलभोऽस्म्यहम्॥ १५॥
sarvendriyavihīno'smi sarvakarmakṛdapyaham |
sarvavedāntatṛpto'smi sarvadā sulabho'smyaham || 15||

मुदितामुदिताख्योऽस्मि सर्वमौनफलोऽस्म्यहम्।
नित्यचिन्मात्ररूपोऽस्मि सदा सच्चिन्मयोऽस्म्यहम्॥ १६॥
muditāmuditākhyo'smi sarvamaunaphalo'smyaham |
nityacinmātrarūpo'smi sadā saccinmayo'smyaham || 16||

षड्विकारविहीनोऽस्मि षट्कोषरहितोऽस्म्यहम्।
अरिषड्वर्गमुक्तोऽस्मि अन्तरादन्तरोऽस्म्यहम्॥ १८॥
ṣaḍvikāravihīno'smi ṣaṭkoṣarahito'smyaham |
ariṣaḍvargamukto'smi antarādantaro'smyaham || 18||

देशकालविमुक्तोऽस्मि दिगम्बरसुखोऽस्म्यहम्।
नास्ति नास्ति विमुक्तोऽस्मि नकाररहितोऽस्म्यहम्॥ १९॥
deśakālavimukto'smi digambarasukho'smyaham |
nāsti nāsti vimukto'smi nakārahito'smyaham || 19||

अखण्डाकाशरूपोऽस्मि ह्यखण्डाकारमस्म्यहम्।
प्रपञ्चमुक्तचित्तोऽस्मि प्रपञ्चरहितोऽस्म्यहम्॥ २०॥
akhaṇḍākāśarūpo'smi hyakhaṇḍākāramasmyaham |
prapañcamuktacitto'smi prapañcarahito'smyaham || 20||

सर्वप्रकाशरूपोऽस्मि चिन्मात्रज्योतिरस्म्यहम्।
कालत्रयविमुक्तोऽस्मि कामादिरहितोऽस्म्यहम्॥ २१॥
sarvaprakāśarūpo'smi cinmātrajyotirasmyaham |
kālatrayavimukto'smi kāmādirahito'smyaham || 21||

कायिकादिविमुक्तोऽस्मि निर्गुणः केवलोऽस्म्यहम्।
मुक्तिहीनोऽस्मि मुक्तोऽस्मि मोक्षहीनोऽस्म्यहम् सदा॥ २२॥
kāyikādivimukto'smi nirguṇaḥ kevalo'smyaham |
muktihīno'smi mukto'smi mokṣahīno'smyaham sadā || 22||

सत्यासत्यादिहीनोऽस्मि सन्मात्रान्नास्म्यहं सदा।
गन्तव्यदेशहीनोऽस्मि गमनादिविवर्जितः॥ २३॥
satyāsatyādihīno'smi sanmātrānnāsmyahaṁ sadā |
gantavyadeśahīno'smi gamanādivivarjitaḥ || 23||

सर्वदा समरूपोऽस्मि शान्तोऽस्मि पुरुषोत्तमः।
एवं स्वानुभवो यस्य सोऽहमस्मि न संशयः॥ २४॥
sarvadā samarūpo'smi śānto'smi puruṣottamaḥ |
evaṁ svānubhavo yasya so'hamasmi na saṁśayaḥ || 24||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०८० ९७
॥ याज्ञवल्क्योपनिषत् ॥

varṇa-kramāṅka muktikā-kramāṅka
080 97

|| yājñavalkyopaniṣat ||

चिदिहास्तीति चिन्मात्रमिदं चिन्मयमेव च।
cidihāstīti cinmātramidaṁ cinmayameva ca |

चित्त्वं चिदहमेते च लोकाश्चिदिति भावय॥ २३॥
cittvaṁ cidahamete ca lokāściditi bhāvaya || 23||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०८१ ८६
॥ योगकुण्डल्युपनिषत्॥
varṇa-kramāṅka muktikā-kramāṅka
081 86
|| yogakuṇḍalyupaniṣat ||

शब्दैरुच्चावचैर्नीचैर्भाषितोऽपि न लिप्यते।
विश्वश्च तैजसश्चैव प्राज्ञश्चेति च ते त्रयः॥ २१॥
śabdairuccāvacairnīcairbhāṣito'pi na lipyate |
viśvaśca taijasaścaiva prājñaśceti ca te trayaḥ || 21||

विराड्ढिरण्यगर्भश्च ईश्वरश्चेति ते त्रयः।
ब्रह्माण्डं चैव पिण्डाण्डं लोका भूरादयः क्रमात्॥ २२॥
virāḍḍhiraṇyagarbhaśca īśvaraśceti te trayaḥ |
brahmāṇḍaṁ caiva piṇḍāṇḍaṁ lokā bhūrādayaḥ kramāt || 22||

स्वस्वोपाधिलयादेव लीयन्ते प्रत्यगात्मनि।
अण्डं ज्ञानाग्निना तप्तं लीयते कारणैः सह॥ २३॥
svasvopādhilayādeva līyante pratyagātmani |

aṇḍaṁ jñānāgninā taptaṁ līyate kāraṇaiḥ saha || 23||

परमात्मनि लीनं तत्परं ब्रह्मैव जायते।
ततः स्तिमितगम्भीरं न तेजो न तमस्ततम्॥ २४॥
paramātmani līnaṁ tatparaṁ brahmaiva jāyate |
tataḥ stimitagambhīraṁ na tejo na tamastatam || 24||

अशब्दमस्पर्शमरूपमव्ययं
तथारसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं
तदेव शिष्यत्यमलं निरामयम्॥ ३५॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०८२ ४६
॥ योगचूडामण्युपनिषत्॥
aśabdamasparśamarūpamavyayaṁ
tathārasaṁ nityamagandhavacca yat |
anādyanantaṁ mahataḥ paraṁ dhruvaṁ
tadeva śiṣyatyamalaṁ nirāmayam || 35||

varṇa-kramāṅka muktikā-kramāṅka
082 46
|| yogacūḍāmaṇyupaniṣat ||

अनवच्छिन्नं परंब्रह्म
anavacchinnaṁ paraṁbrahma

जाग्रन्नेत्रद्वयोर्मध्ये हंस एव प्रकाशते।

सकारः खेचरी प्रोक्तस्त्वंपदं चेति निश्चितम्॥ ८२॥
jāgrannetradvayormadhye haṁsa eva prakāśate |
sakāraḥ khecarī proktastvaṁpadaṁ ceti niścitam || 82||

हकारः परमेशः स्यात्तत्पदं चेति निश्चितम्।
सकारो ध्यायते जन्तुर्हकारो हि भवेद्ध्रुवम्॥ ८३॥
hakāraḥ parameśaḥ syāttatpadaṁ ceti niścitam |
sakāro dhyāyate janturhakāro hi bhaveddhṛvam || 83||

इन्द्रियैर्बध्यते जीव आत्मा चैव न बध्यते।
ममत्वेन भवेज्जीवो निर्ममत्वेन केवलः॥ ८४॥
indriyairbadhyate jīva ātmā caiva na badhyate |
mamatvena bhavejjīvo nirmamatvena kevalaḥ || 84||

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०८३	४१

॥ योगतत्त्वोपनिषत्॥

varṇa-kramāṅka	muktikā-kramāṅka
083	41

|| yogatattvopaniṣat ||

योगी कुम्भकमास्थाय प्रत्याहारः स उच्यते।
यद्यत्पश्यति चक्षुर्भ्यां तत्तदात्मेति भावयेत्॥ ६९॥
yogī kumbhakamāsthāya pratyāhāraḥ sa ucyate |
yadyatpaśyati cakṣurbhyāṁ tattadātmeti bhāvayet || 69||

यद्यच्छृणोति कर्णाभ्यां तत्तदात्मेति भावयेत्।
लभते नासया यद्यत्तत्तदात्मेति भावयेत्॥ ७०॥
yadyacchṛṇoti karṇābhyāṁ tattadātmeti bhāvayet |
labhate nāsayā yadyattattadātmeti bhāvayet || 70||

जिह्वया यद्रसं ह्यत्ति तत्तदात्मेति भावयेत्।
त्वचा यद्यत्स्पृशेद्योगी तत्तदात्मेति भावयेत्॥ ७१॥
jihvayā yadrasaṁ hyatti tattadātmeti bhāvayet |
tvacā yadyatspṛśedyogī tattadātmeti bhāvayet || 71||

परब्रह्मणि लीयेत न तस्योत्क्रान्तिरिष्यते।
अथ नो चेत्समुत्स्रष्टुं स्वशरीरं प्रियं यदि॥ १०८॥
parabrahmaṇi līyeta na tasyotkrāntiriṣyate |
atha no cetsamutsraṣṭuṁ svaśarīraṁ priyaṁ yadi || 108||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०८४ ६३
॥ योगशिखोपनिषत्॥
varṇa-kramāṅka muktikā-kramāṅka
084 63
|| yogaśikhopaniṣat ||

स्वात्मप्रकाशरूपं तत्किं शास्त्रेण प्रकाश्यते।
निष्कलं निर्मलं शान्तं सर्वातीतं निरामयम्॥ ५॥
svātmaprakāśarūpaṁ tatkiṁ śāstreṇa prakāśyate |
niṣkalaṁ nirmalaṁ śāntaṁ sarvātītaṁ nirāmayam || 5||

परं ब्रह्म परं सत्यं सच्चिदानन्दलक्षणम्।
अप्रमेयमनिर्देश्यमवाङ्मनसगोचरम्॥ १६॥

paraṁ brahma paraṁ satyaṁ saccidānandalakṣaṇam |
aprameyamanirdeśyamavāṅmanasagocaram || 16||

शुद्धं सूक्ष्मं निराकारं निर्विकारं निरञ्जनम्।
अनन्तमपरिच्छेद्यमनूपममनामयम्॥ १७॥
śuddhaṁ sūkṣmaṁ nirākāraṁ nirvikāraṁ nirañjanam |
anantamaparicchedyamanūpamamanāmayam || 17||

क्षरः सर्वाणि भूतानि सूत्रात्माऽक्षर उच्यते।
अक्षरं परमं ब्रह्म निर्विशेषं निरञ्जनम्॥ १६॥
kṣaraḥ sarvāṇi bhūtāni sūtrātmā'kṣara ucyate |
akṣaraṁ paramaṁ brahma nirviśeṣaṁ nirañjanam || 16||

आधारं सर्वभूतानामनाधारमनामयम्।
अप्रमाणमनिर्देश्यमप्रमेयमतीन्द्रियम्॥ १८॥
ādhāraṁ sarvabhūtānāmanādhāramanāmayam |
apramāṇamanirdeśyamaprameyamatīndriyam || 18||

निष्कलं निर्गुणं शान्तं निर्विकारं निराश्रयम्।
निर्लेपकं निरापायं कूटस्थमचलं ध्रुवम्॥ २१॥
niṣkalaṁ nirguṇaṁ śāntaṁ nirvikāraṁ nirāśrayam |
nirlepakaṁ nirāpāyaṁ kūṭasthamacalaṁ dhruvam || 21||

जगन्नाम्ना चिदाभाति सर्वं ब्रह्मैव केवलम्।
यथा वन्ध्यासुतो नास्ति यथा नस्ति मरौ जलम्॥ १८॥
jagannāmnā cidābhāti sarvaṁ brahmaiva kevalam |
yathā vandhyāsuto nāsti yathā nasti marau jalam || 18||

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।

क्षीयन्ते चास्य कर्माणि तस्मिद्दृष्टे परावरे॥ ४५॥
bhidyate hṛdayagranthiśchidyante sarvasaṁśayāḥ |
kṣīyante cāsya karmāṇi tasmidnṛṣṭe parāvare || 45||

चित्ते चलति संसारो निश्चलं मोक्ष उच्यते।
तस्माच्चित्तं स्थिरीकुर्यात्प्रज्ञया परया विधे॥ ५८॥
citte calati saṁsāro niścalaṁ mokṣa ucyate |
tasmāccittaṁ sthirīkuryātprajñayā parayā vidhe || 58||

चित्तं कारणमर्थानां तस्मिन्सति जगत्त्रयम्।
तस्मिन्क्षीणे जगत्क्षीणं तच्चिकित्स्यं प्रयत्नतः॥ ५९॥
cittaṁ kāraṇamarthānāṁ tasminsati jagattrayam |
tasminkṣīṇe jagatkṣīṇaṁ taccikitsyaṁ prayatnataḥ || 59||

बिन्दुनादकलाज्योतीरवीन्दुध्रुवतारकम्।
शान्तं च तदतीतं च परंब्रह्म तदुच्यते॥ ६६॥
bindunādakalājyotīravīndudhruvatārakam |
śāntaṁ ca tadatītaṁ ca paraṁbrahma taducyate || 66||

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०८५	५५

॥ रामोत्तरतापिन्युपनिषत्॥

varṇa-kramāṅka	muktikā-kramāṅka
085	55

|| rāmottaratāpinyupaniṣat ||

सर्वं ह्येतद्ब्रह्म।
sarvaṁ hyetadbrahma |

नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं
न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमदृश्य-
मव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्य-
मेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं
शिवमद्वैतं चतुर्थं मन्यन्ते।
nāntaḥprajñaṁ na bahiḥprajñaṁ nobhayataḥprajñaṁ
na prajñaṁ nāprajñaṁ na prajñānaghanamadṛśya-
mavyavahāryamagrāhyamalakṣaṇamacintyamavyapadeśya-
mekātmapratyayasāraṁ prapañcopaśamaṁ śāntaṁ
śivamadvaitaṁ caturthaṁ manyante |

स आत्मा स विज्ञेयः

sa ātmā sa vijñeyaḥ

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०८६ ५४
॥ रामरहस्योपनिषत्॥
varṇa-kramāṅka muktikā-kramāṅka
086 54
|| rāmarahasyopaniṣat ||

एतेषु चैव सर्वेषु तत्त्वं च ब्रह्म तारकम्।
राम एव परं ब्रह्म तत्त्वं श्रीरामो ब्रह्म तारकम्॥ ६॥
eteṣu caiva sarveṣu tattvaṁ ca brahma tārakam |
rāma eva paraṁ brahma tattvaṁ śrīrāmo brahma tārakam || 6||

बीजं मायाविनिर्मुक्तं परं ब्रह्मेति कीर्त्यते।
मुक्तिदं साधकानां च मकारो मुक्तिदो मतः॥ ११॥
bījaṁ māyāvinirmuktaṁ paraṁ brahmeti kīrtyate |
muktidaṁ sādhakānāṁ ca makāro muktido mataḥ || 11||

मारूपत्वादतो रामो भुक्तिमुक्तिफलप्रदः।
आद्यो र तत्पदार्थः स्यान्मकरस्त्वंपदार्थवान्॥ १२॥
mārūpatvādato rāmo bhuktimuktiphalapradaḥ |
ādyo ra tatpadārthaḥ syānmakarastvaṁpadārthavān || 12||

तयोः संयोजनमसीत्यर्थे तत्त्वविदो विदुः।
नमस्त्वमर्थो विज्ञेयो रामस्तत्पदमुच्यते॥ १३॥
tayoḥ saṁyojanamasītyarthe tattvavido viduḥ |
namastvamartho vijñeyo rāmastatpadamucyate || 13||

असीत्यर्थे चतुर्थी स्यादेवं मन्त्रेषु योजयेत्।
तत्त्वमस्यादिवाक्यं तु केवलं मुक्तिदं यतः॥ १४॥
asītyarthe caturthī syādevaṁ mantreṣu yojayet |
tattvamasyādivākyaṁ tu kevalaṁ muktidaṁ yataḥ || 14||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०८७ ८५
॥ रुद्रहृदयोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka
087 85

|| rudrahṛdayopaniṣat ||

स यो ह वै तत्परमं ब्रह्म यो वेद वै मुनिः।
ब्रह्मैव भवति स्वस्थः सच्चिदानन्द मातृकः॥ ५२॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०८८ ८८

॥ रुद्राक्षजाबालोपनिषत्॥

०

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०८९ ३६

॥ वज्रसूचिका उपनिषद् ॥

sa yo ha vai tatparamaṁ brahma yo veda vai muniḥ |
brahmaiva bhavati svasthaḥ saccidānanda mātṛkaḥ || 52||

varṇa-kramāṅka muktikā-kramāṅka

088 88

|| rudrākṣajābālopaniṣat ||

0

varṇa-kramāṅka muktikā-kramāṅka

089 36

|| vajrasūcikā upaniṣad ||

सच्चिदानान्दमात्मानमद्वितीयं ब्रह्म भावयेद्

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०९० ९८
॥ वराहोपनिषत्॥
saccidānāndamātmānamadvitīyaṁ brahma bhāvayed

varṇa-kramāṅka muktikā-kramāṅka
090 98
|| varāhopaniṣat ||

अतिवर्णाश्रमं रूपं सच्चिदानन्दलक्षणम्।
यो न जानाति सोऽविद्वान्कदा मुक्तो भविष्यति॥ ६॥
ativarṇāśramaṁ rūpaṁ saccidānandalakṣaṇam |
yo na jānāti so'vidvānkadā mukto bhaviṣyati || 6||

स्वपूर्णात्मातिरेकेण जगज्जीवेश्वरादयः।
न सन्ति नास्ति माया च तेभ्यश्चाहं विलक्षणः॥ ११॥
svapūrṇātmātirekeṇa jagajjīveśvarādayaḥ |
na santi nāsti māyā ca tebhyaścāhaṁ vilakṣaṇaḥ || 11||

सर्वसाक्षिणमात्मानं वर्णाश्रमविवर्जितम्।
ब्रह्मरूपतया पश्यन्ब्रह्मैव भवति स्वयम्॥ १३॥
sarvasākṣiṇamātmānaṁ varṇāśramavivarjitam |
brahmarūpatayā paśyanbrahmaiva bhavati svayam || 13||

प्रज्ञानमेव तद्ब्रह्म सत्यप्रज्ञालक्षणम्।
एवं ब्रह्मपरिज्ञानादेव मर्त्योऽमृतो भवेत्॥ १९॥
prajñānameva tadbrahma satyaprajñālakṣaṇam |
evaṁ brahmaparijñānādeva martyo'mṛto bhavet || 19||

तद्ब्रह्मानन्दमद्वन्द्वं निर्गुणं सत्यचिद्घनम्।

विदित्वा स्वात्मनो रूपं न बिभेति कुतश्चन॥ २०॥
tadbrahmānandamadvandvaṁ nirguṇaṁ satyacidghanam |
viditvā svātmano rūpaṁ na bibheti kutaścana || 20||

स्वात्मनोऽन्यदिवाभातं चराचरमिदं जगत्।
स्वात्ममात्रतया बुद्ध्वा तदस्मीति विभावय॥ २५॥
svātmano'nyadivābhātaṁ carācaramidaṁ jagat |
svātmamātratayā buddhvā tadasmīti vibhāvaya || 25||

त्वं वहमस्मि भगवो देवतेऽहं वै त्वमसि।
तुभ्यं मह्यमनन्ताय मह्यं तुभ्यं चिदात्मने॥ ३४॥
tvaṁ vahamasmi bhagavo devate'haṁ vai tvamasi |
tubhyaṁ mahyamanantāya mahyaṁ tubhyaṁ cidātmane || 34||

नमो मह्यं परेशाय नमस्तुभ्यं शिवाय च।
किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम्॥ ३५॥
namo mahyaṁ pareśāya namastubhyaṁ śivāya ca |
kiṁ karomi kva gacchāmi kiṁ gṛhṇāmi tyajāmi kim || 35||

यन्मया पूरितं विश्वं महाकल्पांबुना यथा।
अन्तःसङ्गं बहिःसङ्गमात्मसङ्गं च यस्त्यजेत्।
सर्वसङ्गनिवृत्तात्मा स मामेति न संशयः॥ ३६॥
yanmayā pūritaṁ viśvaṁ mahākalpāṁbunā yathā |
antaḥsaṅgaṁ bahiḥsaṅgamātmasaṅgaṁ ca yastyajet |
sarvasaṅganivṛttātmā sa māmeti na saṁśayaḥ || 36||

ममेति बध्यते जन्तुर्निर्ममेति विमुच्यते।
बाह्यचिन्ता न कर्तव्या तथैवान्तरचिन्तिका।
सर्वचिन्तां समुत्सृज्य स्वस्थो भव सदा ऋभो॥ ४४॥

mameti badhyate janturnirmameti vimucyate |
bāhyacintā na kartavyā tathaivāntaracintikā |
sarvacintāṁ samutsṛjya svastho bhava sadā ṛbho || 44||

चिदिहास्तीति चिन्मात्रमिदं चिन्मयमेव च।
चित्त्वं चिदहमेते च लोकाश्चिदिति भावय॥ ४७॥
cidihāstīti cinmātramidaṁ cinmayameva ca |
cittvaṁ cidahamete ca lokāściditi bhāvaya || 47||

अद्वितीयब्रह्मतत्त्वं न जानन्ति यथा तथा।
भ्रान्ता एवाखिलास्तेषां क्व मुक्तिः क्वेह वा सुखम्॥ ५७॥
advitīyabrahmatattvaṁ na jānanti yathā tathā |
bhrāntā evākhilāsteṣāṁ kva muktiḥ kveha vā sukham || 57||

दीर्घं वापि मनोराज्यं संसारं दुःखसागरम्।
सुप्तेरुत्थाय सुप्त्यन्तं ब्रह्मैकं प्रविचिन्त्यताम्॥ ६४॥
dīrghaṁ vāpi manorājyaṁ saṁsāraṁ duḥkhasāgaram |
supterutthāya suptyantaṁ brahmaikaṁ pravicintyatām || 64||

अहिनिर्ल्वयनी सर्पनिर्मोको जीववर्जितः।
वल्मीके पतितस्तिष्ठेत्तं सर्पो नाभिमन्यते॥ ६७॥
ahinirlvayanī sarpanirmoko jīvavarjitaḥ |
valmīke patitastiṣṭhettaṁ sarpo nābhimanyate || 67||

एवं स्थूलं च सूक्ष्मं च शरीरं नाभिमन्यते।
प्रत्यग्ज्ञानशिखिध्वस्ते मिथ्याज्ञाने सहेतुके।
नेति नेतीति रूपत्वादशरीरो भवत्ययम्॥ ६८॥
evaṁ sthūlaṁ ca sūkṣmaṁ ca śarīraṁ nābhimanyate |
pratyagjñānaśikhidhvaste mithyājñāne sahetuke |

neti netīti rūpatvādaśarīro bhavatyayam || 68||

शास्त्रेण न स्यात्परमार्थदृष्टिः
कार्यक्षमं पश्यति चापरोक्षम्।
प्रारब्धनाशात्प्रतिभान्सनाश
एवं त्रिधा नश्यति चात्ममाया॥ ६९॥
śāstreṇa na syātparamārthadṛṣṭiḥ
kāryakṣamaṁ paśyati cāparokṣam |
prārabdhanāśātpratibhānsanāśa
evaṁ tridhā naśyati cātmamāyā || 69||

प्रारब्धान्ते देहहानिर्मायेति क्षीयतेऽखिला।
अस्तीत्युक्ते जगत्सर्वं सद्रसं ब्रह्म तद्भवेत्॥ ७१॥
prārabdhānte dehahānirmāyeti kṣīyate'khilā |
astītyukte jagatsarvaṁ sadrasaṁ brahma tadbhavet || 71||

भातीत्युक्ते जगत्सर्वं भानं ब्रह्मैव केवलम्।
मरुभूमौ जलं सर्वं मरुभूमात्रमेव तत्।
जगत्त्रयमिदं सर्वं चिन्मात्रं स्वविचारतः॥ ७२॥
bhātītyukte jagatsarvaṁ bhānaṁ brahmaiva kevalam |
marubhūmau jalaṁ sarvaṁ marubhūmātrameva tat |
jagattrayamidaṁ sarvaṁ cinmātraṁ svavicārataḥ || 72||

सलिले सैन्धवं यद्वत्साम्यं भवति योगतः।
तथात्ममनसोरैक्यं समाधिरिति कथ्यते॥ ७५॥
salile saindhavaṁ yadvatsāmyaṁ bhavati yogataḥ |
tathātmamanasoraikyaṁ samādhiriti kathyate || 75||

सर्वचिन्तां परित्यज्य सावधानेन चेतसा।

नाद एवानुसन्धेयो योगसाम्राज्यमिच्छता॥ ८३॥
sarvacintāṁ parityajya sāvadhānena cetasā |
nāda evānusandheyo yogasāmrājyamicchatā || 83||

इति द्वितीयोऽध्यायः॥ २॥
iti dvitīyo'dhyāyaḥ || 2||

नित्यशुद्ध विमुक्तैकमखण्डानन्दमद्वयम्।
सत्यं ज्ञानमनन्तं यत्परं ब्रह्माहमेव तत्॥ २॥
nityaśuddha vimuktaikamakhaṇḍānandamadvayam |
satyaṁ jñānamanantaṁ yatparaṁ brahmāhameva tat || 2||

सत्यचिद्घनमखण्डमद्वयं
सर्वदृश्यरहितं निरामयम्।
यत्पदं विमलमद्वयं शिवं
तत्सदाहमिति मौनमाश्रय॥ ६॥
satyacidghanamakhaṇḍamadvayaṁ
sarvadṛśyarahitaṁ nirāmayam |
yatpadaṁ vimalamadvayaṁ śivaṁ
tatsadāhamiti maunamāśraya || 6||

जन्ममृत्युसुखदुःखवर्जितं
जातिनीतिकुलगोत्रदूरगम्।
चिद्विवर्तजगतोऽस्य कारणं
तत्सदाहमिति मौनमाश्रय॥ ७॥
janmamṛtyusukhaduḥkhavarjitaṁ
jātinītikulagotradūragam |
cidvivartajagato'sya kāraṇaṁ

tatsadāhamiti maunamāśraya || 7||

पूर्णमद्वयमखण्डचेतनं
विश्वभेदकलनादिवर्जितम्।
अद्वितीयपरसंविदंशकं
तत्सदाहमिति मौनमाश्रय॥ ८॥

pūrṇamadvayamakhaṇḍacetanaṁ
viśvabhedakalanādivarjitam |
advitīyaparasaṁvidaṁśakaṁ
tatsadāhamiti maunamāśraya || 8||

न कर्ता नैव भोक्ता च न च भोजयिता तथा।
केवलं चित्सदानन्दब्रह्मैवाहं जनार्दनः॥ १९॥

na kartā naiva bhoktā ca na ca bhojayitā tathā |
kevalaṁ citsadānandabrahmaivāhaṁ janārdanaḥ || 19||

मा भव ग्राह्यभावात्मा ग्राहकात्मा च मा भव।
भावनामखिलां त्यक्त्वा यच्छिष्टं तन्मयो भव॥ १९॥

mā bhava grāhyabhāvātmā grāhakātmā ca mā bhava |
bhāvanāmakhilāṁ tyaktvā yacchiṣṭaṁ tanmayo bhava || 19||

यथास्थितमिदं यस्य व्यवहारयतोऽपि च।
अस्तं गतं स्थितं व्योम स जीवन्मुक्त उच्यते॥ २१॥

yathāsthitamidaṁ yasya vyavahārayato'pi ca |
astaṁ gataṁ sthitaṁ vyoma sa jīvanmukta ucyate || 21||

नोदेति नास्तमायाति सुखे दुःखे मनःप्रभा।
यथा प्राप्तस्थितिर्यस्य स जीवन्मुक्त उच्यते॥ २२॥

nodeti nāstamāyāti sukhe duḥkhe manaḥprabhā |

yathā prāptasthitiryasya sa jīvanmukta ucyate || 22||

यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते।
यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते॥ २३॥
yo jāgarti suṣuptistho yasya jāgranna vidyate |
yasya nirvāsano bodhaḥ sa jīvanmukta ucyate || 23||

रागद्वेषभयादीनामनुरूपं चरन्नपि।
योऽन्तर्व्योमवदच्छन्नः स जीवन्मुक्त उच्यते॥ २४॥
rāgadveṣabhayādīnāmanurūpaṁ carannapi |
yo'ntarvyomavadacchannaḥ sa jīvanmukta ucyate || 24||

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते।
कुर्वतोऽकुर्वतो वापि स जीवन्मुक्त उच्यते॥ २५॥
yasya nāhaṅkṛto bhāvo buddhiryasya na lipyate |
kurvato'kurvato vāpi sa jīvanmukta ucyate || 25||

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोन्मुक्तः स जीवन्मुक्त उच्यते॥ २६॥
yasmānnodvijate loko lokānnodvijate ca yaḥ |
harṣāmarṣabhayonmuktaḥ sa jīvanmukta ucyate || 26||

यः समस्तार्थजालेषु व्यवहार्यपि शीतलः।
परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उच्यते॥ २७॥
yaḥ samastārthajāleṣu vyavahāryapi śītalaḥ |
parārtheṣviva pūrṇātmā sa jīvanmukta ucyate || 27||

प्रजहाति यदा कामान्सर्वांश्चित्तगतान्मुने।
मयि सर्वात्मके तुष्टः स जीवन्मुक्त उच्यते॥ २८॥

prajahāti yadā kāmānsarvāṁścittagatānmune |
mayi sarvātmake tuṣṭaḥ sa jīvanmukta ucyate || 28||

चैत्यवर्जितचिन्मात्रे पदे परमपावने।
अक्षुब्धचित्तो विश्रान्तः स जीवन्मुक्त उच्यते॥ २९॥
caityavarjitacinmātre pade paramapāvane |
akṣubdhacitto viśrāntaḥ sa jīvanmukta ucyate || 29||

इदं जगदहं सोऽयं दृश्यजातमवास्तवम्।
यस्य चित्ते न स्फुरति स जीवन्मुक्त उच्यते॥ ३०॥
idaṁ jagadahaṁ so'yaṁ dṛśyajātamavāstavam |
yasya citte na sphurati sa jīvanmukta ucyate || 30||

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः।
नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तत्॥ ३३॥
tameva dhīro vijñāya prajñāṁ kurvīta brāhmaṇaḥ |
nānudhyāyādbahūñchabdānvāco viglāpanaṁ hi tat || 33||

हंसः शक्तेरधिष्ठानं चराचरमिदं जगत्।
निर्विकल्पः प्रसन्नात्मा प्राणायां समभ्यसेत्॥ ५५॥
haṁsaḥ śakteradhiṣṭhānaṁ carācaramidaṁ jagat |
nirvikalpaḥ prasannātmā prāṇāyāṁ samabhyaset || 55||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०९१ ५६
॥ वासुदेवोपनिषत्॥
varṇa-kramāṅka muktikā-kramāṅka
091 56

|| vāsudevopaniṣat ||

मद्रूपमद्वयं ब्रह्म आदिमध्यान्तवर्जितम्।
madrūpamadvayaṁ brahma ādimadhyāntavarjitam |

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०९२	५०

॥ शरभोपनिषत्॥
०

वर्ण-क्रमाङ्क	मुक्तिका-क्रमाङ्क
०९४	९९

॥ शाट्यायनीयोपनिषत्॥

varṇa-kramāṅka	muktikā-kramāṅka
092	50

|| śarabhopaniṣat ||
0

varṇa-kramāṅka	muktikā-kramāṅka
094	99

|| śāṭyāyanīyopaniṣat ||

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्॥ १॥
mana eva manuṣyāṇāṁ kāraṇaṁ bandhamokṣayoḥ |
bandhāya viṣayāsaktaṁ muktyai nirviṣayaṁ smṛtam || 1||

अथाह यत्परमं ब्रह्म सनातनं

ये श्रोत्रिया अकामहता अधीयुः।
शान्तो दान्त उपरतिस्तितिक्षुहु-
र्योऽनूचानो ह्यभिजज्ञौ समानः॥ ५॥
athāha yatparamaṁ brahma sanātanaṁ
ye śrotriyā akāmahatā adhīyuḥ |
śānto dānta uparatistitikṣuhu-
ryo'nūcāno hyabhijajñau samānaḥ || 5||

त्यक्तेषणो ह्यनृणस्तं विदित्वा
मौनी वसेदाश्रमे यत्र कुत्र।
अथाश्रमं चरमं संप्रविश्य
यथोपपत्तिं पञ्चमात्रां दधानः॥ ६॥
tyakteṣaṇo hyanṛṇastaṁ viditvā
maunī vasedāśrame yatra kutra |
athāśramaṁ caramaṁ saṁpraviśya
yathopapattiṁ pañcamātrāṁ dadhānaḥ || 6||

तदैवं विद्वांस इहैवामृता भवन्ति।
tadaivaṁ vidvāṁsa ihaivāmṛtā bhavanti |

देवाग्न्यगारे तरुमूले गुहायां
वसेदसङ्गोऽलक्षितशीलवृत्तः।
निरिन्धनो ज्योतिरिवोपशान्तो
न चोद्विजेदुद्विजेद्यत्र कुत्र॥ २१॥
devāgnyagāre tarumūle guhāyāṁ
vasedasaṅgo'lakṣitaśīlavṛttaḥ |
nirindhano jyotirivopaśānto
na codvijedudvijedyatra kutra || 21||

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः।
किमिच्छन्कस्य कामाय शरीरमनुसञ्ज्वरेत्॥ २२॥
ātmānaṁ cedvijānīyādayamasmīti pūruṣaḥ |
kimicchankasya kāmāya śarīramanusañjvaret || 22||

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः।
नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तत्॥ २३॥
tameva dhīro vijñāya prajñāṁ kurvīta brāhmaṇaḥ |
nānudhyāyādbahūñchabdānvāco viglāpanaṁ hi tat || 23||

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥ २५॥
yadā sarve pramucyante kāmā ye'sya hṛdi śritāḥ |
atha martyo'mṛto bhavatyatra brahma samaśnute || 25||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०९३ ५८
॥ शाण्डिल्योपनिषत्॥
varṇa-kramāṅka muktikā-kramāṅka
093 58
|| śāṇḍilyopaniṣat ||

वेदान्तश्रवणं कुर्वन्योगं समारभेत्।
vedāntaśravaṇaṁ kurvanyogaṁ samārabhet |

मारुते मध्यसञ्चारे मनःस्थैर्यं प्रजायते।
यो मनःसुस्थिरो भावः सैवावस्था मनोन्मनी॥ १०॥
mārute madhyasañcāre manaḥsthairyaṁ prajāyate |

yo manaḥsusthiro bhāvaḥ saivāvasthā manonmanī || 10||

ज्ञेयवस्तुपरित्यागाद्विलयं याति मानसम्।
मानसे विलयं याते कैवल्यमवशिष्यते॥ २३॥
jñeyavastuparityāgādvilayaṁ yāti mānasam |
mānase vilayaṁ yāte kaivalyamavaśiṣyate || 23||

आकुञ्चनेन कुण्डलिन्याः कवाटमुद्घाट्य मोक्षद्वारं विभेदयेत्।
ākuñcanena kuṇḍalinyāḥ kavāṭamudghāṭya mokṣadvāraṁ vibhedayet |

मरुदभ्यसनं सर्वं मनोयुक्तं समभ्यसेत्
इतरत्र न कर्तव्या मनोवृत्तिर्मनीषिणा॥ ३७॥
marudabhyasanaṁ sarvaṁ manoyuktaṁ samabhyaset
itaratra na kartavyā manovṛttirmanīṣiṇā || 37||

जीवात्मपरमात्मैक्यावस्थात्रिपुटीरहिता
परमानन्दस्वरूपा शुद्धचैतन्यात्मिका भवति॥ ११॥
jīvātmaparamātmaikyāvasthātripuṭīrahitā
paramānandasvarūpā śuddhacaitanyātmikā bhavati || 11||

यदेकमक्षरं निष्क्रियं शिवं सन्मात्रं परंब्रह्म।
yadekamakṣaraṁ niṣkriyaṁ śivaṁ sanmātraṁ paraṁbrahma |

यत्सत्यं विज्ञानमानन्दं निष्क्रियं निरञ्जनं सर्वगतं सुसूक्ष्मं सर्वतोमुखमनिर्देश्यममृतमस्ति तदिदं निष्कलं रूपम्।

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०९५ ६२

॥ शारीरकोपनिषत्॥ ६२॥

०

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०९६ ३५

॥ शुकरहस्योपनिषत् ॥

yatsatyaṁ vijñānamānandaṁ niṣkriyaṁ nirañjanaṁ sarvagataṁ susūkṣmaṁ sarvatomukhamanirdeśyamamṛtamasti tadidaṁ niṣkalaṁ rūpam |

varṇa-kramāṅka muktikā-kramāṅka

095 62

|| śārīrakopaniṣat || 62||

0

varṇa-kramāṅka muktikā-kramāṅka

096 35

|| śukarahasyopaniṣat ||

ॐ अहं ब्रह्मास्मि॥ २॥

om ahaṁ brahmāsmi || 2||

ॐ अयमात्मा ब्रह्म॥ ४॥

om ayamātmā brahma || 4||

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च।

स्वाद्वस्वादु विजानाति तत्प्रज्ञानमुदीरितम्॥ १॥
yenekṣate śṛṇotīdaṁ jighrati vyākaroti ca |
svādvasvādu vijānāti tatprajñānamudīritam || 1||

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु।
चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि॥ २॥
caturmukhendradeveṣu manuṣyāśvagavādiṣu |
caitanyamekaṁ brahmātaḥ prajñānaṁ brahma mayyapi || 2||

परिपूर्णः परात्मास्मिन्देहे विद्याधिकारिणि।
बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते॥ ३॥
paripūrṇaḥ parātmāsmindehe vidyādhikāriṇi |
buddheḥ sākṣitayā sthitvā sphurannahamitīryate || 3||

स्वतः पूर्णः परात्मात्र ब्रह्मशब्देन वर्णितः।
अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहम्॥ ४॥
svataḥ pūrṇaḥ parātmātra brahmaśabdena varṇitaḥ |
asmītyaikyaparāmarśastena brahma bhavāmyaham || 4||

एकमेवाद्वितीयं सन्नामरूपविवर्जितम्।
सृष्टेः पुराधुनाप्यस्य तादृक्त्वं तदितीर्यते॥ ५॥
ekamevādvitīyaṁ sannāmarūpavivarjitam |
sṛṣṭeḥ purādhunāpyasya tādṛktvaṁ taditīryate || 5||

श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम्।
एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम्॥ ६॥
śroturdehendriyātītaṁ vastvatra tvaṁpaderitam |
ekatā grāhyate'sīti tadaikyamanubhūyatām || 6||

स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतम्।
अहङ्कारादिदेहान्तं प्रत्यगात्मेति गीयते॥ ७॥
svaprakāśāparokṣatvamayamityuktito matam |
ahaṅkārādidehāntaṁ pratyagātmeti gīyate || 7||

दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते।
ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम्॥ ८॥
dṛśyamānasya sarvasya jagatastattvamīryate |
brahmaśabdena tadbrahma svaprakāśātmarūpakam || 8||

अनात्मदृष्टेरविवेकनिद्रा-
        महं मम स्वप्नगतिं गतोऽहम्।
स्वरूपसूर्येऽभ्युदिते स्फुटोक्ते-
      र्गुरोर्महावाक्यपदैः प्रबुद्धः॥ ९॥
anātmadṛṣṭeravivekanidrā-
        mahaṁ mama svapnagatiṁ gato'ham |
svarūpasūrye'bhyudite sphuṭokte-
      rgurormahāvākyapadaiḥ prabuddhaḥ || 9||

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते॥ १२॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०९७ १४

॥ अथ श्वेताश्वरोपनिषत् ॥

kāryopādhirayaṁ jīvaḥ kāraṇopādhirīśvaraḥ |
kāryakāraṇatāṁ hitvā pūrṇabodho'vaśiṣyate || 12||

varṇa-kramāṅka muktikā-kramāṅka

097 14

|| atha śvetāśvaropaniṣat ||

क्षरं प्रधानममृताक्षरं हरः

क्षरात्मानावीशते देव एकः।

तस्याभिध्यानाद्योजनात्तत्त्व-

भावात् भूयश्चान्ते विश्वमायानिवृत्तिः॥ १०॥

kṣaraṁ pradhānamamṛtākṣaraṁ haraḥ

kṣarātmānāvīśate deva ekaḥ |

tasyābhidhyānādyojanāttattva-

bhāvāt bhūyaścānte viśvamāyānivṛttiḥ || 10||

एको देवः सर्वभूतेषु गूढः

सर्वव्यापी सर्वभूतान्तरात्मा।

कर्माध्यक्षः सर्वभूताधिवासः

साक्षी चेता केवलो निर्गुणश्च॥ ११॥

eko devaḥ sarvabhūteṣu gūḍhaḥ

sarvavyāpī sarvabhūtāntarātmā|

karmādhyakṣaḥ sarvabhūtādhivāsaḥ

sākṣī cetā kevalo nirguṇaśca || 11||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

०९८ ६५

॥ संन्यासोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

|| saṁnyāsopaniṣat||

त्यज धर्ममधर्मं च उभे सत्यानृते त्यज।
उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज॥ १२॥
tyaja dharmamadharmaṁ ca ubhe satyānṛte tyaja |
ubhe satyānṛte tyaktvā yena tyajasi tattyaja || 12||

कालत्रयमुपेक्षित्र्वा हीनायाश्चैत्यबन्धनैः।
चितश्चैत्यमुपेक्षित्र्याः समतैवावशिष्यते॥ २७॥
kālatrayamupekṣitrvā hīnāyāścaityabandhanaiḥ |
citaścaityamupekṣitryāḥ samataivāvaśiṣyate || 27||

सा हि वाचामगम्यत्वादसत्तामिव शाश्वतीम्।
नैरात्मसिद्धात्मदशामुपयातैव शिष्यते॥ २८॥
sā hi vācāmagamyatvādasattāmiva śāśvatīm |
nairātmasiddhātmadaśāmupayātaiva śiṣyate || 28||

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन जन्तवः।
धराविवरमग्नानां कीटानां समतां गताः॥ ३०॥
icchādveṣasamutthena dvandvamohena jantavaḥ |
dharāvivaramagnānāṁ kīṭānāṁ samatāṁ gatāḥ || 30||

अशुभाशुभसङ्कल्पः संशान्तोऽस्मि निरामयः।
नष्टेष्टानिष्टकलनः संमात्रपरोस्म्यहम्॥ ४९॥
aśubhāśubhasaṅkalpaḥ saṁśānto'smi nirāmayaḥ |
naṣṭeṣṭāniṣṭakalanaḥ saṁmātraparosmyaham || 49||

निर्वाणोऽस्मि निरीहोऽस्मि निरंशोऽस्मि निरीप्सितः।

स्वच्छतोर्जितता सत्ता हृद्यता सत्यता ज्ञता॥ ५६॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
०९९ १०६
॥ सरस्वतीरहस्योपनिषत्।॥
nirvāṇo'smi nirīho'smi niraṁśo'smi nirīpsitaḥ |
svacchatorjitatā sattā hṛdyatā satyatā jñatā || 56||

varṇa-kramāṅka muktikā-kramāṅka
099 106
|| sarasvatīrahasyopaniṣat | ||

ध्यायदृश्यानुविद्धोऽयं समाधिः सविकल्पकः।
स्वानुभूतिरसावेशाद्दृश्यशब्दाद्यपेक्षितुः॥ २७॥
dhyāyaddṛśyānuviddho'yaṁ samādhiḥ savikalpakaḥ |
svānubhūtirasāveśāddṛśyaśabdādyapekṣituḥ || 27||

निर्विकल्पः समाधिः स्यान्निवान्तस्थितदीपवत्।
हृदीव बाह्यदेशेऽपि यस्मिन्कस्मिंश्च वस्तुनि॥ २८॥
nirvikalpaḥ samādhiḥ syānnivāntasthitadīpavat |
hṛdīva bāhyadeśe'pi yasminkasmiṁśca vastuni || 28||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क
१०० ३३
॥ सर्वसारोपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

100 33

|| sarvasāropaniṣat ||

देहादीनामात्मत्वेनाभिमन्यते सोऽभिमान आत्मनो बन्धः।
dehādīnāmātmatvenābhimanyate so'bhimāna ātmano bandhaḥ |

तन्निवृत्तिर्मोक्षः।
tannivṛttirmokṣaḥ |

आकाशवत्सूक्ष्मं केवलसत्ता मात्रस्वभावं परं ब्रह्मेत्युच्यते।
ākāśavatsūkṣmaṁ kevalasattā mātrasvabhāvaṁ paraṁ brahmetyucyate |

ब्रह्मैवाहं सर्ववेदान्तवेद्यं
नाहं वेद्यं व्योमवातादिरूपम्।
रूपं नाहं नाम नाहं न कर्म
ब्रह्मैवाहं सच्चिदानन्दरूपम्॥ ५॥
brahmaivāhaṁ sarvavedāntavedyaṁ
nāhaṁ vedyaṁ vyomavātādirūpam |
rūpaṁ nāhaṁ nāma nāhaṁ na karma
brahmaivāhaṁ saccidānandarūpam || 5||

नाहं देहो जन्ममृत्यु कुतो मे
नाहं प्राणः क्षुत्पिपासे कुतो मे।
नाहं चेतः शोकमोहौ कुतो मे
नाहं कर्ता बन्धमोक्षौ कुतो म इत्युपनिषत्॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

१०१ ७५

॥ सावित्र्युपनिषद्॥

०

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

१०२ ४५

॥ सीतोपनिषत्॥

०

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

१०३ ३०

॥ सुबालोपनिषत्॥

nāhaṁ deho janmamṛtyu kuto me
nāhaṁ prāṇaḥ kṣutpipāse kuto me |
nāhaṁ cetaḥ śokamohau kuto me
nāhaṁ kartā bandhamokṣau kuto ma ityupaniṣat ||

varṇa-kramāṅka muktikā-kramāṅka

101 75

|| sāvitryupaniṣad ||

0

varṇa-kramāṅka muktikā-kramāṅka

102 45

|| sītopaniṣat ||

0

varṇa-kramāṅka muktikā-kramāṅka

103 30

|| subālopaniṣat ||

पृथिव्यप्सु प्रलीयत आपस्तेजसि प्रलीयन्ते तेजो वायौ
विलीयते वायुराकाशे विलीयत आकाशमिन्द्रियेष्विन्द्रियाणि
तन्मात्रेषु तन्मात्राणि भूतादौ विलीयन्ते भूतादिर्महति
विलीयते महानव्यक्ते विलीयते।
pṛthivyapsu pralīyata āpastejasi pralīyante tejo vāyau
vilīyate vāyurākāśe vilīyata ākāśamindriyeṣvindriyāṇi
tanmātreṣu tanmātrāṇi bhūtādau vilīyante bhūtādirmahati
vilīyate mahānavyakte vilīyate|

नास्ति द्वैतं कुतो मर्त्यं महत्पदं
ज्ञात्वा वृक्षमूले वसेत कुचेलोऽसहाय एकाकी
समाधिस्थ आत्मकाम आप्तकामो निष्कामो
जीर्णकामो हस्तिनि सिंहे दंशे मशके नकुले
सर्पराक्षसगन्धर्वे मृत्यो रूपाणि विदित्वा न बिभेति
कुतश्चनेति वृक्षमिव तिष्ठासेच्छिद्यमानोऽपि
nāsti dvaitaṁ kuto martyaṁ mahatpadaṁ
jñātvā vṛkṣamūle vaseta kucelo'sahāya ekākī
samādhistha ātmakāma āptakāmo niṣkāmo
jīrṇakāmo hastini siṁhe daṁśe maśake nakule
sarparākṣasagandharve mṛtyo rūpāṇi viditvā na bibheti
kutaścaneti vṛkṣamiva tiṣṭhāsecchidyamāno'pi

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

१०४ ७१

॥ सूर्योपनिषत्॥
०

pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate ||

varṇa-kramāṅka muktikā-kramāṅka

104 71

|| sūryopaniṣat ||

0

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

१०५ १०५

॥ सौभाग्यलक्ष्म्युपनिषत्॥

varṇa-kramāṅka muktikā-kramāṅka

105 105

|| saubhāgyalakṣmyupaniṣat ||

सलिले सैन्धावं यद्वत्साम्यं भवति योगतः।
तथात्ममनसौरैक्यं समाधिरभिधीयते॥ १४॥
salile saindhāvaṁ yadvatsāmyaṁ bhavati yogataḥ |
tathātmamanasaurekyaṁ samādhirabhidhīyate || 14||

यत्समत्वं तयोरत्र जीवात्मपरमात्मनोः।
समस्तनष्टसङ्कल्पः समाधिरभिधीयते॥ १६॥
yatsamatvaṁ tayoratra jīvātmaparamātmanoḥ |
samastanaṣṭasaṅkalpaḥ samādhirabhidhīyate || 16||

प्रभाशून्यं मनःशून्यं बुद्धिशून्यं निरामयम्।

सर्वशून्यं निराभासं समाधिरभिधीयते॥ १७॥
prabhāśūnyaṁ manaḥśūnyaṁ buddhiśūnyaṁ nirāmayam |
sarvaśūnyaṁ nirābhāsaṁ samādhirabhidhīyate || 17||

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

१०६ ५१

॥ स्कन्दोपनिषत् ५१ ॥

०

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

१०७ १००

॥ हयग्रीवोपनिषत्॥

०

वर्ण-क्रमाङ्क मुक्तिका-क्रमाङ्क

१०८ १५

॥ हंसोपनिषत् ॥

varṇa-kramāṅka muktikā-kramāṅka

106 51

|| skandopaniṣat 51 ||

0

varṇa-kramāṅka muktikā-kramāṅka

107 100

|| hayagrīvopaniṣat ||

0

varṇa-kramāṅka muktikā-kramāṅka

108 15

|| haṁsopaniṣat ||

तस्मिन्मनो विलीयते मनसि सङ्कल्पविकल्पे दग्धे पुण्यपापे
सदाशिवः शक्त्यात्मा सर्वत्रावस्थितः स्वयञ्ज्योतिः शुद्धो
बुद्धो नित्यो निरञ्जनः शान्तः प्रकाशत इति॥

tasminmano vilīyate manasi saṅkalpavikalpe dagdhe puṇyapāpe
sadāśivaḥ śaktyātmā sarvatrāvasthitaḥ svayañjyotiḥ śuddho
buddho nityo nirañjanaḥ śāntaḥ prakāśata iti ||